Digitization by Arya Samaj Charitable Foundation, Chennai

श्रीमहेन्द्रसंस्कृतविश्वविद्यालयग्रन्थमालायाः पञ्चाशं पुष्पम्

सौश्रुतनिघण्टुः

सम्पादकौ

डा. काशीराज शर्मा सुवेदी

डा. नरेन्द्रनाथ तिवारी

प्रकाशकः

महेन्द्रसंस्कृतविश्वविद्यालयः

Digitization by Arya Samaj Charitable Foundation, Chennai

Digitization by Arya Samaj Charitable Foundation, Chennai

मेहता ला.

Digitization by Arya Samaj Charitable Foundation, Chennai

Digitization by Arya Samaj Charitable Foundation, Chennai

श्रीमहेन्द्रसंस्कृतविश्वविद्यालयग्रन्थमालायाः पञ्चाशं पुष्पम्

सौश्रुतनिघण्टुः

ग्रन्थादौ विस्तृतेन ग्रन्थवैशिष्ट्यप्रकाशकेनोपोद्घातेन अवसाने च द्रव्याणामनेकभाषानामावली-पर्यायसङ्ग्रहाभ्यां समलङ्कृतः सुश्रुतसंहितायां प्रयुक्तानामौषधद्रव्याणां पर्याय-गुणकर्मवर्णनात्मकोऽपूर्वग्रन्थः

सम्पादकौ

डा. काशीराज शर्मा सुवेदी

डा. नरेन्द्रनाथ तिवारी

प्रकाशकः

महेन्द्रसंस्कृतविश्वविद्यालयः

बेलझुण्डी, दाङ, नेपाल

Digitization by Arya Samaj Charitable Foundation, Chennai

प्रकाशक

महेन्द्र संस्कृत विश्वविद्यालय

बेलझुण्डी, दाङ

प्रकाशन

ऋषितर्पणी, २०५७

© सर्वाधिकार प्रकाशकमा सुरक्षित

प्रकाशित पुस्तक संख्या - १००० प्रति

१२० मूल्य - रू. १२०/-

कम्प्युटर

क्यालिटी लेजर प्रिन्ट, बागबजार,

दूरभाषसङ्ख्या (फोन नं.) २४२६५६

मुद्रक

नेपाल प्रिन्टर्स एण्ड ट्रेडर्स सहकारी लिमिटेड

फोन : ४२७४५६

Digitization by Arya Samaj Charitable Foundation, Chennai

महेन्द्रसंस्कृतविश्वविद्यालयः
उपकुलपतेः कार्यालयः

सम्मतिः

सर्वासु भाषास्वतिप्राचीना सकलशास्त्राणां निधानभूता निदानभूता च संस्कृत-भाषा। संस्कृतवाङ्मये मानवानां धर्मार्थकाममोक्षाख्याश्चत्वारः पुरुषार्थाः निर्दिष्टाः। तत्र धर्ममोक्षाख्योभयपुरुषार्थसाधकं शास्त्रमाध्यात्मिकम्, अर्थकामाख्योभयपुरुषार्थ-साधकं शास्त्रञ्च भौतिकमिति व्यपदिश्यते लोकैः। अथवाऽऽध्यात्मिकं शास्त्रं ज्ञानमिति शिल्पादिकलाप्रतिपादकं भौतिकं शास्त्रं विज्ञानमिति व्यवह्रियते। श्रुतिस्मृतीतिहास-पुराणधर्मशास्त्रादिभिश्चतुष्षष्टिकलाशास्त्रैश्च समृद्धमेतद् वाङ्मयमगाधसमुद्रमिवाभाति। तेषु शास्त्रेषु पूर्वोक्तपुमर्थप्रतिपादका नानाविधा उपायाः प्रतिपादिताः सन्ति।

स्वास्थ्यसम्पन्नो मानव एवाभीप्सितपुरुषार्थसाधनाय प्रभवतीति सर्वपुरुषार्थ-साधकशरीरस्वास्थ्यसाधकं शास्त्रं परमावश्यकमिति मन्वानेन परमकारुणिकेन भगवता परमेष्ठिनाऽथर्ववेदात् सारमुद्धृत्य स्वनाम्ना ब्रह्मसंहितानामक आयुर्वेदग्रन्थो व्यरच्यत। तथा च –

विधाताऽथर्वसर्वस्वमायुर्वेदं प्रकाशयन्।
स्वनाम्ना संहितां चक्रे लक्षश्लोकमयीमृजुम्।। (भावप्रकाशे)

ततश्च तां संहितां ब्रह्मा दक्षमध्यापितवान्, दक्षादश्विनीकुमारावधीतवन्तौ, अश्विभ्यामिन्द्रः पाठितः। इन्द्राद् भरद्वाजोऽधीतवान्, ततो लोके आयुर्वेदशास्त्रं प्रथितम्। कालक्रमेण पश्चाद्दैत्यैर्वेदेऽपहृते लुप्ते चायुर्वेदसम्प्रदाये मत्स्यावतारो हरिर्वेदानुज्जहार। लुप्तमायुर्वेदं शेषो भगवान् पृथिव्यामवतीर्य चरकाचार्यो भूत्वा प्रावर्तयत। तेन निर्मिता संहिता चरकसंहितेत्युच्यते। पुनश्च महता कालेनायुर्वेदे लुप्तप्राये तत्प्रचारार्थ-मिन्द्राज्ञया काश्यां दिवोदासनृपरूपेणावतीर्णो धन्वन्तरिर्विश्वामित्रसुतं सुश्रुतमायुर्वेदम-पाठयत्। तेन विरचितेयं संहिता सुश्रुतसंहितेत्युच्यते।

Digitization by Arya Samaj Charitable Foundation, Chennai

सुश्रुतेन कृतं तन्त्रं सुश्रुतं बहुभिर्यतः ।
तस्मात्तत् सुश्रुतं नाम्ना विख्यातं पृथिवीतले ।। (भावप्रकाशे)

सेयं सुश्रुतसंहितेदानीमायुर्वेदग्रन्थेष्वप्रतिमां ख्यातिं बिभर्ति ।

वाचस्पत्ये 'एकार्थवाचिनां पर्यायशब्दानां सङ्ग्रहो यत्र प्रायेणोपदिश्यते तत्र निघण्टुशब्दः' इत्यभिहितम् । निघण्टुशेषव्याख्यात्रा विदुषा वल्लभगणिना 'नितरां घण्ट्यन्ते एकत्र भाष्यन्ते शब्दा अनेन इति निघण्टुः' इति निगदितम् । तथा च निघण्टुः, निगमः, निरुक्तम्, निर्वचनम्, एते शब्दाः समानार्थका एवेति वक्तुं शक्यम्। निघण्टुसङ्कलितानां शब्दानां सुगूढा अप्यर्था निर्वचनपूर्वकं प्रदर्शिता भवन्तीति मे विचारः । अतोऽयं सुश्रुतसंहितानिघण्टुग्रन्थः पर्यायवाचकानामनेकशब्दानामूहापोहजनितया धिया सन्देहान्निरस्य सुश्रुतसंहितोक्तानौषधान् सम्यगवधारयितुं भिषजांवराननुसन्धातॄँश्चोपकरिष्यतीति भृशं विश्वसिमि ।

सौश्रुतनिघण्टुग्रन्थोऽयं हस्तलिखितसुश्रुतसंहितायाः परिशिष्टत्वेन नेपाले सुरक्षितोऽतिदुर्लभः परमोपयोगी चेति मत्वा महेन्द्रसंस्कृतविश्वविद्यालयेन प्रकाश्यमानो वर्तत इति मोमुद्यते मदीयं मनः ।

तत्सम्पादनसन्दर्भे च सम्पादकाभ्यामष्टाङ्गनिघण्टु-सिद्धसारनिघण्टु-पर्यायरत्नमालाप्रभृतीन् ग्रन्थान् पर्यालोच्य महता प्रयासेनौषधपर्यायाणां फलमूलवृन्तसाराद्यनुरूपत्वमपि प्रदर्श्य निघण्टुपठितद्रव्याणां डल्हणोक्ताः पर्याया नेपालिभाषायां ल्याटिनभाषायाञ्च तेषामभिधानानि दत्तानि सन्ति ।

अन्ते चैतादृशसुसम्पादनकर्तृभ्यामुभाभ्यां विद्वद्भ्यां डा. काशीराजसुवेदी-डा. नरेन्द्रनाथतिवारीमहाभागाभ्यां भूयोभूयः साधुवादान् प्रयच्छन् विरमामि ।

ऋषितर्पणी, २०५७

माधवराजगौतमः
उपकुलपतिः

Digitization by Arya Samaj Charitable Foundation, Chennai

प्रकाशकीयम्

महेन्द्रसंस्कृतविश्वविद्यालयस्य पाठ्यक्रमे निर्धारितान् विषयानवलम्ब्य नवीन-पद्धत्या प्रणीतानां पाठ्यपुस्तकानां सहायकपुस्तकानां सन्दर्भपुस्तकानां शोधग्रन्थानाञ्च प्रकाशनविधौ विश्वविद्यालयोऽयमग्रेसरो विद्यत इति सामोदमावेदयामि पाठकानां पुरतः ।

अस्मिन् सन्दर्भेऽस्य विश्वविद्यालयस्य ग्रन्थसम्पादनकार्यक्रमान्तर्गतं नियमित-पत्रमङ्गीकृत्य डा. काशीराजशर्मसुवेदि - डा. नरेन्द्रनाथतिवारीमहोदयाभ्यां सम्पादितं सौश्रुतनिघण्टुनामकं ग्रन्थरत्नं सम्प्रति प्रकाश्यमानमस्तीति प्रमोदस्य विषयः। अनेन आयुर्वेदविषयमवलम्ब्य पठन्तश्छात्रा लाभान्विता भविष्यन्तीति अस्माकं विश्वासः। आयुर्वेदविषयेऽनुसन्धानं कर्तुमभिलषतां विदुषामायुर्वेदविषयमध्येतु कामानां पाठकानाञ्च कृतेऽपि ग्रन्थोऽयमुपकारी भविष्यतीति प्रत्ययः ।

निरन्तरं सद्ग्रन्थप्रणयनसम्पादनप्रकाशनादिकार्येषु प्रेरणां प्रोत्साहनञ्च प्रदाय मार्गदर्शनं कुर्वद्भ्यो महेन्द्रसंस्कृतविश्वविद्यालयस्य उपकुलपतिपदमलङ्कुर्वद्भ्यः श्रीमाधवराजगौतममहाभागेभ्यो हार्दिकीं कृतज्ञतां समर्पयामि । अस्य ग्रन्थस्य महता-ध्यवसायेन प्रणयनं विधाय छात्राणामुपकारविधौ दत्तचेतोभ्यां विद्वद्भ्यां डा. काशी-राजशर्मसुवेदि - डा. नरेन्द्रनाथतिवारीभ्यां साधुवादं प्रयच्छामि ।

पुनश्च सुन्दरकम्प्यूटरटङ्कणकारिणे बागबजारस्थ-क्वालिटीलेजरप्रिन्ट-संस्थानाय, सुरुचिरमुद्रणविधायिने डिल्लीबजारस्य नेपालप्रिन्टर्सएण्डको-अपरेटिभ-लिमिटेडाख्य-संस्थानाय च धन्यवादं प्रदायान्येभ्यश्च संबद्धसहयोगिभ्यः साधुवादं वितराम्यहम् ।

प्रा.डा. वावुरामपोखेलः
शिक्षाध्यक्षः
महेन्द्रसंस्कृतविश्वविद्यालयः

ऋषितर्पणी, २०५७

Digitization by Arya Samaj Charitable Foundation, Chennai

Digitization by Arya Samaj Charitable Foundation, Chennai

विषयसूची

१) उपोद्घातखण्डः - पृष्ठसंख्या

१. प्रस्तावना १
२. सौश्रुतनिघण्टुग्रन्थसङ्केतः ३
३. सौश्रुतनिघण्टुग्रन्थप्राप्तिः ३
४. उपलब्धानां तत्पाण्डुलिपीनां तुलनात्मकं पाठाध्ययनम् ८
५. ग्रन्थसम्पादनपद्धतिः १०
६. ग्रन्थकर्तुर्विमर्शः १२
७. ग्रन्थलेखनकालः १४
८. ग्रन्थयोजना ३०
९. सौश्रुतनिघण्टुग्रन्थस्य वैशिष्ट्यम्
 १) ऐतिहासिकं वैशिष्ट्यम् ३१
 २) विषयवर्णनात्मकं वैशिष्ट्यम् ३३
  क) अत्र वर्णितानां द्रव्यपर्यायाणामपूर्वत्वं दुर्लभत्वञ्च - ३३
  ख) अत्रत्यानां द्रव्यपर्यायाणामन्यनिघण्टुषु परिवर्तनम् - ३३
  ग) अत्रत्यानां द्रव्यपर्यायाणां व्यापकत्वम् ३४
  घ) " " मौलिकत्वम् ३७
  ङ) " " यथार्थाभिव्यञ्जकत्वम् ३८
  च) " " अनेकार्थवत्त्वम् ४०
  छ) " " क्रमबद्धता व्यवस्था च ४२
  ज) " " ग्रन्थान्तरोक्तपर्यायैः साम्यम् ४२
  झ) सौश्रुतनिघण्टुग्रन्थे पठितानां द्रव्यपर्यायाणामर्थभेदाः - ४४
 (३) द्रव्यसंग्रहणीयाध्यायोक्तद्रव्याणां विविधसन्निवेशविषयकं वैशिष्ट्यम्- ४५
१०. ग्रन्थसम्पादनस्यौचित्यं प्रकाशनार्हत्वञ्च ४६
११. कृतज्ञत्वनिवेदनमुपसंहारश्च ४७
१२. ग्रन्थसंकेतसूची ५०

Digitization by Arya Samaj Charitable Foundation, Chennai

२) सौश्रुतनिघण्टुमूलपाठः-

विषयक्रमः	श्लोकसंख्या	पृष्ठसंख्या
मङ्गलाचरणम्	१	५३
सुश्रुतादीनां श्रीधन्वन्तरिसमीपे गमनम्, तं प्रति तेषां प्रश्नश्च	१-३	५३
तत्प्रसङ्गे द्रव्याणां नानाविधनामोपलम्भान्मोहस्याभिव्यक्तिः	३-५	५३
द्रव्याणां नामज्ञानस्य महत्त्वम्	६	५३
देशभाषाविभागेन द्रव्याणां नामकथनाय प्रार्थना	७	५४
धन्वन्तरिणा प्रश्नानुसारं द्रव्यनाम्नां कथनायोपक्रमः	८-११	५४
द्रव्यसंग्रहणीयाध्यायानुसारं द्रव्याणां क्रमेण प्रतिश्लोकं पर्यायकथनप्रतिज्ञा	१२	५४
विदारिगन्धा	१३	५५
विदारी	१४	५५
विश्वदेवा	१५	५५
सहदेवा	१६	५५
श्वदंष्ट्रकः	१७	५५
पृथक्पर्णी	१८	५५
शतावरी	१९	५५
सारिवा	२०	५६
जीवकः	२१	५६
ऋषभः	२२	५६
महासहा (माषपर्णी)	२३	५६
क्षुद्रसहा (मुद्गपर्णी)	२४	५६
बृहती	२५	५६
वृषभी (कण्टकारिका)	२६	५६
पुनर्नवा	२७	५७
पुनर्नवः	२८	५७
एरण्डः	२९	५७
हंसपादी	३०	५७
वृश्चिकाली	३१	५७
अकाशी (कपिकच्छुः)	३२	५७

Digitization by Arya Samaj Charitable Foundation, Chennai

विदारिगन्धादिगणोक्तद्रव्याणां गुणकर्मनिर्देशः	३३	५७
आरग्वधः	३४	५८
मदनः	३५	५८
कर्कन्धूः	३६	५८
कण्टकी	३७	५८
कुटजः	३८	५८
पाठा	३९	५८
पाटला	४०	५८
मूर्वा	४१	५८
सप्तपर्णः	४२	५९
निम्बः	४३	५९
दासीकुरण्टकः	४४	५९
गुडूची	४५	५९
चित्रकः	४६	५९
शार्ङ्गेष्टा	४७	५९
करञ्जः (नक्तमालः)	४८	६०
करञ्जः (चिरबिल्वः)	४९	६०
पटोलः	५०	६०
किराततिक्तम्	५१	६०
सुषवी	५२	६०
आरग्वधादिगणोक्तद्रव्याणां गुणकर्माणि	५३	६०
सालसारः	५४	६१
अजकर्णः	५५	६१
खदिरः	५६	६१
कदरः	५७	६१
खपुकः (क्रमुकः)	५८	६१
भूर्जः	५९	६२
मेषशृङ्गी	६०	६२
तिनिशः	६१	६२
चन्दनः	६२	६२
कुचन्दनः	६३	६२

Digitization by Arya Samaj Charitable Foundation, Chennai

शिंशपा	६४	६२
शिरीषः	६५	६२
असनः	६६	६२
धवः	६७	६३
अर्जुनः	६८	६३
नक्तमालः	*	६३
अश्वकर्णः	६९	६३
अगुरुः	७०	६३
कालेयकम्	७१	६३
सालसारादिगणोक्तद्रव्याणां गुणकर्माणि	७२	६३
वरुणः	७३	६४
आर्तगलः	७४	६४
शिग्रुः	७५	६४
मधुशिग्रुः	७६	६४
तर्कारी	७७	६४
मेषशृङ्गी	*	६४
नक्तमालः	*	६४
मोरटः	७८	६४
अग्निमन्थः	७९	६५
दासकुरण्टकः	*	६५
बाणः (द्वितीयसैरीयकः)	८०	६५
बिम्बी	८१	६५
चित्रकः	*	६५
बिल्वः	८२	६५
अजशृङ्गी	८३	६५
बृहतीद्वयम्	*	६५
वरुणादिगणोक्तद्रव्याणां गुणकर्मनिर्देशः	८४	६५
वीरतरुः	८५	६६

* *चिह्नाङ्कितस्थलेषु पूर्वगणोक्तद्रव्याणां नामोल्लेखः केवलं वर्तते, तत्सङ्केतार्थं वाक्यानि मूले निर्दिष्टानि, तत्र पर्याया नैव कीर्तिता इति विशेषः ।*

Digitization by Arya Samaj Charitable Foundation, Chennai

वृक्षादनी	८६	६६
गूढवृन्ततृण: (गुण्ठ:)	८७	६६
नल:	८८	६६
कुशदर्भ:	८९	६६
काश:	९०	६६
अश्मभेद:	९१	६६
अग्निमन्थ:	*	६६
वसुक:	९२	६७
वसिर:	९३	६७
भल्लूक:	९४	६७
कुरुटका	९५	६७
इन्दीवर:	९६	६७
कपोतवङ्का	९७	६७
वीरतरादिगणोक्तद्रव्याणां गुणकर्माणि	९८	६७
लोध्र:	९९	६८
शाबरलोध्र:	१००	६८
पलाश:	१०१	६८
कुटन्नटम्	१०२	६८
अशोक:	१०३	६८
कट्फल: (काश्मरी)	१०४	६८
एलवालुकम्	१०५	६९
शल्लकी	१०६	६९
जिङ्गिणी	१०७	६९
कदम्ब:	१०८	६९
कदली	१०९	६९
लोध्रादिगणोक्तद्रव्याणां गुणकर्मनिर्देश:	११०	६९
अर्क:	१११	७०
अलर्क:	११२	७०
करञ्जद्वयम्	*	७०
नागदन्ती	११३	७०

Digitization by Arya Samaj Charitable Foundation, Chennai

मयूरकः (अपामार्गः)	११४	७०
भार्गी	११५	७०
रास्ना	११६	७०
इन्द्रपुष्पी	११७	७१
क्षुद्रश्वेता	११८	७१
महाश्वेता	११९	७१
वृश्चिकाली	*	७१
अलवणा (ज्योतिष्मती:)	१२०	७१
तापसवृक्षः (इङ्गुदः)	१२१	७१
अर्कादिगणोक्तानां द्रव्याणां गुणकर्मनिर्देशः	१२२	७१
सुरसा	१२३	७२
श्वेतसुरसा	१२४	७२
फणिज्झकः	१२५	७२
अर्जकः	१२६	७२
भूस्तृणम्	१२७	७२
सुगन्धकः	१२८	७२
कालमालः	१२९	७२
क्षवकः	१३०	७३
खरपुष्पा	१३१	७३
विडङ्गम्	१३२	७३
कट्फलम्	*	७३
सुरसी	१३३	७३
निर्गुण्डी	१३४	७३
अलम्बुसः (कालमालः)	१३५	७३
उन्दूरुकर्णी	१३६	७४
फञ्जी	*	७४
प्रचीवलः	१३७	७४
काकमाची	१३८	७४
विषमुष्टिः	१३९	७४
सुरसादिगणोक्तानां द्रव्याणां गुणकर्मनिर्देशः	१४०	७४

Digitization by Arya Samaj Charitable Foundation, Chennai

मुष्कक:	१४१	७५
पलाश:	*	७५
धव:	*	७५
चित्रक:	*	७५
मदनवृक्ष:	*	७५
शिंशपा	*	७५
वज्रवृक्ष:	१४२	७५
हरीतकी	१४३	७५
आमलकी	१४४	७५
विभीतक:	१४५	७५
मुष्ककादिगणोक्तानां द्रव्याणां गुणकर्मनिर्देश:	१४६	७५
पिप्पली	१४७	७६
पिप्पलीमूलम्	१४८	७६
चविका	१४९	७६
चित्रक:	*	७६
शृङ्गवेरम्	१५०	७६
मरिचम्	१५१	७६
हरेणुका	१५२	७६
एला	१५३	७७
अजमोदा	१५४	७७
इन्द्रयव:	*	७७
कुटज:	*	७७
मूर्वा	*	७७
पाठा	*	७७
जीरकम्	१५५	७७
सर्षप:	१५६	७७
महानिम्ब:	१५७	७७
हिङ्गु	१५८	७८
भार्गी	*	७८
मधुरसा	*	७८

Digitization by Arya Samaj Charitable Foundation, Chennai

अतिविषा	१५९	७८
विडङ्गम्	*	७८
कटुरोहिणी	१६०	७८
पिप्पल्यादिगणोक्तानां द्रव्याणां गुणकर्मनिर्देशः	१६१	७८
एला	*	७९
तगरम्	१६२	७९
कुष्ठम्	१६३	७९
मांसी	१६४	७९
ध्यामकम्	१६५	७९
पत्रम्	१६६	७९
नागपुष्पम्	१६७	७९
प्रियङ्गुः	१६८	८०
हरेणुका	*	८०
व्याघ्रनखः	१६९	८०
शुक्तिः	१७०	८०
चण्डा	१७१	८०
स्थौणेयकम्	१७२	८०
चोचम्	१७३	८०
चोरकः	१७४	८०
बालकः	१७५	८१
गुग्गुलुः	१७६	८१
सर्जरसः	१७७	८१
रसः (बोलः)	१७८	८१
श्रीवेष्टकः	१७९	८१
उरुष्कः	१८०	८१
कुन्दूरकः	१८१	८२
अगुरुः	*	८२
स्पृक्का	१८२	८२
सुरकाष्ठम्	१८३	८२
कुङ्कुमम्	१८४	८२

Digitization by Arya Samaj Charitable Foundation, Chennai

पुन्नागपुष्पम्	१८५	८२
एलादिगणोक्तद्रव्याणां गुणकर्मनिर्देशः	१८६	८२
वचा	१८७	८३
मुस्ता	१८८	८३
अतिविषा	*	८३
हरीतकी	*	८३
भद्रदारु	*	८३
नागरम्	*	८३
हरिद्रा	१८९	८३
दारुहरिद्रा	१९०	८३
वत्सकबीजम्	*	८३
मधुकम्	१९१	८३
वचादिहरिद्रादिगणयोः पठितद्रव्याणां गुणकर्माणि	१९२	८३
श्यामा	१९३	८४
महाश्यामा	१९४	८४
त्रिवृत्	१९५	८४
दन्ती	१९६	८४
शङ्खिनी	१९७	८४
तिल्वकः	१९८	८४
कम्पिल्लकः	१९९	८५
क्रमुकः	*	८५
पुत्रश्रेणी	२००	८५
गवाक्षी	२०१	८५
आरग्वधः	*	८५
सप्तला	२०२	८५
छगलान्त्री	२०३	८५
स्नुहा	*	८५
स्वर्णक्षीरी	२०४	८५
श्यामादिगणोक्तानां द्रव्याणां गुणकर्मनिर्देशः	२०५	८५
बृहती	*	८६

Digitization by Arya Samaj Charitable Foundation, Chennai

कण्टकारिका	*	८६
कुटजः	*	८६
पाठा	*	८६
मधुकम्	*	८६
बृहत्यादिगणोक्तद्रव्याणां गुणकर्मनिर्देशः	२०६	८६
पटोलः	*	८६
चन्दनम्	*	८६
मूर्वा	*	८६
गुडूची	*	८६
पाठा	*	८६
कटुरोहिणी	*	८६
पटोलादिगणोक्तानां द्रव्याणां गुणकर्मनिर्देशः	२०७	८६
काकोली	२०८	८७
क्षीरकाकोली	२०९	८७
जीवकः	*	८७
ऋषभकः	*	८७
मेदा	२१०	८७
महामेदा	२११	८७
छिन्नरुहा	२१२	८७
कर्कटशृङ्गी	२१३	८७
तुगाक्षीरी	२१४	८७
पद्मकम्	२१५	८८
प्रपौण्डरीकम्	२१६	८८
ऋद्धिः	२१७	८८
वृद्धिः	२१८	८८
मधुकम्	*	८८
काकोल्यादिगणोक्तानां द्रव्याणां गुणकर्मनिर्देशः	२१९	८८
ऊषकम्	२२०	८९
सैन्धवम्	२२१	८९
हिङ्गु	*	८९

Digitization by Arya Samaj Charitable Foundation, Chennai

शिलाजतु	२२२	८९
कासीसम्	२२३	८९
तुत्थम्	२२४	८९
ऊषकादिगणोक्तानां द्रव्याणां गुणकर्मनिर्देशः	२२५	८९
सारिवा	*	९०
मधुकम्	*	९०
चन्दनम्	*	९०
पद्मकम्	*	९०
काश्मर्यम्	*	९०
मधूकपुष्पम्	२२६	९०
उशीरम्	२२७	९०
सारिवादिगणोक्तानां द्रव्याणां गुणकर्मनिर्देशः	२२८	९०
अञ्जनम्	२२९	९१
रसाञ्जनम्	२३०	९१
नागपुष्पम्	*	९१
प्रियङ्गुः	*	९१
नलिनम्	२३१	९१
अञ्जनादिगणोक्तानां द्रव्याणां गुणकर्मनिर्देशः	२३२	९१
परुषकः	२३३	९२
द्राक्षा	२३४	९२
कट्फलम्	*	९२
राजादनः	२३५	९२
दाडिमः	२३६	९२
कतकः	२३७	९२
शाकः	२३८	९२
त्रिफला	*	९२
परुषकादिगणोक्तानां द्रव्याणां गुणकर्मनिर्देशः	२३९	९२
अम्बष्ठा	२४०	९३
धातकीपुष्पम्	२४१	९३
समङ्गा	२४२	९३

Digitization by Arya Samaj Charitable Foundation, Chennai

कट्वङ्गः	२४३	१३
मधुकम्	*	१३
बिल्वः	*	१३
रोध्रः	*	१३
पलासः	*	१३
नन्दीवृक्षः	२४४	१३
पद्मकेशरम्	*	१३
प्रियङ्गुः	*	१४
समङ्गा	*	१४
धातकीपुष्पम्	*	१४
पुन्नागपुष्पम्	*	१४
चन्दनम्	*	१४
मोचः	२४५	१४
रसाञ्जनम्	*	१४
अञ्जनम्	*	१४
कुम्भीकः	२४६	१४
योजनवल्ली	२४७	१४
दीर्घमूला	२४८	१४
प्रियङ्ग्वाद्यम्बष्ठाद्ययोर्गणयोर्द्रव्याणां गुणकर्माणि	२४९	१४
न्यग्रोधः	२५०	१५
अश्वत्थः	२५१	१५
उदुम्बरः	२५२	१५
प्लक्षः	२५३	१५
मधूकः	*	१५
ककुभः	*	१५
आम्रः	२५४	१५
जम्बूः	२५५	१५
काकजम्बूः	२५६	१५
प्रियालः	२५७	१५
रोहिणी (कट्फलः)	२५८	१६

Digitization by Arya Samaj Charitable Foundation, Chennai

वञ्जुलः	२५९	१६
कदम्बः	*	१६
बदरी	२६०	१६
तिन्दुकी	२६१	१६
न्यग्रोधादिगणोक्तद्रव्याणां गुणकर्मनिर्देशः	२६२	१६
गुडूची	*	१६
निम्बः	*	१६
कुस्तुम्बुरु (धान्यकम्)	२६३	१६
चन्दनम्	*	१६
पद्मकम्	*	१६
गुडूच्यादिगणोक्तद्रव्याणां गुणकर्मनिर्देशः	२६४	१६
उत्पलम्	२६५	१७
रक्तोत्पलम्	२६६	१७
कुमुदम्	२६७	१७
सौगन्धिकम्	२६८	१७
कुवलयम्	२६९	१७
नलिनम्	*	१७
पुण्डरीकम्	२७०	१७
मधुकम्	*	१७
उत्पलादिगणोक्तद्रव्याणां गुणकर्मनिर्देशः	२७१	१७
मुस्ता	*	१८
हरिद्राद्वयम्	*	१८
त्रिफला	*	१८
कुष्ठम्	*	१८
हैमवती	२७२	१८
पाठा	*	१८
कटुरोहिणी	*	१८
शार्ङ्गेष्टा	*	१८
अतिविषा	*	१८
द्रमिडी	*	१८

Digitization by Arya Samaj Charitable Foundation, Chennai

मुस्तादिगणोक्तद्रव्याणां गुणकर्मनिर्देशः	२७३	९८
हरीतकी	*	९८
आमलकम्	*	९८
विभीतकम्	*	९८
त्रिफलाया गुणकर्मनिर्देशः	२७४	९८
एरण्डः	*	९९
बृहतीद्वयम्	*	९९
पृथक्पर्णी	*	९९
सालपर्णी	*	९९
बिल्वः	*	९९
अग्निमन्थः	*	९९
टुण्टुकः	*	९९
काश्मरी	*	९९
पाटला	*	९९
विदारी	*	९९
सारिवा	*	९९
हरिद्रा	*	९९
गुडूची	*	९९
अजशृङ्गी	*	९९
करमर्दी	२७५	१००
श्वदंष्ट्रा	*	१००
गृध्रनरवी	२७६	१००
कुशः	*	१०१
काशः	*	१०१
नलः	*	१०१
दर्भः	*	१०१
गुण्ठवः	*	१०१
पञ्चपञ्चकान्तर्गतानां द्रव्याणां गुणकर्मनिर्देशः	२७७	१०१
पूर्वोक्तगणानां पश्चाद् विस्तरस्य प्रतिज्ञा	२७८	१०१
गणानां प्रयोगसिद्धान्तः	२७९	१०१

Digitization by Arya Samaj Charitable Foundation, Chennai

द्वात्रिंशद्गणानां संकेतः	२८०	१०१
प्रकीर्णद्रव्याणां पर्यायकथनारम्भः	२८१	१०२
वातङ्गिनी	२८१	१०२
श्वेतकाम्बोजिका	२८२	१०२
कृष्णकाम्बोजी	२८३	१०२
मधूलिकः	२८४	१०२
बिम्बीतकः	२८५	१०२
रोहीतकः	२८६	१०२
शाल्मलीवेष्टकः	२८७	१०२
पारिभद्रः	२८८	१०२
वंशः	२८९	१०३
कूष्माण्डकः	२९०	१०३
शमी	२९१	१०३
कुटजी	२९२	१०३
सरला	२९३	१०३
नीलिका	२९४	१०३
दधिल्लिका	२९५	१०३
जीमूतकः	२९६	१०४
लम्बा	२९७	१०४
धामार्गवी	२९८	१०४
मृगादनी	२९९	१०४
काकोदुम्बरिका	३००	१०४
अक्कोलः	३०१	१०४
शेलुः	३०२	१०४
शतपुष्पा	३०३	१०४
नीपः	३०४	१०५
कोविदारः	३०५	१०५
आटरूषः	३०६	१०५
पयस्या	३०७	१०५
धनुवृक्षः (धन्वनः)	३०८	१०५

Digitization by Arya Samaj Charitable Foundation, Chennai

बला	३०९	१०५
महाबला	३१०	१०५
पिण्डीतकः (वराहः)	३११	१०५
कालपिण्डीतकः	३११	१०५
महापिण्डीतकः	३११	१०५
मधुपिण्डीतकः	३११	१०५
श्वेतपिण्डीतकः	३१२	१०६
स्नेहपिण्डीतकः	३१३	१०६
अवल्गुजा	३१४	१०६
सिद्धकः	३१५	१०६
नीलसिन्दुवारः	३१६	१०६
सिध्रकम्	३१७	१०६
चक्रमर्दः	३१८	१०६
अरिमेदः	३१९	१०६
हरिद्रकः	३२०	१०६
कार्पासी	३२१	१०७
कपित्थः	३२२	१०७
अश्मन्तकः	३२३	१०७
अम्लाश्मन्तकः	३२४	१०७
पुष्पिकावाक्यम्	ॣ	१०७
लिपिकालसूचकं पद्यम्	३२५	१०७

।। शश्वच्छुभं भूयादिति वाक्यम् ।।

३) परिशिष्टखण्डः

१. सौश्रुतनिघण्टुग्रन्थे वर्णितानां द्रव्याणां वर्णानुक्रमेण विवरणम् १११-१२८

२. सौश्रुतनिघण्टुग्रन्थे वर्णितानां द्रव्यपर्यायाणां वर्णानुक्रमेण सूची १२९-१६०

३. ग्रन्थसम्पादनक्रमे सहायकानां सन्दर्भग्रन्थानां विवरणम् १६१-१६४

Digitization by Arya Samaj Charitable Foundation, Chennai

ॐ

उपोद्घातः

१. प्रस्तावना –

अस्मिन् जगति सर्वेषां प्राणिनामभीष्टं सुखमारोग्याधीनमस्ति । तच्चारोग्यं धर्मार्थकाममोक्षाख्याणां चतुर्णां पुरुषार्थानां मूलमप्यस्ति । तस्य प्राप्तिश्चायुष्याणां द्रव्याणां सेवनेनाहितानां द्रव्याणां परिहारेण च भवितुं शक्नोति । हितानामायुष्याणां तथाहितानामनायुष्याणाञ्च द्रव्याणां परिज्ञानमायुर्वेदतो भवति ।[१]

आयुर्वेदे तथाविधं द्रव्याणां हिताहितत्वप्रतिपादकं तेषां स्वरूप-गुण-कर्मादिबोधकमङ्गं यत् सम्प्रति द्रव्यगुणविज्ञानमिति प्रसिद्धम्, तदाधाराः मूलरूपेण संहिताग्रन्था एव सन्ति ।[२] परं प्राचीनकालादेव द्रव्याणां वर्णनानि निघण्टुशब्देन व्यवह्रियमाणानि दृश्यन्ते । निघण्टुरहिता वैद्या हास्यभाजनं भवन्तीति विद्वांसः समामनन्ति ।[३]

निघण्टुशब्दस्य निरुक्तिर्विद्वद्भिर्बहुधा निर्दिष्टा । तद् यथा– वाचस्पत्ये – 'एकार्थवाचिनां पर्यायशब्दानां संग्रहो यत्र प्रायेणेपदिश्यते तत्र निघण्टुशब्दः' इति निर्दिष्टम् । निघण्टुशेषव्याख्यात्रा श्रीबल्लभगणिना 'नितरां घण्ट्यन्ते एकत्र भाव्यन्ते शब्दा अनेनेति निघण्टु :' इति निगदितम् । निघण्टुः, निगमः, निरुक्तम् एते समानार्था अङ्गीक्रियन्ते । तत्रापि निघण्टुशब्दः केवलं शब्दानां संग्रहे प्रयुज्यते । निघण्टुग्रन्थे सङ्कलितानां पदानां गूढा अर्था निरुक्तेन निर्दिश्यन्ते ।[४] 'एतेन निरुक्तापेक्षया निघण्टूनां

---

१. *(तत्रायुर्वेदयतीत्यायुर्वेदः, कथमिति चेदुच्यते, स्वलक्षणतः, सुखासुखतो हिताहिततः प्रमाणाप्रमाणतश्च, यतश्चायुष्याण्यनायुष्याणि च द्रव्यगुणकर्माणि वेदयत्यतोऽप्यायुर्वेदः । – च.स.., सू.३०/३० ।)*

२. *(औषधं ह्यनभिज्ञातं नामरुपगुणैस्त्रिभिः । विज्ञातं चापि दुर्युक्तमहितायोपपद्यते ।। – च.सं., सू. १/१२३ ।)*

३. *निघण्टुना विना वैद्यो विद्वान् व्याकरणं विना । आयुधेन विना योद्धा त्रयो हास्यस्य भाजनम्।। – रा.नि. पृ ३२० ।*

४. *'निगूढा अर्था उच्यन्ते अनेन तन्निरुक्तम् ।" एकैकस्य पदस्य सम्भाविता अर्था यत्र निश्शेषेण उच्यन्ते तन्निरुक्तम् ।" इति वेदभाष्ये सायणः । "ते निघण्टव एव सन्तो निगमनान्निघण्टव उच्यन्त इति औपमन्यवः ।" इति यास्कोद्धृतं वाक्यम् ।*

द्रष्टव्यम् – The Nighantus of Ayurveda, Dr. D.S. Lucas & Prof. P.V. Sharma, National Medical Journal, September, 1970.

Digitization by Arya Samaj Charitable Foundation, Chennai

पूर्ववर्त्तित्वं व्यज्यते ।

एकार्थवाचिनां शब्दानां प्राचीनेऽभिधेये निघण्टुशब्दे सत्यपि परतस्तत्कृते संग्रहः, कोशः, इत्येतान्यभिधानानि बहुशः प्रचलितानि । परमायुर्वेदे आहारद्रव्याणा-मोषधद्रव्याणानामन्येषां च पदार्थानां नाम्नां विरचिताः संग्रहा अद्य यावन्निघण्टुशब्देन व्यवह्रियमाणास्तां परम्परामनुवहन्ति ।

वेदाङ्गभूतं निरुक्तं तन्मूलं निघण्टुरित्येतद्द्वयं द्रव्यगुणविज्ञानस्य प्राचीनतमं बीजमास्ते । निघण्टुग्रन्थे भावानां वर्णनं पर्यायैर्भवति । पर्यायैः भावानां वर्णनस्य परम्परा संहितासु तदनन्तरं च सततं प्रवाहिताऽसीत् । एतन्निदर्शनं चरकसंहितादिग्रन्थेषु बहुधा दृश्यते । तद् यथा –

"इह खलु हेतुर्निमित्तमायतनं कर्ता कारणं प्रत्ययः समुत्थानं निदानमित्यनर्थान्तरम् ।" (च.सं., नि. १/३) ।

चिकित्सितं व्याधिहरं पथ्यं साधनमौषधम् ।
प्रायश्चित्तं प्रशमनं प्रकृतिस्थापनं हितम् ।।
विद्याद् भेषजनामानि" (च.सं., चि. १/३)।
तदेव व्यक्ततां यातं रूपमित्यभिधीयते ।
संस्थानं व्यञ्जनं लिङ्गं लक्षणं चिह्नमाकृतिः ।। (अ.हृ.नि., १/५)

अनन्तरं द्रव्याणां पर्यायैः सह तेषां गुणकर्मणोरपि वर्णनं क्रमशो वृद्धिमभजत्। तेन निघण्टूनां विषयविस्तरः संप्रवृत्तः । इत्थं द्रव्यगुणविज्ञानस्य वाङ्मयं द्विविध-मुपलभ्यते । एकस्मिन् केवलं द्रव्याणां पर्याया एव वर्ण्यन्ते, तत्र गुणकर्मणां पृथङ्निरूपणं न विधीयते, यद्यपि पर्यायैस्तद्गुणाः व्यज्यन्ते । तादृग् वाङ्मयं सम्प्रति सौश्रुतनिघण्टुः, अष्टाङ्गनिघण्टुः, पर्यायरत्नमाला, सिद्धसारनिघण्टुः, हृदयदीपकश्चेत्यादिनिघण्टुषु समुपलभ्यते । एतेषु निघण्टुषु सौश्रुतनिघण्टुः, सिद्धसार निघण्टुश्चेतौ क्रमेण सुश्रुतसंहितायाः सिद्धसारसंहितायाश्च परिशिष्टरूपेण निबद्धौ दृश्येते।

द्वितीयं वाङ्मयं तदस्ति यत्र द्रव्याणां पर्यायैः सह गुणकर्माण्यपि पृथङ् निर्दिश्यन्ते । यथा- धन्वन्तरिनिघण्टुः, मदनपालनिघण्टुः, भावप्रकाशनिघण्टुश्चेति। चरकसुश्रुतसंहितायोः संक्षेपेण विद्यमानं गुणकर्मवर्णनमष्टाङ्गसंग्रहे विधिवत् विस्तरं भजन्निरीक्ष्यते ।

Digitization by Arya Samaj Charitable Foundation, Chennai

सौश्रुत-निघण्टुः

सौश्रुतनिघण्टुग्रन्थे सुश्रुतसंहितायाः सूत्रस्थानस्याष्टत्रिंशत्तमे द्रव्य-संग्रहणीयाध्याये विदारिगन्धादिगणादारभ्य तृणपञ्चमूलगणं यावत् पठितानां द्रव्याणां तदवशिष्टानामाद्याध्यायवर्णितद्रव्याणाञ्च पर्यायाः वर्णिताः सन्ति । अष्टाङ्गनिघण्टुग्रन्थे हृदयदीपके चाष्टाङ्गसंग्रहेऽष्टाङ्गहृदये च पठितानां गणोक्तानामन्येषाञ्चावशिष्टद्रव्याणां पर्यायाः विलसन्ति । एवमेव सिद्धसारसंहिताया द्वितीये द्रव्यगणाध्याये पठितानां द्रव्याणां पर्यायाः सिद्धसारनिघण्टुग्रन्थे सन्निविष्टा उपलभ्यन्ते ।

२. सौश्रुतनिघण्टुग्रन्थसङ्केतः

सौश्रुतनिघण्टुग्रन्थस्यास्तित्वविषये प्रथमः सङ्केतो नेपालराजगुरुणा हेमराज-शर्मणा स्वलिखिते काश्यपसंहिताया उपोद्घाते विहितः परं राजगुरुणा तस्य ग्रन्थस्य नामस्वरूपादि विषये पूर्णं विवरणं कुत्रापि नोद्घाटितम् ।[५]

तद्वचनमवलम्ब्याचार्येण प्रियव्रतशर्मणा अष्टाङ्गनिघण्टुग्रन्थभूमिकायां अनन्तरं 'आयुर्वेदका वैज्ञानिक इतिहास' इत्याख्ये स्वरचिते ग्रन्थे च तद्विषये सङ्केतो विहितः, द्रव्यगुणविज्ञानस्य प्राचीनग्रन्थेषु तस्य संहितोत्तरनिघण्टुनाम्ना सन्निवेशश्च विहितः ।[६]

३. सौश्रुतनिघण्टुग्रन्थप्राप्ति :-

इत्थं नेपालदेश एवोपलभ्यमानो महत्त्वपूर्णो ग्रन्थः सौश्रुतनिघण्टुरस्तीति तज्जिज्ञासायां प्रवृत्तायां विद्वद्वरस्य डा. लोकेन्द्रमानसिंहमहोदयस्य निर्देशानुसारं राष्ट्रियाभिलेखालये उपलभ्यमानानां सुश्रुतसंहिताग्रन्थानामन्वेषणक्रमे प्रथममेकस्मिन् ग्रन्थे सौश्रुतनिघण्टुभागो ग्रन्थान्ते आसादितः । पश्चात् तत्रोपलब्धानां ग्रन्थानां सूच्या अवलोकने चतुर्णां हस्तलिखितसुश्रुतग्रन्थानां विद्यमानत्वं विदितम् । तेषां सर्वेषां नेपाल-

---

५. *"परं मत्सकाशस्थे ६३३ नेवारसंवल्लिखिते ताडपत्रीये सुश्रुतपुस्तके पुष्पिकायां पूर्वभागे 'सुश्रुते शल्यतन्त्रे' इति, उत्तरतन्त्रान्ते "इतिसौश्रुते महोत्तरतन्त्रे चतुःषष्टितमोऽध्यायः, अतो निघण्टुर्भविष्यति इति, तदुत्तरगते निघण्टुभागे समाप्ते 'सौश्रुत्यां संहितायां महोत्तरायां निघण्टुः समाप्तः' इति लेखो दृश्यते ।" - काश्यपसंहिताया उपोद्घातः पृ. ११२ ।*

६. *"Pt. Hemraj Sharma in his introduction to the Kashyapa Samhita has said that a Ms. Of sushrut has the indication of having a Nighantu portion in its appendix." - Introduction, page VII.*
द्रष्टव्य - आयुर्वेदका वैज्ञानिक इतिहास, पृ. ३९२ ।

Digitization by Arya Samaj Charitable Foundation, Chennai

जर्मन-हस्तलिखित-ग्रन्थ-संरक्षण-परियोजनया सूक्ष्मच्छविचित्रं च गृहीतमित्यपि ज्ञातम्।

इत्थमनुसन्धानक्रमे प्रवर्तमाने विद्वद्वरस्य ज्ञानमणिनेपालमहोदयस्य कथनेनान्यदपि प्राचीनतमं सुश्रुतसंहितायाः ताडपत्रे लिखितं पुस्तकं केशरपुस्तकालये विद्यमानं विदितम् । तस्य च तत्रत्यपुस्तकाध्यक्षस्य श्रीपुरुषोत्तमघिमिरेमहोदयस्य सौजन्याल्लब्धे निरीक्षणावसरे निरीक्षणक्रमे तत्रत्यग्रन्थेऽपूर्णेऽपि सौश्रुतनिघण्टुभाग आसादितः । इत्थं नेपालदेशे अस्माभिः सुश्रुतसंहितायाः हस्तलिखितायाः पञ्चसङ्ख्याः पाण्डुलिपयः सम्प्राप्ताः, तेषु त्रिषु ग्रन्थेषु सौश्रुतनिघण्टुभागश्चोपलब्धः । तेषां ग्रन्थानां विवरणमत्रोपस्थाप्यते क्रमेण –

(१) राष्ट्रियाभिलेखालये उपलब्धेषु चतुःसङ्ख्येषु सुश्रुतसंहिताग्रन्थेष्वेकमेव पूर्णप्रायमास्ते । अन्यानि त्रीणि पुस्तकानि अपूर्णानि सन्ति । तत्र प्रथमस्य पूर्णप्रायस्य ग्रन्थस्य राष्ट्रियाभिलेखालयस्य ग्रन्थसूच्यां क्रमसङ्ख्या ३३३, विषयसङ्ख्या च- आयुर्वेदः ७६ इत्यस्ति । ग्रन्थोऽयं ताडपत्रे नेवारिलिप्यां लिखितो वर्तते । अस्मिन् ग्रन्थे पत्राणां सङ्ख्या ४३५, तेषामाकारश्च ३४×५ से.मी. परिगितो निर्दिष्टः । एतदन्ते सौश्रुतनिघण्टुर्वर्तते । अस्य सूक्ष्मच्छविचित्रसङ्ख्या B29/9 इत्यस्ति ।

एतद्ग्रन्थारम्भे – '**ॐ नमो धन्वन्तरये । अथातो वेदोत्पत्तिमध्यायं व्याख्यास्यामः**' इति वाक्यं विद्यते । ग्रन्थस्यादितः ४०० पत्राणि यावत् प्रतिपत्रं पत्रसङ्ख्या लिखिता दृश्यते । तदन्तरं पत्रेषु सङ्ख्या नास्ति । तत्र ग्रन्थगतानामध्यायानां सूची वर्तते । तेषामवसाने ९ पत्रेभ्यः परं सौश्रुतनिघण्टुभागः प्रारभ्यते । ततः २५ पत्राणि यावन्निघण्टुः प्राप्यते । तदवसाने '**वर्षेऽनलाङ्करसगे०**' इति पद्यं वर्तते । ततश्च शश्वच्छुभं भूयादिति वाक्येन ग्रन्थः समाप्यते ।

अस्मिन् ग्रन्थे सुश्रुतसंहितायाः सूत्रस्थानस्याष्टत्रिंशत्तमो द्रव्यसंग्रहणीयाध्यायश्च पूर्णतयोपलब्धः । अस्माकं ग्रन्थसम्पादनक्रमे सौश्रुतनिघण्टुमूलपाठ एतद्ग्रन्थ-मनुसृत्यैव विहितः । एतस्मिन् अक्षराणि सुन्दराणि स्पष्टानि च सन्ति प्रायेण । एतस्यात्र सङ्केतः – सु.सं.,ह.(क), सौ.नि.,ह. (क) इति विहितः ।

(२) राष्ट्रियाभिलेखालयस्थं द्वितीयं सुश्रुतसंहिताया हस्तलिखितं पुस्तकं तत्रत्यग्रन्थसूच्यां – पं. ३३४ सङ्ख्याङ्कितं विद्यते । तस्य विषयसङ्ख्या – आयुर्वेदः ७७ इत्यस्ति। एतत् पुस्तकं ताडपत्रेषु नेवारिलिप्यां लिखितमस्ति । अस्मिन् पत्राणां सङ्ख्या ७१ वर्तते। पत्राणामाकारः- २९.५×३.५ से.मी. परिमितो निर्दिष्टः । एतस्य

Digitization by Arya Samaj Charitable Foundation, Chennai

सूक्ष्मच्छविचित्रसङ्ख्या B 30/15 इत्यस्ति ।

अपूर्णेऽस्मिन् ग्रन्थे सुश्रुतसंहितायाः उत्तरतन्त्रभाग एव विशेषेण वर्तते । अन्ते सुश्रुतनिघण्टुश्चापूर्ण उपलभ्यते । हस्तलिखितसुश्रुतसंहितायाः 'क' ग्रन्थे विद्यमाननिघण्टुग्रन्थेन सह तुलनायामत्र ११।। पत्राणि न्यूनानि सन्ति । एतस्योपलब्धांशे कानिचित् महत्त्वपूर्णानि तथ्यानि दृश्यन्ते–

(।) अत्र काश्यपसंहिताया उपोद्घाते नेपालराजगुरुणा हेमराजशर्मणोद्धृतं वाक्यमविकलमुपलभ्यते – "**इति सौश्रुते महोत्तरतन्त्रे चतुःषष्टितमोऽध्यायः समाप्तः । अतो निघण्टुर्भविष्यति ।**" इति ।

(।।) एतस्योपलब्धांशे अक्षराणि प्रायेण हस्तलिखितसुश्रुतसंहितायाः 'क' ग्रन्थेन समानानि सन्ति । उभयोरेव प्रतिपृष्ठं पङ्क्तीनां सङ्ख्या, तासु पङ्क्तीनां सङ्ख्या, तासु पङ्क्तिषु वर्णानां सङ्ख्या, मूलपाठे विलुप्तांशाः, संशोधनानि च समानानि सन्ति । क्वचिदेवाल्पो भेदः पाठसंशोधने अक्षराणां स्पष्टत्वविषये च दृश्यते । एष ग्रन्थः 'क' ग्रन्थापेक्षया प्राचीनः प्रतीयते ।

(।।।) अस्मिन् ग्रन्थे सुश्रुतसंहिताया उत्तरतन्त्रे चतुःषष्टिपर्यन्ता अध्याया एवासन् इति निघण्टुपूर्वं पठितेन समाप्तिवाक्येन तदादिना पद्येन च सूचितमस्ति । तद्यथा –

"अध्यायानाञ्चतुः[७] षष्ट्या ग्रथितार्थपदक्रमम् ।

एतदेव विशेषेण तन्त्रमुत्तरमृद्धिमत् ।।....इति सौश्रुते महोत्तरतन्त्रे चतुःषष्टितमोऽध्यायः समाप्तः ।।"[८] इति ।

एतद्ग्रन्थसङ्केतोऽस्मिन्नुपोद्घाते सौश्रुतनिघण्टुटिप्पण्यां च– सु.सं.,ह.(ग)/ सौ.नि.,.ह. (ग) इति वर्तते ।

(३) राष्ट्रियाभिलेखालयस्थयोरवशिष्टयोर्द्वयोः सुश्रुतसंहिताग्रन्थयोर्विवरण-मतः परं प्रस्तूयते –

(क) हस्तलिखितग्रन्थक्रमसङ्ख्या–प्र. १०७९ । विषयसङ्ख्या– आयुर्वेदः ७५ । ग्रन्थकर्ता– दिवोदासः[९] । ताडपत्राणि । नेवारी लिपिः । प्रतिपृष्ठं पङ्क्तिसङ्ख्या– ७ । पत्राकारः ५६×५ से.मी. । ग्रन्थसङ्ख्या ३६०० । पत्रसङ्ख्या–६५ । अपूर्णा ।

---

७. *"अध्यायानान्तु षट्षष्टया' – सु.सं., मु.उ. ६६/१५ ।*

८. *'इति सुश्रुतसंहितायामुत्तरतन्त्रे दोषभेदविकल्पो नाम षट्षष्टितमोऽध्यायः।' –तत्रैव, उ.६६ ।*

९. *प्रमादात् सुश्रुतस्थाने दिवोदासः सूच्यां लिखितः ।*

Digitization by Arya Samaj Charitable Foundation, Chennai

सूक्ष्मच्छविचित्रसङ्ख्या A45/5 ।

एतस्मिन् ग्रन्थे विद्यमाना नेवारी लिपिः प्राचीना वर्तते । ग्रन्थाद् बहिःस्थिते विवरणपत्रे पत्रसङ्ख्यायां ६५ सङ्ख्यान्ते ३३ इत्युल्लेखेनैतस्मिन् कश्चनांशः पश्चात् संयोजित इत्यनुमीयते ।

अस्मिन् ग्रन्थे आदौ – 'नमो धन्वन्तरये । नमो नागार्जुनाय' इति वाक्यद्वयं वर्तते । अत्र सुश्रुतसंहितायाः सूत्रस्थानमेव प्रायेणोपल्लभ्यते । सूत्रस्थानस्याष्टत्रिंशत्तमो द्रव्यसंग्रहणीयाध्यायः पूर्णः प्राप्यते । अस्य ग्रन्थस्य निघण्टुपाठसंशोधनक्रमे-ऽस्माभिरुपयोगो विहितः । तेषु स्थलेषु अस्य सङ्केतः – सु.सं., ह. (घ) इति विहितः ।

(ख) हस्तलिखितग्रन्थक्रमसङ्ख्या– प्र. ११४६ । विषयसङ्ख्या– आयुर्वेदः ४५३। ग्रन्थकारः – सुश्रुतः । मध्यदेशीयं पत्रम् । देवनागरीलिपिः पत्राकारः ११-३/८×४-१/२ इञ्च । ग्रन्थसङ्ख्या-१८९५ । पत्रसङ्ख्या- ६७ । आद्यन्तरहिता । सूक्ष्म-च्छबिचित्रसङ्ख्या – A224/9 ।

अपूर्णस्यास्य ग्रन्थस्योपलब्धांशे प्रथमे पत्रे "**विंशतिः शस्त्राणि भवन्ति।**" इति वाक्यं विद्यते। अन्तिमपत्रे च "**क्षारवल्ला विडङ्गानि**" इत्यन्तो भागो दृश्यते। उपलब्धांशे ७२-७५ सङ्ख्याङ्कितेषु चतुर्षु पत्रेषु सुश्रुतसंहितायाः सूत्रस्थानस्याष्टत्रिंशत्तमो द्रव्यसंग्रहणीयाध्यायः पूर्ण एवोपलभ्यते । एतस्मिन्नक्षराणि शोभनानि सुपाठ्यानि च सन्ति परं पाठो बहुषु स्थानेष्वशुद्धः प्रतीयते । कश्चनांशः सुश्रुतसंहितायाः हस्तलिखितमुद्रितग्रन्थापेक्षयाऽधिको विशिष्टश्च दृश्यते । सौश्रुतनिघण्टुपाठालोचने एतस्यापि समीक्षादृष्ट्योपयोगः सञ्जातः । विशिष्टस्थलेषु एतत्सङ्केतः – सु.सं.ह.(ङ) इति सौश्रुतनिघण्टुटिप्पण्यां विहितः ।

(४) केशरपुस्तकालये प्राप्तं सुश्रुतसंहितापुस्तकं पञ्चमं वर्तते । तस्यापि नेपाल-जर्मन-हस्तलिखितग्रन्थसंरक्षणपरियोजनाया सूक्ष्मच्छविचित्रं गृहीत्वा संरक्षितमस्ति । तस्य राष्ट्रियाभिलेखालये प्राप्तं विवरणमेवमस्ति-

ग्रन्थालयः केशर पुस्तकालय, काठमाण्डू । हस्तलिखितग्रन्थक्रमसङ्ख्या-६९९ । विषयसङ्ख्या- आयुर्वेदः ७९६ । ग्रन्थनाम-सौश्रुतिसंहिता-सहोत्तर । महोत्तर तन्त्र, ग्रन्थकर्ता – ....। पत्रसङ्ख्या-१२७ । ताडपत्रे लिखितः, आकारः -५३.५×४.४ से.मी. । गुप्त (कुटिला) लिपिः । सूक्ष्मच्छविचित्रसङ्ख्या- C80/7 छविचित्र-

Digitization by Arya Samaj Charitable Foundation, Chennai

सौश्रुत-निघण्टुः

ग्रहणदिनाङ्कः – १/९/१९७६ । विशेष :– ताडपत्रेषु लिखितोऽयं ग्रन्थः कृमिजुष्टः, धूम्रघर्षणाभ्यां क्षतः छिन्नश्च । अन्तिमपत्रे लिखिता पत्रसङ्ख्या २१८ । नवमपत्रान्तरं पत्राणां सङ्ख्यासन्निवेशः त्रुटिपूर्णः ग्रन्थकालः – मानदेवसंवत् – ३०१ ।

एतस्मिन् ग्रन्थे ग्रन्थारम्भे – **'नमः कमलहस्ताय। अथातो वेदोत्पत्तिमध्यायं व्याख्यास्यामः'** इति वाक्यं वर्तते । ग्रन्थान्ते च –

''सहोत्तरं त्वेतदधीत्य तन्त्रं
स्वायंभुवं वै विधिना तु कीर्तितम् ।
न हीयतेऽर्थान्मनसाऽभ्युपेता-
देवं वचो ब्राह्ममतीव सत्यम् ।।''

इति पद्यं, ततश्च 'मूत्रदोषो मूत्रघातो०', 'स्वस्थरक्षाविधानञ्च०' इति पद्यद्वयमस्ति । अनन्तरं च – **''समाप्तञ्चेदं महोत्तरतन्त्रमित्यतो निघण्टुर्भविष्यति ।''** वाक्यं वर्तते । ततश्च –

''राज्ञि श्रीमानदेवे पृथुसितयशसि प्रोद्यदिन्दुप्रकाशे
काले पुण्यार्जनस्य सकलजनमनोह्लादिरम्ये वसन्ते ।।
वर्षे चैकोत्तरेऽस्मिन् त्रितयशतगते माधवे मासि शुक्ले
सप्तम्यां पुष्यऋक्षे दशशतकिरणे वासरे सिद्धयोगे ।''

इत्यादीनि पद्यानि सन्ति ।

अस्मिन् ग्रन्थे सौश्रुतनिघण्टुपाठः 'क' ग्रन्थापेक्षया किञ्चिदूनः, 'ग' ग्रन्थापेक्षया-ऽधिकश्च वर्तते । सूत्रस्थानादारभ्य सर्वेषां स्थानानां सामग्री खण्डितरूपेण लभ्यते। सुश्रुतसंहितायाः सूत्रस्थानस्याष्टत्रिंशत्तमो द्रव्यसङ्ग्रहणीयाध्यायो नासाद्यते । सौश्रुतनिघण्टुमूलपाठस्य पाठशुद्धौ विविधस्थलेषु एतत्साहाय्यमुपकारितयोपस्थितम्। अत एव एतत्सङ्केतोऽत्र सौ.नि, ह. (ख) इति सर्वत्र विहितः ।

एष ग्रन्थस्ताडपत्रे कुटिलालिप्यां लिखितः ग्रन्थलेखनवर्षसङ्ख्यायाः स्पष्टो-ल्लेखेन युतश्चेति नेपालदेशे विद्यमानेषु प्राचीनग्रन्थेषु महत्त्वपूर्णोऽस्तीति बहुभिरि-तिहासविद्भिः स्वग्रन्थेष्वस्य पुष्पिकाया उद्धरणेन प्रमाणीकृतम् ।[१०]

---

१०. द्रष्टव्यौ – लिच्छविकालको अभिलेख– धनवज्र वज्राचार्य, पृ. ५९९ । लिच्छविसंवत्को निर्णय – पं. नयराज पन्त, पृ. २६७, २६८ ।

Digitization by Arya Samaj Charitable Foundation, Chennai

४. उपलब्धानां सौश्रुतनिघण्टुपाण्डुलिपीनां तुलनात्मकं पाठाध्ययनम् -

(१) हस्तलिखितयोः द्वयोः सुश्रुतसंहिताग्रन्थयोः

(ख) (ग) ग्रन्थान्ते निघण्टुप्रारम्भसूचकं वाक्यं दृश्यते-

(।) ''मूत्रदोषो मूत्रघातो योन्यमानुष एव च ।
अपस्मारोन्मादकश्चैव रसभेदस्तथैव च ।।
स्वस्थरक्षाविधानञ्च तन्त्रयुक्तिश्च दोषभित् ।
इत्येभिर्दशकं प्रोक्तं पुनः कायचिकित्सिते ।।
समाप्तञ्चेदं महोत्तरतन्त्रमित्यतो निघण्टुर्भविष्यति ।''

– सु.सं.ह. (ख)

(।।)..........................
अपस्मारोन्मादकश्चैव रसभेदस्तथैव च ।।
स्वस्थरक्षाविधानञ्च तन्त्रयुक्तिश्च दोषभित् ।
इत्येभिर्दशकं प्रोक्तं पुनः कायचिकित्सिते ।।
इति सौश्रुते महोत्तरतन्त्रे चतुःषष्टितमोऽध्यायः समाप्तः ।
अथ निघण्टुर्भविष्यति ।।''[१२] – सु.सं.ह.(ग)

(२) सुश्रुतसंहितायाः त्रिष्वपि ग्रन्थेषु निघण्टुग्रन्थस्यारम्भः पत्रस्यादिपङ्क्तेरेव विहितः । पूर्वनिर्दिष्टं 'अतो निघण्टुर्भविष्यति' इत्यात्मकं निघण्टुप्रारम्भसूचकं वाक्यं (क) (ग) ग्रन्थयोः पत्रस्यादौ प्रथमपङ्क्ताववसितं दृश्यते । तत्र केवलं 'ष्यति ।' इत्येव दृश्यते । ततः परं तस्मिन् पत्रे किमपि लिखितं नास्ति । सर्वं पत्रं रिक्तमेवास्ते।

(३) त्रिष्वपि हस्तलिखितग्रन्थेषु निघण्टुप्रारम्भे – 'ॐ नमः सर्वज्ञायानुत्तर-वैद्यराजाय' इति वाक्यं वर्तते ।[१३] तदनन्तरम् -

---

१२. *अत्र निर्दिष्टं पद्यद्वयं मुद्रिते सुश्रुतसंहिताग्रन्थे ग्रन्थान्ते नोपलभ्यते । परं सूत्रस्थानस्याध्ययन-सम्प्रदानीयाख्ये तृतीयेऽध्याय एतद्विषयाणां निर्देशः किञ्चित्परिवर्तितरूपेणोपलभ्यते-*

''अमानुषनिषेधश्च तथापस्मारिकोऽपरः ।
उन्मादप्रतिषेधश्च भूतविद्या निरुच्यते ।।
रसभेदाः स्वस्थवृत्तं युक्तयस्तान्त्रिकाश्च याः ।
दोषभेदा इति ज्ञेया अध्यायास्तन्त्रभूषणाः ।।'' – सु.सं., (मु.), सू.३/४१-४२

१३. सर्वज्ञाय नमस्कारनिर्देशः सिद्धसारसंहितायाः प्रारम्भे 'नमः सर्वज्ञाय' इति, अष्टाङ्गनिघण्टुप्रारम्भे 'सर्वज्ञाय नमस्कृत्य' इति वतति । अष्टाङ्गहृदये 'अपूर्ववैद्याय' वतति । अत्रानुत्तरो वैद्यराजः, इति विशेषः ।

Digitization by Arya Samaj Charitable Foundation, Chennai

''हिमवच्छैलकुञ्जस्थं सुमनस्कं महौजसम् ।
शीर्णपर्णफलाहारमायुर्वेदविशारदम् ।।
कृताग्निकृत्यमासीनं पूतवल्कलधारिणम् ।
धन्वन्तरिन्धर्मभृतां वरिष्ठममृतोद्भवम् ।
सुश्रुतप्रमुखाः शिष्याः पप्रच्छुर्भिषजो भृशम् ।। इति ग्रन्थः प्रसरति ।

(४) सुश्रुतसंहितायाः हस्तलिखिते 'क' ग्रन्थे आदितोऽवसानं यावत् निघण्टु-पाठः प्रायेणाविकलः प्राप्यते । क्वचिदेव पत्राणां जीर्णतयाः मसीलोपाद्, घर्षणा-द्वाऽक्षराणि लुप्तानि दृश्यन्ते ।

हस्तलिखिते 'ख' सुश्रुतसंहिताग्रन्थे 'क' ग्रन्थापेक्षयाऽपूर्णः 'ग' ग्रन्था-पेक्षयाधिकश्च सौश्रुतनिघण्टुपाठः प्राप्यते । 'ख' ग्रन्थे 'शतावरी सूक्ष्मपत्रा'' (श्लो. १९) इत्यारभ्य 'पाठाम्बष्ठा वनतिक्ता' (श्लो.३९) इत्यन्ताः २० श्लोकाः, 'बहुच्छिद्रा च विज्ञेया' (श्लो.२१२) इत्यारभ्य 'पुन्नागपुष्पमेलादौ' (श्लो. २४४) पर्यन्तो भागश्च नोपलब्धाः । एतेनात्र समग्ररूपेण ३२ श्लोकाःखण्डिताः प्रतीयन्ते ।

हस्तलिखिते 'ग' ग्रन्थे खलु बहूनि पत्राणि न सन्ति । तत्र खण्डिता अनुपलब्धाश्च ग्रन्थांशा इमे सन्ति –

पत्रसङ्ख्या-२-'ह्रस्वगवेधुका' – 'घृतमण्डालसा च सा' (श्लो.१५-३०)
प.सं.६- 'चैव शोभाञ्जनकः' – 'याज्ञेयश्च समं.' (श्लो.७६-८९)
प.सं. ८- 'सर्वभद्रिका' – 'शिरीषपत्रा' – (श्लो. १०४-११९)
प.सं. ९ – 'घोण्टा च विषघ्नी' – 'सिन्दुवारच्छदापि च ।।' (श्लो ११९-१३४)
प.सं. १० – 'नीलमञ्जर्यमरिका' – 'बृषलण्ड' (श्लो. १३४-१४७)
प.सं. ११ – 'फलेति च' – 'नीलतोदा मत्स्यवित्रा' (श्लो. १४७-१६०)
प.सं. १३ क 'वराङ्गञ्च' – 'कुटिलपुष्पिका' (श्लो. १७५-१८२)
प.सं. १४ – 'गौरी योषिद्.' – 'पठिता' (श्लो. १८९-२०३)
प.सं. १५ – 'शब्दैः पर्यायवाचकैः' – 'तुगाक्षीरी वंशभवा' (श्लो.२०३-२१४)
प.स.. १६ – 'वंशिनी तृणकेतुनी' – 'मूलमथापि' (श्लो. २१४-२२७)
प.सं. १७ – 'च। सारिवादिः' – 'कट्फलं लोध्रादौ' (श्लो. २२७-२४२)

एत्रेनात्र सार्धानां दशसङ्ख्यानां पत्राणां (२१ पृष्ठानि) सामग्री खण्डिता प्रतीयते। एतत् तथ्यं तस्य 'क' ग्रन्थेन सह तुलनया ज्ञायते । अनयोर्ग्रन्थयोः अक्षराणि

Digitization by Arya Samaj Charitable Foundation, Chennai

पङ्क्तयः ग्रन्थे विलुप्तांशाश्चोपलब्धांशेषु समानाः सन्ति ।

(५) त्रिष्वपि हस्तलिखितग्रन्थेषु ग्रन्थस्यान्तिमं पद्यं निघण्टुसमाप्तिसूचकं वाक्यं च समानरूपेण प्राप्यते । तद् यथा –

(क) ''द्वितीयोऽश्मन्तकोऽम्लश्च रसेन परिकीर्तितः ।
एतान्येव तु नामानि धीरस्तस्य प्रयोजयेद् ।। इति ।
सौश्रुत्यां संहितायां महोत्तरायां निघण्टुः समाप्तः ।''

– सौ.नि., ह. (क) (ख) (ग) ।

(६) हस्तलिखितसुश्रुतसंहितायाः (क) (ग) ग्रन्थयोः पूर्वोक्तसमाप्ति-वाक्यमनु पद्यमेकं वर्तते –

वर्षेऽनलाङ्करसगे नभकालपक्षे
विश्वे तिथौ दिनकरे दिवसे गुरौ भे ।
धीरो निघण्टुमिह कामलदत्तिरेष
वैद्यो लिलेख असुकोऽमरसिंहको नु ।।

परं (ख) हस्तलिखितग्रन्थे समाप्तिवाक्यान्ते स्थानं रिक्तमस्ति । एतत् पद्यमपि नास्ति । एतेन पद्यमिदं पश्चात् केनापि स्थापितमिति प्रतीयते ।

५. ग्रन्थसम्पादनपद्धतिः –

राष्ट्रियाभिलेखालये विहितसूक्ष्मप्रतिच्छायानां त्रयाणां हस्तलिखितसुश्रुतग्रन्थानां तत आसादितॉंस्त्रीन् प्रतिरूपान् (Reader's Print) अवलम्ब्य तदन्तर्गतः सौश्रुतनिघण्टुमूलपाठः परस्परं तुलनां विधाय संशोध्य चात्र लिखितः । मूलपाठे विद्यमानेषु द्रव्याणां पर्यायेषु यत्र कुत्रापि समुत्पन्ने संशये प्रथमं त्रयाणां हस्त-लिखितग्रन्थानां पाठा अनुसन्धिताः, तेभ्य एव पाठस्य संशोधनं विहितम् । यत्रोक्तग्रन्थैः कार्यं न सम्भावितं तत्रामरकोश–धन्वन्तरिनिघण्ट्वष्टाङ्गनिघण्टु सिद्धसारनिघण्टु–मदनपालनिघण्टु–कैयदेवनिघण्टु–भावप्रकाशनिघण्टु–राजनिघण्टु–वैद्यकशब्द–सिन्धुप्रमुखान् ग्रन्थानवलोक्य बहुसम्मतिं स्वबुद्धिं विद्वत्सम्मतिं च पुरस्कृत्य द्रव्याणां पर्यायाः शुद्धरूपेणोपस्थापिताः सन्ति । तथा संशोधितानां पाठानां सङ्केतश्च तत्र तत्र टिप्पण्यां विहितः । तस्योदाहरणं किञ्चिदत्र प्रस्तूयते –

Digitization by Arya Samaj Charitable Foundation, Chennai

सौश्रुत-निघण्टुः

सु.सं.,सौ.नि.ह.(क) पाठः	संशोधितः पाठः
'गलः करघाटकः'	गालश्चकरघाटकः' (श्लो. ३५)
'कण्टतिक्तमथापि च'	'काण्डतिक्तमथापि च।' (श्लो.५१)
'उदवीर्यश्च कथितश्चिरिबिल्वश्च शब्दितः'	उदकीर्यश्च कथितश्चिरबिल्वश्च शब्दितः' (श्लो. ४९)
'तिक्ष्यवृक्षः'	'तिष्यवृक्षः' (श्लो. ६६)
'नरेन्द्रार्हरणो'	'नरेन्द्रार्हरजो' (श्लो.७१)

तेषु हस्तलिखितग्रन्थेषु बहुषु स्थानेषु व्याकरणनियमदृष्ट्याऽशुद्धयोदृष्टाः। तेषां स्वबुद्ध्याऽसङ्गतत्वं विभाव्य यथोचितं संशोधनं विधाय पाठो निर्धारितः। तत्र संशोधनक्रमे त्रीन् हस्तलिखितग्रन्थानवलोक्य यः सम्भावितः शुद्धपाठ आसादितः स एवात्र मूलपाठे लिखितः त्रिष्वपि ग्रन्थेषु तस्य पाठस्याशुद्धरूपे दृष्टे व्याकरण-नियमानवलम्ब्य संशोधनं विहितम्। तदुदाहरणं यथा-

सौ.नि.ह. (क) ग्रन्थे पाठः	संशोधितः पाठः
'देशभाषांविभागशः'	'देशभाषाविभागशः' (श्लो.७)
'द्रव्याना यः समाख्यातां'	'द्रव्याणां यः समाख्यातो' (श्लो. ११)
'एकैकमौषधस्तेषां'	'एकैकमौषधास्तेषां' (श्लो. १२)
'अभीरु बहुमूला'	'अभीरूर्बहुमूला' (श्लो.१९) इति।

हस्तलिखितसुश्रुतसंहितायाः (क) (ग) ग्रन्थयोः सौश्रुतनिघण्टुपाठे कुत्रचित् स्थानानि रिक्तानि दृश्यन्ते। तथा विधाय तत्र ग्रन्थपाठस्य विलुप्तता सूचिता वर्तते। (ख) ग्रन्थे यद्यपि तेषु स्थानेषु रिक्तत्वं न दर्शितम्, तथापि पद्यस्य पादत्रयमात्र-लब्ध्याऽपूर्णत्वं तत्र स्फुटं व्यज्यते। तादृशेषु स्थलेषु अमरकोशप्रभृतीन् ग्रन्थानवलम्ब्य सति सम्भवे बृहत्त्रय्यां पठितैः शब्दैरेव पादपूर्तिर्विहिता। तस्योदाहरणं यथा -

सौ.नि.,ह.(क) ग्रन्थे पाठः	पादपूर्तियुतः पाठः
'कपोतवङ्का पार्था च.....।'	'कपोतवङ्का पार्था च (रविभक्ता सुवर्चला)। इति (श्लो. ९७)
"कुलीरशृङ्गी चशल्य.....।"	"कुलीरशृङ्गी च मता कर्कटशृङ्गिका तथा" (श्लो.२१३)

Digitization by Arya Samaj Charitable Foundation, Chennai

क्वचित् पुनः त्रिष्वपि हस्तलिखितग्रन्थेषु स्थानं रिक्तं वर्तते । तत्र सति सम्भवे सुश्रुते पठिता द्रव्यपर्यायाः स्थापिताः तदनुपलब्धावन्यनिघण्टुभ्यः पर्याया अन्विष्य सन्निवेशिताः सन्ति ।

क्वचिच्च पाठविषये संशये सत्यपि तत्समाधानाय युक्तियुक्तस्य पाठस्यानवबोधाद् ग्रन्थे लिखितः पाठ एव स्थापितः ।

उपलब्धेषु त्रिषु हस्तलिखितसौश्रुतनिघण्टुग्रन्थेषु 'क' ग्रन्थ एवादितोऽवसानं यावत् पूर्णप्राय आसादित इति हेतोस्तदनुसारमेवात्र मूलपाठस्य लेखनं ग्रन्थान्तरसंवादमाश्रित्य विहितम् । हस्तलिखितग्रन्थेषु पद्येषु सङ्ख्यायाः गणनाम्नाञ्चोल्लेखः मूलपाठादतिरिक्तो नास्ति । तत्र पाठकानां सौविध्यार्थं प्रतिपद्यं सङ्ख्यायाः सन्निवेशोऽत्र विहितः ।

६. **ग्रन्थकर्तृविमर्शः –**

हस्तलिखितयोः सौश्रुतनिघण्टुग्रन्थयोरन्ते विद्यमाने पद्ये 'धीरो निघण्टुमिह कामलदत्तिरेष वैद्यो लिलेख असुकोऽमरसिंहको नु' इति स्थिते कमलदत्तसूनुर्वैद्योऽमरसिंह एतल्लेखकः प्रतीयते । एतत् पद्यं प्राचीनतमे हस्तलिखिते 'ख' सुश्रुतग्रन्थे नास्ति । तत्र खलु सुश्रुतग्रन्थावसाने– 'समाप्तञ्चेदं महोत्तरतन्त्रमित्यतो निघण्टुर्भविष्यति' इति वाक्यं वर्तते । ततः परं श्लोकद्वयमन्यद्वाक्यञ्चदृश्यते –

''राज्ञि श्रीमानदेवे पृथुसितयशसि प्रोद्यदिन्दुप्रकाशे
काले पुण्यार्जनस्य सकलजनमनोह्लादिरम्ये वसन्ते ।
वर्षे चैकोत्तरेऽस्मिन् त्रितयशतगते माधवे मासि शुक्ले
सप्तम्यां पुष्यऋक्षे दशशतकिरणे वासरे सिद्धयोगे ।।
उत्पत्त्याद्यम्बुबेलाकुल विविधरुजाग्राहजुष्टातिरौद्रे
संसारे सागरेऽस्मिन् जगदिदमखिलं ग्लानिनं सम्प्रवीक्ष्य ।
तस्माच्छ्रीहर्षचन्द्रान्निरतिशयघृणाभाविनो मोक्षकामः
प्रीत्या चै......प्रालिखं सुश्रुताख्यम् ।।
श्रीगणदेवदेवकुलदूरीग्वलकनिवासिनो वैद्यवसुवर्मणः
पुस्तकमिदं पठित्वार्थमवगम्य सर्वसत्त्वानामुपदेशं विधातुं

Digitization by Arya Samaj Charitable Foundation, Chennai

प्रतिपादितमतस्तदधिक्रयाभ्यां.......कश्चिद् दातव्यम् ।
यदा चोपक्रियते तदा.....प्रत्यर्पणीयमिति ।''

-सु.स.., ह.(ख) - पत्रसङ्ख्या

अत्रोत्पत्याद्यम्बु० इत्यस्मिन् पद्ये अन्तिमपादस्य खण्डिततया तस्य लेखकस्य नाम तत्र भवितुं सक्नोतीत्यनुमीयते । तदधस्तने वाक्ये 'वैद्यवसुवर्मणः पुस्तकमिदं' इत्युल्लेखेन तस्य पुस्तकस्य वसुवर्मणा कश्चन सम्बन्धः सूच्यते । परं कीदृशः सम्बन्धो ग्रन्थकर्तृरूपो ग्रन्थाधिकारिमात्रो वेति तावता निर्णेतुं न शक्यते ।

नेपालराजगुरुणा हेमराजशर्मणा पुनः काश्यपपसंहितायाः स्वरचित उपोद्घाते सौश्रुतनिघण्टुग्रन्थस्य रचयिता कश्चन सौश्रुताचार्यः सुश्रुतानुयायी निर्दिष्टः-

"सुश्रुतस्य पुनः संस्करणमुपलभ्यतेऽस्माभिरिति बहूनां प्राच्यानां पाश्चात्यानाञ्च विदुषामभिप्रायः । क्वचिदर्वाचीनविषयाणामप्यनुप्रवेशदर्शनेनात्रापि संस्करणलेखनी प्रविष्टा इति ममाप्यभिप्रेतम् । परमेतदीये संस्करणे चरकसंहितायामिव न पौन-रुक्तात्मकं संस्करणं प्रायः ममीक्ष्यते ।

परं मत्सकाशस्थे ६३३ नेवारसंवाल्लिखिते ताडपत्रीये सुश्रुतपुस्तके पुष्पिकायां पूर्वभागे 'सुश्रुते शल्यतन्त्रे' इति,[१४] उत्तरतन्त्रान्ते 'इति सौश्रुते महोत्तरतन्त्रे चतुष्षष्टि-तमोऽध्यायः, अतो निघण्टुर्भविष्यति,[१५] इति, तदुत्तरगते निघण्टुभागे समाप्ते 'सौश्रुत्यां संहितायां महोत्तरायां निघण्टुसमाप्तः'[१६] इति लेखो दृश्यते ।

इदमर्थप्रत्ययान्तेन सौश्रुतशब्देन सुश्रुतग्रन्थस्यापि ग्रहणं सम्भवति, परं पूर्वापरभागयोरेकनिबन्धृभावे एकेनैव रूपेणलेखस्य समुचिततया पूर्वभागे सुश्रुतशब्देन, उत्तरभागे सौश्रुतशब्देन विभिन्नतया निर्देशः पूर्वभागः सुश्रुताचार्यस्य उत्तरभागस्तद्-वंशयस्य सौश्रुताचार्यस्येति बुद्धावारोहयति ।

निघण्टुभागे उपक्रमे दिवोदासोपदेशसम्बन्धस्योल्लेखदर्शनेऽपि मूलाचार्यस्यै-कतया ग्रन्थस्य समूलत्वेन प्रामाण्यविशेषमाधातुं तथा निर्देशस्य सम्भावितया, एतदीयलेखस्य किञ्चिदवतीर्णतया तस्मिन् निघण्टुभागे उत्तरभागीयशब्दविशेषाणामपि प्रविष्टतया च स निघण्टुभागोऽपि सौश्रुतस्यैव भवितुमर्हति । उत्तरतन्त्रं संयोज्यापूर्णांश-पूरकेण सौश्रुताचार्येण पूर्वभागेऽपि क्वचन संस्करणविशेषोऽपि विहितः स्यात् ।

१४. सु.सं., ह. (क), सू. ३० अध्यायान्ते एतदस्ति । 'इति सुश्रुते शल्यतन्त्रे सूत्रस्थानं समाप्तम्' इति ।
१५. तत्रैव ।
१६. तत्रैव ।

Digitization by Arya Samaj Charitable Foundation, Chennai

महाभाष्यकृतः सौश्रुतशब्दघटितनिदर्शनस्य दर्शनेन सौश्रुतानामपि पूर्वं प्रसिद्धिः, सुश्रुतवंश्यानां सौश्रुतानां शल्यविद्याविदां पार्थिवैः सह सम्बन्धमादाय सौश्रुतपार्थिवा इति पूर्वतः प्रसिद्धिरिति पूर्वं दर्शितमेव । तेन सुश्रुतस्य वंश्येन साम्प्रदायिकेन सुश्रुताचार्येण सुश्रुतस्य पूर्वतन्त्रं संस्कृतमुत्तरतन्त्रं निघण्टुभागश्च योजिते इत्यनुमीयते" ।[१७]

इत्थं नेपालराजगुरुणा हेमराजशर्मणा सुश्रुतस्य प्रतिसंस्कर्ता कश्चन सौश्रुताचार्यो निघण्टुभागस्य लेखक इति स्वमतं प्रदर्शितम्, नागार्जुनस्य प्रतिसंस्कर्तृत्वविषये प्रबलप्रमाणापेक्षा प्रकटिता, अमरसिंहस्य विषये किमपि न लिखितम् । एतेन हस्तलिखितयोः (क) (ग) सुश्रुतसंहिताग्रन्थयोरन्ते पद्योल्लिखितो वैद्योऽमरसिंहः एतल्लेखक इति विषये संशयः समुत्पद्यते, तस्य लिपिकर्तृत्वमेव साधु प्रतीयते । ततः प्राचीनतरे 'ख' ग्रन्थे तस्य पद्यस्याभावश्च तथा साधयितुं प्रमाणत्वमापद्यते ।

मूलसंहिताग्रन्थे निघण्टुग्रन्थे च सुश्रुतपदस्य समाप्तिवाक्येषु दर्शनात्, निघण्टुग्रन्थान्तेऽन्यस्य कस्यापि ग्रन्थकर्तुर्नाम्नोऽदर्शनात्, डल्हणादिविरचितटीका-ग्रन्थेषु निघण्टुनिर्दिष्टमतस्य प्राप्तौ सत्यामपि तत्कर्तृत्वविषये मौनालम्बनात्, ग्रन्थ-कर्तुर्नामादिविषये यथातथ्येन किमपि वक्तुं न शक्यते ।

सुश्रुतसंहितायाः सूत्रस्थाने प्रथमेऽध्याये केवलमाश्रमस्थ एव धन्वन्तरिर्वर्णितः, निघण्टुग्रन्थारम्भे तु हिमवच्छैलकुञ्जस्थः शीर्णपर्णाहारः, कृताग्निकृत्यः, पूतवल्कल-धारी, धर्मभृतां वरिष्ठः, अमृतोद्भवश्च धन्वन्तरिर्वर्णितः । एतेन ग्रन्थकर्तुः हिमवति प्रदेशे धार्मिकानुष्ठानेषु चानुरागातिशयः खलु व्यज्यते ।

७. ग्रन्थलेखनकालः

कस्यापि हस्तलिखितग्रन्थस्य कालनिर्णयः तत्रोल्लिखितवर्षसङ्ख्यया, तत्पर-वर्तिग्रन्थेषु ग्रन्थांशोद्धरणेन यद्वा तद्ग्रन्थकर्तुः नामोल्लेखेन, ग्रन्थगतविषयकीर्तनेन, ग्रन्थानां परस्परं पाठसाम्येन हेतुना च विधीयते । तदनुसारं सौश्रुतनिघण्टुग्रन्थस्य कालनिर्णयप्रसङ्गेऽस्माभिरिमानि तथ्यानि मननीयानि भवन्ति –

(क) उपलब्धस्य प्राचीनतमस्य 'क' सुश्रुतसंहिताग्रन्थस्यान्ते विद्यमाने पूर्वलिखिते "राज्ञि श्रीमानदेवे०" इत्यादिके श्लोके ग्रन्थस्यास्य लेखनकालः–

१७. काश्यपसंहिताया उपोद्घातः, पृ. ११२ ।

Digitization by Arya Samaj Charitable Foundation, Chennai

मानदेवशासने सति ३०१ वर्षे माधवमासे[१८] (वैशाखे), शुक्लपक्षे, सप्तम्यां तिथौ, रविवासरे, पुष्यनक्षत्रे, सिद्धयोगे चेति स्पष्टं निर्दिष्टम् –

"वर्षे चैकोत्तरेऽस्मिन् त्रितयशतगते माधवे मासिशुक्ले सप्तम्यां पुष्यऋक्षे दशशतकिरणे वासरे सिद्धयोगे ।" इति ।

एतत्पद्यमवलम्ब्य तदुल्लिखिततिथिनक्षत्रादिगणनाञ्च विधाय ज्योतिर्विदा ऐतिहासिकप्रवरेण विदुषा नयराजपन्तमहोदयेन स समयः ९३५ वैक्रमाब्दस्य वैशाख-शुक्लसप्तम्यां भवतीति निर्दिष्टम् । तद्विषये तेन विदुषा बहुविधो विमर्शः स्वरचिते "लिच्छविसंवत्को निर्णय"[१९] इत्याख्ये ग्रन्थे विहितः । तदनुसारं ९३५ वैक्रमाब्दतो ५७ वर्षाणां निरसने ८७८ ईसवीयाब्दमानमायाति । सम्प्रति १९९९ प्रवर्तते । ततो ८७८ सङ्ख्याया निरसने ११२१ अङ्का अवशिष्यन्ते । एतया गणनया निघण्टुसहिताया हस्तलिखितसौश्रुतसंहितायाः (ख) ग्रन्थस्य प्रतिलिपिकालः (न तु लेखनकालः) इतः ११२१ वर्षात्पूर्वं वैक्रमदशमशताब्द्याः पूर्वभागः, ईसवीयनवमशताब्द्याः उत्तरो भागः सिद्ध्यति । एतेनास्य ग्रन्थस्य सहस्राधिकवर्षप्राचीनता प्रकाश्यते । एतत्कालस्य प्रामाणिकी अधिकतमा च पूर्वसीमा इयमेवास्माभिः प्राप्यते ।

(२) हस्तलिखितयोः 'क' 'ग' सौश्रुतनिघण्टुग्रन्थयोः पुनः तल्लेखनकालः ६९३ नेपालसंवत्सरस्य श्रावणमासकृष्णपक्षगता एकादशी तिथिः, रविवासरः, पुष्यनक्षत्रञ्चेति निर्दिष्टम् –

"वर्षेऽनलाङ्करसगे नभकालपक्षे विश्वे तिथौ दिनकरे दिवसे गुरौ भे ।।"[२०]

एतत्पद्यमवलम्ब्य ज्योतिर्विदो नयराजपन्तमहोदयस्य शिष्येण श्रीबलराम-प्रसादलामिछानेमहोदयेन ज्यौतिषशास्त्रोक्तरीत्या गणना विहिता । तदनुसारं तेन विदुषा १६३० वैक्रमाब्दस्य श्रावणमासे कृष्णपक्षे (पूर्णान्तमानेन) २७ तमे दिवसे

---

१८. "मधुश्च माधवश्च वासन्तिकावृतू" -शुक्लयजुर्वेदः ।

१९. द्र.- पृ. २६७, २६८ ।

२०. *अस्मिन् पद्ये वर्षसंख्याया निर्देशः शब्दैरेव विहितो नाङ्कैः । ते च शब्दा अक्षराणामस्पष्टतया द्वयोरपि ग्रन्थयोः सम्यक् पठितुं न शक्यन्ते । तेषामस्माभिः ६९३ इत्यर्थोऽवधारितः । यथा'अनलाङ्करसगे' इति पद्यांशमाश्रित्य अनलः=३, अङ्काः=९, रसाः=६, एतेषां 'अङ्कानां वामतो गतिरिति वचनानुसारं सन्निवेशे ६९३ इति वर्षसंख्या प्राप्यते । राजगुरुणा हेमराजेन मध्यगतस्याङ्कस्य 'अग्नि' रिति पाठं सम्भाव्य तदनुसारं '६३३ नेवारसंवल्लिखिते' इति लिखितं प्रतीयते ।*

Digitization by Arya Samaj Charitable Foundation, Chennai

(गते), त्रयोदशी तिथिः- घटी ३९ पलानि ३९, रविवासरः, पुष्यनक्षत्रम् (घटी ३८/पलानि ५८), शकाब्दः १४९५ नेपालसंवत् ६९३ इति कालविवरणं प्रस्तुतम्। पूर्वोक्तपद्यस्य प्रथमे पादे सङ्ख्यासङ्केतार्थं लिखितेषु शब्देषु एको वर्णः स्पष्टतया पठितुं न शक्यते। तत्र विद्यमाने 'अनलाङ्करसगे' इति समस्तपदे त्रीणि पदानि सम्बद्धानि सन्ति-अनलः, अङ्काःरसाश्चेति। अनलो रसश्चेति पूर्वान्तपदयोः स्पष्टतया नास्ति सन्देहावसरः। मध्येस्थितो वर्णो न मया नान्यैर्निश्चेतुं पारितः। तत्र अङ्गम्, अङ्कः अनयोरेकं पदं सम्भावितम्। 'अङ्गः' इति पाठे स्वीकृते नेपालसंवत् ६६३ वर्षमानं भवति। 'अङ्कः' इति पाठे सति नेपालसंवत् ६९३ वर्षमानं जायते। ज्योतिर्विदा बलरामप्रसादलामिछानेमहोदयेन विहितायां नक्षत्रादिगणनायां ने.सं. ६३३, ने.सं. ६६३ उभयोरपि वर्षयोः पूर्वपद्योक्ततिथिनक्षत्रवारादीनां समन्वयो नैव जातः। ने.सं. ६९३ इत्यस्मिन् सर्वेषां साधु समन्वयो जातः इति श्रुतम्। एतदनुसारेण ग्रन्थस्यास्य प्रतिलिपिकाले अवरा, न्यूनतमा वा कालसीमा ने.सं. ६९३ यद्वा १६३० वैक्रमाब्दो निश्चितः। तथापि ग्रन्थस्यास्य षड्विंशत्याधिकचतुःशताब्दपूर्वता एतेन प्रकाश्यते।

(३) ग्रन्थानां कालनिर्णये साधनरूपेण प्रयुक्तानि भूर्जपत्रताडपत्रादीनि लिप्यासनानि, तेषु विहिता लिपयश्च सहायतां कुर्वन्ति। इतिहासविद्भिः लिप्यासनेषु प्रयुक्तानां भूर्जपत्रादीनां प्रयोगस्य प्रारम्भेऽवसाने च कालः प्रमाणैरस्ति निश्चितः तथैव लिपीनामपि प्रारम्भावसानयोर्वेला निश्चिता वर्तते।

ताडपत्रेषु लिखितानां ग्रन्थानां नेपालदेशे प्राप्तिमाश्रित्याधिकतमा सीमा सप्तमशताब्दीं यावद् ज्ञायते। यतो हि नेपालस्थे राष्ट्रियाभिलेखालये संरक्षितस्ताडपत्रे लिखितः स्कन्दपुराणान्तर्गताम्बिकाखण्डः सप्तमशताब्द्यां लिखितो वर्तते।[२१] लिपिषु कुटिला, सिद्धमातृका इति च विश्रुता उत्तरलिच्छविलिपिश्च ग्रन्थेषु सप्तमशताब्द्या आरभ्य द्वादशशताब्दीं यावत् प्रवृत्तोपलभ्यते।[२२]

(४) सुश्रुतसंहितायाः सूत्रस्थाने प्रथमाध्याये ग्रन्थस्वरूपप्रतिपादकं पद्यमेकं

२१. *पाण्डुलिपि-विज्ञान-डा.सत्येन्द्र, पृ.३४५।*
२२. *नेपाल लिपि-प्रकाश-हेमराज शाक्य, पृ.५।*

Digitization by Arya Samaj Charitable Foundation, Chennai

वर्तते । तद् यथा-

बीजञ्चिकित्सितस्यैतत् समासेन प्रकीर्तिनम् ।

सविंशमध्यायशतमस्य व्याख्या भविष्यति ।।'' इति ।

ततश्च **'तच्च सविंशमध्यायशतं पञ्चसु स्थानेषु चेति । तत्र सूत्रस्थान-निदान-शरीर-चिकित्सित-कल्पेष्वर्थवशाद् विभज्योत्तरे तन्त्रे वक्ष्यामः।'** एते वाक्ये स्तः ।

हस्तलिखितयोः (क)(घ) सुश्रुतसंहिताग्रन्थयोः सूत्रस्थानस्य तृतीयाध्याये आदौ इमानि वाक्यानि पठितानि **''प्रागभिहितं सविंशमध्यायशतं पञ्चसु स्थानेषु चेति । तत्रश्लोकस्थाने अध्यायाः षट्चत्वारिंशत् । षोडश निदानानि । दश शारीराणि । चत्वारिंशच्चिकित्सितानि । अष्टौ कल्पाः । भवन्ति चात्र-वेदोत्पत्तिः शिष्यनयस्तथाध्ययनदानिकः ।''** इति ।

तत्र सूत्रस्थानादारभ्य कल्पस्थानपर्यन्तानामेवाध्यायानां सङ्ख्या निर्दिष्टोपलभ्यते, नोत्तरतन्त्रस्य । मुद्रितग्रन्थे तु तत्र 'तदुत्तरं षट्षष्टिः' इत्यन्यद् वाक्यमपि वर्तते । इत्थं सूत्रस्थानस्य प्रथमाध्याये 'सविंशमध्यायशतं' इति ग्रन्थविस्तारसूचकं वाक्यं विन्यस्य पश्चादुत्तरतन्त्रस्य कीर्तनेन, तृतीयाध्याये च ग्रन्थागतेषु श्लोकादिस्थानेषु कल्पस्थानपर्यन्तानामेवाध्यायानां सङ्ख्यावर्णनेन सुश्रुतसंहितायां सम्प्रत्युपलभ्यमान-मुत्तरतन्त्रं पश्चात् संस्कर्त्रा केनचित् संयोजितमिति वक्तुं शक्यते। तेनैव संस्कर्त्रा निघण्टुभागोऽपिकश्चन तत्र निवेशित इति विचारः सम्भाव्यतां याति । तस्य च कः कालः स्यादिति विमर्शे तथ्यद्वयं विचारणीयं भवति -

(।) जैनाचार्येण उग्रादित्येन विरचिते कल्याणकारकाख्ये सुश्रुतानुकारिणि ग्रन्थे उत्तरतन्त्रस्य योजना दृश्यते । विद्वद्भिस्तस्य कालो नवमशताब्द्यामङ्गीकृतः। एवमेवाष्टमनवमशताब्द्यामुत्पन्न इति सम्भावितेन नागार्जुनेन रचिते योगशतकग्रन्थेऽपि अष्टाङ्गातिरिक्तमुत्तरतन्त्रं विद्यत इति श्रूयते । एतेन तत्पूर्वमेव सौश्रुतोत्तरतन्त्रस्य तदनुवर्तिनिघण्टुग्रन्थस्य चास्तित्वमनुमीयते ।[२३]

---

२३. द्रष्टव्यम् - आयुर्वेदका वैज्ञानिक इतिहास-आचार्य प्रियव्रत शर्मा, पृ. १९५ ।

Digitization by Arya Samaj Charitable Foundation, Chennai

(५) अष्टाङ्गसंग्रहः अष्टाङ्गहृदयञ्चेत्युभावेव ग्रन्थौ सुश्रुतसंहितानुसारं लिखितौ स्तः । तयोरुभयोः चिकित्सास्थानमनु उत्तरस्थानं विद्यते । एतेन च तत्पूर्वमेव सुश्रुतसंहितायामुत्तरतन्त्रयोजनाऽसीदिति ज्ञायते ।

सौश्रुतनिघण्टुग्रन्थस्याधारः सुश्रुतसंहितायाः सूत्रस्थानेऽष्टत्रिंशत्तमो द्रव्यसंग्रहणीयाध्यायो वर्तते । तस्मिन् अध्याये द्रव्याणां ये गणाः पठिताः सन्ति तेषां गणानां क्रमं प्रायोऽनुच्छिद्यैव तेषु पठितानां द्रव्याणां पर्याया सौश्रुतनिघण्टुग्रन्थे पठिताः सन्ति । तत्रोक्तेषु गणेषु बहवो गणाः सिद्धसारसंहितायामष्टाङ्गहृदयाष्टाङ्गसंग्रह-ग्रन्थयोश्च पठिताः लभ्यन्ते । परमेतेषु ग्रन्थेषु सुश्रुतोक्ताः केचन गणाः न दृश्यन्ते, सन्तोऽपि गणाः सौश्रुतं क्रमं विहाय पठिताः सन्ति, गणेषु द्रव्याणां केषाञ्चन क्वचित् प्रक्षेपः क्वचिद् निर्हारश्चोपलभ्यते । सौश्रुतनिघण्टुग्रन्थेऽपि द्रव्यसंग्रहणीयाध्यायापेक्षया किञ्चित् परिवर्तनं दृश्यते। तत्र द्रव्यसंग्रहणीये विद्यमानः पूर्वं प्रियंग्वादिः परतोऽम्ब-ष्ठादिरिति गणयोःक्रमः विपर्यस्तरूपेण लभ्यते । त्रप्वादिलाक्षादिगणावत्र न स्तः ।

गणानां सङ्ख्याविषये सुश्रुतसंहितायां द्रव्यसंग्रहणीयेऽध्याये सप्तत्रिंशत्, पञ्चत्रिंशद् वा गणाः पठिता दृश्यन्ते । सिद्धसारसंहिताया द्वितीये द्रव्यगणाध्याये तेषु त्रयस्त्रिंशद् गणाः पठिताः सन्ति । अष्टाङ्गसंग्रहे गणानां सङ्ख्या पञ्चविंशतिर्निर्दिष्टा। सौश्रुतनिघण्टुग्रन्थे च त्रयस्त्रिंशद् गणोक्तानि द्रव्याणि पर्यायैः व्याख्यातानि ।[२४] इत्थं गणानां सङ्ख्यासु क्रमेणोपलभ्यमानो ह्रासः सुश्रुतसंहितामनु सिद्धसारस्य, ततः परमष्टाङ्गसंग्रहहृदययोः रचनां निर्दिशन्निव प्रतीयते । सिद्धसारसंहितायाः रचनोत्तरं सौश्रुतनिघण्टुग्रन्थस्य ततः परं चाष्टाङ्गसंग्रहहृदययोः रचना सम्पन्ना स्यादिति वक्तुं शक्यते । यद् वा सौश्रुतनिघण्टुरेव पूर्वतो लिखितः पश्चात् संस्करणेन सम्प्रत्युपलब्धा-यामवस्थायामापन्न इत्यपि भवितुं शक्नोति ।

---

२४. (क) *'पञ्चत्रिंशद् द्रव्यगणा भवन्ति ।'* सु.सं.,ह,. (क)(घ) ।
(ख) *'समासेन सप्तत्रिंशद्गणा भवन्ति ।'* - सु.सं., ह.(ङ), (मु.) ।
(ग) *'पञ्चविंशतिरित्युक्ता वर्गास्तेषु त्वलाभतः ।'* - अ.सं., सू.अ. १६/४२ ।
(घ) *'द्वात्रिंशद् गणा ह्येते प्रोक्ता विस्तरतो मया ।'* -सौ.नि., श्लो.२८० ।

Digitization by Arya Samaj Charitable Foundation, Chennai

विविधग्रन्थेषु द्रव्यगणानां क्रमः

सुश्रुतसंहितायां द्रव्यसंग्रहणीये पठितानां गणानां नामानि क्रमसङ्ख्या च (सु.सं.,ह.(क)(घ)	सौश्रुतनिघण्टु ग्रन्थे गणानां क्रमसङ्ख्या	सिद्धसारे गणानां क्रमसङ्ख्या	अष्टाङ्गसंग्रहे गणानां क्रमसङ्ख्या
१. विदारिगन्धादिः	१	१(स्थिरादिः)	१ (विदार्यादिः)
२. आरग्वधादिः	२	६	८
३. सालसारादिः	३	२२ (सालादिः)	९ (असनादिः)
४. वरुणादिः	४	५	९(वरणादिः)
५.वीरतरादिः	५	२०(वीरवृक्षा०)	११
६. लोध्रादिः	६	७	१२
७. अर्कादिः	७	× (नास्ति)	१३
८. सुरसादिः	८	२५	१४
९.मुष्ककादिः	९	२१	१५
१०. पिप्पल्यादिः	१०	३	१६(वत्सकादिः)
११. एलादिः	११	४	२३
१२. वचादिः	१२	१७	१७
१३. हरिद्रादिः	१३	१८	१८
१४. श्यामादिः	१४	२८	२४
१५. बृहत्यादिः	१५	११	× (नास्ति)
१६. पटोलादिः	१६	१२	६
१७. काकोल्यादिः	१७	१४	३ (पद्मकादिः)
१८. उषकादिः	१८	१९	१०
१९. सारिवादिः	१९	१५	२

Digitization by Arya Samaj Charitable Foundation, Chennai

२०. अञ्जनादिः	२०	१६	५
२१. परूषकादिः	२१	२६	४
२२. प्रियङ्ग्वादिः	२३	× (नास्ति)	१९
२३. अम्बष्ठादिः	२२	८	२०
२४. न्यग्रोधादिः	२४	२	२२
२५. गुडूच्यादिः	२५	१३	७
२६. उत्पलादिः	२६	२३	× (नास्ति)
२७. मुस्तादिः	२७	२७	२१
२८. हरीतक्यादिः(त्रिफला)	२८	१०	× (नास्ति)*
२९. त्रप्वादिः	× नास्ति	२४	× (नास्ति)*
३०. लाक्षादिः	× नास्ति	× नास्ति	× (नास्ति)**
३१. कनीयपञ्चमूलम्	२९	३०	× (नास्ति)*
३२. महत्पञ्चमूलम्	३०	२९	× (नास्ति)*
३३. वल्लीपञ्चमूलम्	३१	३१	× (नास्ति)*
३४. कण्टकपञ्चमूलम्	३२	३२	× (नास्ति)*
३५. तृणपञ्चमूलम्	३३	३३	× (नास्ति)*

(६) सुश्रुतसंहितायाः द्रव्यसंग्रहाध्याये (सू.३८ अ.) विदारिगन्धादिषु गणेषु यानि द्रव्याणि न पठितानि तानि निघण्टुग्रन्थे पठितानि दृश्यन्ते। द्रव्यसंग्रहाध्यायस्य विविधगणेषु पठितानां (प्रत्येकस्मिन् गणे) द्रव्याणां सङ्ख्या च हस्तलिखितग्रन्थेषु क्वचिदधिका क्वचिन्न्यूना च दृश्यते।

सुश्रुतसंहितायाः हस्तलिखिते (क) ग्रन्थे द्रव्यसंग्रहाध्याये तेषु तेषु गणेषु न पठितानि परं निघण्टुग्रन्थे पर्यायैः वर्णितानि द्रव्याणि निम्नलिखितानि सन्ति –

(१) पुनर्नवा – द्रव्यसंग्रहाध्याये विदारिगन्धादिगणे केवलं पुनर्नवा पठिता।

* *संख्याङ्किता गणा अष्टाङ्गसंग्रहे १२ अध्याये पठिताः सन्ति।*

** *संख्याङ्कितो गणः तत्रास्मिन् १६ अध्याये च नास्ति।*

Digitization by Arya Samaj Charitable Foundation, Chennai

सौश्रुत-निघण्टुः

सौश्रुतनिघण्टुग्रन्थे पुनर्नवा, पुनर्नवश्चोभौ पर्यायैः निर्दिष्टौ ।

(२) कदरः – सालसारादौ कदरस्योल्लेखो नास्ति । निघण्टुग्रन्थे कदरस्य पर्यायाः वर्णिताः सन्ति । अष्टाङ्गसंग्रहे सिद्धसारे च तत्र कदरः पठितः ।

(३) शिग्रु :– वरुणादौ मधुशिग्रुरेव पठितो न शिग्रुः । निघण्टुग्रन्थे द्वयोरेव पर्यायाः वर्णिताः, सन्ति । सिद्धसारे तस्मिन् गणे एकः शिग्रुकः पठितः, अष्टाङ्गसंग्रहे च बहलपल्लव एवैको निर्दिष्टः ।

सुश्रुतसंहिताया हस्तलिखिते (क) ग्रन्थे बहुषु गणेषु न पठितानि द्रव्याणि सुश्रुतसंहिताया हस्तलिखिते (ङ) ग्रन्थे द्रव्यसंग्रहाध्याये नामभिर्निर्दिष्टानि सन्ति। परं तेषां पर्यायाः निघण्टुग्रन्थे न प्राप्यन्ते । तद् यथा –

(क) सु.सं., ह. (क) ग्रन्थे वरुणादौ वसुक– वसिरौ नैव पठितौ सिद्धसारे, अष्टाङ्गसंग्रहे, सौश्रुतनिघण्टुग्रन्थे च तस्मिन् गणे तौ न पठितौ । परं सु.सं., ह. (ङ) ग्रन्थे तयोः पाठो दृश्यते ।

(ख) सु.सं.ह. (क) ग्रन्थे पिप्पल्यादिगणे हस्तिपिप्पली वचा च न पठिता। सौश्रुतनिघण्टुग्रन्थे तयोः पर्यायाश्च न वर्णिताः । सिद्धसारे वचा दृश्यते, अष्टाङ्गसंग्रहे द्वावेव स्तः ।

(ग) सु.सं.ह. (क) ग्रन्थे एलादौ उशीरस्य पाठो नास्ति । सौश्रुतनिघण्टु–ग्रन्थेऽपि तस्मिन् गणे उशीरस्य पर्याया नैव कीर्तिताः सन्ति । परं सुश्रुतसंहितायाः (ह.) (ङ.) ग्रन्थेमुद्रित ग्रन्थे च तत्रोशीरस्य पाठो दृश्यते अष्टाङ्गसंग्रहे तस्मिन् गणे उशीरः नास्ति, सिद्धसारे च ।

(घ) सु. सं., ह. (क) ग्रन्थे काकोल्यादौ मृद्वीका न पठिता, सा सु.सं., ह. (ङ) ग्रन्थे पठितोपलभ्यते । अष्टाङ्गसंग्रहे पद्मकादौ मृद्वीका नैव पठिता, परं सिद्धसारे वर्तते (काकोल्यादौ) ।

सुश्रुतसंहितायाः उपलब्धेषु हस्तलिखितग्रन्थेषु द्रव्यसंग्रहाध्याये गणेषु पठितानि यावन्ति द्रव्याणि सन्ति तदपेक्षयाऽधिकानि द्रव्याणि मुद्रितग्रन्थेषु तेषु गणेषु दृश्यन्ते। तेषु कानिचिद् द्रव्याणि केवलमेकस्मिन् गणे एव पठितान्यपि सन्ति । तानि यथा –

(क) सुश्रुतसंहिताया मुद्रितग्रन्थे विदारिगन्धादौ कृष्णसारिवा पठिता वर्तते। सा सु.सं., ह.(ङ) ग्रन्थेऽपि दृश्यते । (क) (घ) ग्रन्थयोर्नैव पठिता । अष्टाङ्गसंग्रहे

Digitization by Arya Samaj Charitable Foundation, Chennai

एकैव सारिवा निर्दिष्टा ।

(ख) सालसारादिगणे मुद्रितग्रन्थे साकतालौ पठितौ स्तः । परं हस्तालिखितेषु (क) (घ)(ङ) ग्रन्थेषु तौ नैव दृश्येते । अष्टाङ्गसंग्रहे तत्र तयोः पाठो विहितः, सिद्धसारे तौ न दृश्येते ।

इत्थं सौश्रुतनिघण्टुग्रन्थे मूलभूतस्य द्रव्यसंग्रहणीयाध्यायस्य पाठापेक्षया गणानां न्यूनत्वेन, क्वचिद् गणयोः क्रमविपर्ययेण, गणेषु द्रव्याणां च क्रमविपर्ययेण, केषाञ्चित् तत्रापठितानां द्रव्याणां पर्यायवर्णनेन च स्फुटं दृष्टेण द्रव्यसंग्रहाध्यायस्य कियन्तं कालमतीत्य यद् वा सुश्रुतसंहितायाः रचनाकालात्परतरे काले सौश्रुतनिघण्टुः विरचितः, तत्र संयोजितश्चेति ज्ञायते । सिद्धसारे अष्टाङ्गसंग्रहे च यथा गणानां क्रमभङ्गो दृश्यते तथा क्रमभङ्गः सौश्रुतनिघण्टुग्रन्थे नास्ति । अष्टाङ्गनिघण्टुग्रन्थे परिशिष्टे वर्णितानां द्रव्याणां सङ्ख्या सौश्रुतनिघण्टुग्रन्थापेक्षयाऽधिका वर्तते । सौश्रुत-निघण्टुग्रन्थे द्रव्यसंग्रहाध्याये पठितानां गणोक्तद्रव्याणां पर्यायान् वर्णयित्वा परिशिष्टे वर्णितानां द्रव्याणां सङ्ख्या सौश्रुतनिघण्टुग्रन्थापेक्षयाऽधिका वर्तते । सौश्रुतनिघण्टुग्रन्थे द्रव्यसंग्रहाध्याये पठितानां गणोक्तद्रव्याणां पर्यायान् वर्णयित्वा परिशिष्टे सुश्रुतसंहिताया अन्याध्यायेषु वर्णितानां द्रव्याणां पर्याया अल्पा एव दृश्यन्ते । एतैर्हेतुभिः सौश्रुत-निघण्टुग्रन्थः अष्टाङ्गसंग्रहादपि पूर्वं विरचितो भवितुं शक्नोति !

(७) सुश्रुतसंहिताया निबन्धसंग्रहाख्यायां व्याख्यायां डल्हणाचार्येण निर्दिष्टानि मतान्तराणि सौश्रुतनिघण्टुगतैः पद्यैः तदाकरभूतसुश्रुतसंहितायाः हस्तलिखितग्रन्थेषूप-लब्धैर्वाक्यैश्च समर्थितानि बहुशो दृश्यन्ते । तद्यथा –

(क) सुश्रुतसंहितायाः सूत्रस्थानस्याष्टत्रिंशत्तमे द्रव्यसंग्रहणीयाध्याये आदौ पठितस्य 'समासेन सप्तत्रिंशद् द्रव्यगणा भवन्ति' इति वाक्यस्य व्याख्याप्रसङ्गे डल्हणाचार्येण लिखितं 'केचित् पञ्चत्रिंशदिति पठन्ति' इति वाक्यं मुद्रिते ग्रन्थे दृश्यते । राष्ट्रियाभिलेखालये स्थितयोः हस्तलिखितसुश्रुतसंहिताग्रन्थयोश्च तस्मिन् स्थले 'पञ्चत्रिंशद् द्रव्यगणा भवन्ति' इति वाक्यं दृश्यते ।[२५]

(ख) तस्मिन्नेवाध्याये विदारिगन्धादिगणान्तर्गतानां द्रव्याणां व्याख्यानप्रसङ्गे

२५. *सु.सं., ह.(क), (घ) ।*

Digitization by Arya Samaj Charitable Foundation, Chennai

डल्हणाचार्येण– "शृगालविन्नामेके विदारिगन्धादौ पठन्ति, तामपठनीयामेके मन्यन्ते" इत्युक्तं दृश्यते । अस्मदुपलब्धयोः सुश्रुतग्रन्थयोश्च तस्मिन गणे शृगालविन्नायाः पृथक् पाठो दृश्यते ।[२६] तद्भिन्नेऽन्यस्मिन्नवरकालिके सुश्रुतग्रन्थे हस्तलिखिते तस्या उल्लेखो नास्ति ।[२७] सौश्रुतनिघण्टुग्रन्थे पृश्निपर्णीपर्यायेषु शृगालविन्ना पठितोपलभ्यते ।[२८]

(ग) आरग्वधादिगणे पठितायाः शार्ङ्गेष्टायाः डल्हणाचार्येण 'काकतिक्ता' इत्यर्थो निर्दिष्टः । सौश्रुतनिघण्टुग्रन्थेऽपि 'शार्ङ्गेष्टा काकतिक्ता च' (श्लो. ४७) इति पाठो वर्तते ।

तस्मिन्नेव गणे सुषवीविषये डल्हणेन – 'सुषवी कारवेल्लकः, अन्ये तु पानीयवल्लीमाहुः' इति व्याख्यातम् । सौश्रुतनिघण्टुग्रन्थे डल्हणदर्शितद्वितीयमत–सूचकं पद्यं 'सुषवी तोयवल्ली' इति लभ्यते । अष्टाङ्गनिघण्टुग्रन्थे – 'पानीयवल्ली सुषवी' इति, सिद्धसारनिघण्टुग्रन्थे– 'सुषवी तोयवल्ली स्याद्' इति पाठश्च सौश्रुत–निघण्टुमतं समर्थयति ।

(घ) अन्येषु गणेषु पठितानां द्रव्याणाञ्च ये पर्याया डल्हणेनोक्ताः ते प्रायेण सौश्रुतनिघण्टुग्रन्थे प्राप्यन्ते । तद् यथा –

डल्हणकृता व्याख्या	सौश्रुतनिघण्टुः
'तिनिशः स्यन्दनः'	'तिनिशः स्यन्दनः' (श्लो. ६१)
'शिंशपा कृष्णसारा'	'शिंशपा कृष्णसारा च' (श्लो.६४)
'अर्जुनः ककुभः'	'अर्जुनः ककुभश्चैव' (श्लो. ६८)
'वरुणस्तिक्तसारः शाकद्रुमः'	'वरुणः.... तिक्तशाकद्रुमस्तथा' (श्लो. ७३)

एतैरुदाहरणैः द्वादशशताब्द्यां विद्यमानाद् डल्हणाचार्यात् पूर्वं सौश्रुत–

२६. *"विदारिगन्धा विदारी विश्वदेवा सहदेवा श्वदंष्ट्रा पृथक्पर्णी शतावरी सारिवा जीवकर्षभकौ क्षुद्रसहा महासहा बृहत्यौ पुनर्नवैरण्डौ हंसपादी वृश्चिकाल्यृषभी शृगालविन्ना चेति ।" – सु. सं., ह.(क)(घ), सू. ३८ ।*

२७. *"विदारिगन्धा विदारी विश्वदेवा सहदेवा श्वदंष्ट्रा शतावरी सारिवा कृष्णसारिवा जीवकर्षभकौ महासहा क्षुद्रसहा बृहत्यौ पुनर्नवैरण्डौ हंसपादी वृश्चिका ऋषभी पृथक्पर्णा चेति ।" – सु. सं., ह. (ङ), सू. ३८ ।*

२८. *"पृथक्पर्णी पृश्निपर्णी कलशी चित्रपर्ण्यपि । शृगालविन्ना लाङ्गूली सैव क्रोष्टुकपुच्छिका ।" –सौ.नि.ह.(क), श्लो, १८ ।*

Digitization by Arya Samaj Charitable Foundation, Chennai

निघण्टुग्रन्थस्यास्तित्वं प्रमाणीक्रियते ।

(८) निघण्टुषु धन्वन्तरिनिघण्टुर्दशमशताब्द्यां रचित इति विद्वद्भिः प्रमाणैः साधितम् । तत्र च बहूनि तथ्यानि सौश्रुतनिघण्टुना तुल्यानि प्राप्यन्ते । यथा –

(क) धन्वन्तरिनिघण्टुप्रारम्भे पठितानां श्लोकानामाशयः सौश्रुतनिघण्टु-ग्रन्थेऽपि लभ्यते । धन्वन्तरिनिघण्टुग्रन्थे द्रव्यनाम्नामसङ्ख्यत्वं बहुविधविकल्पवत्त्वं च विस्तरेणोक्तम् –

"अनेकदेशान्तरभाषितेषु सर्वेष्वथ प्राकृतसंस्कृतेषु ।
गूढेष्वगूढेषु च नास्ति सङ्ख्या द्रव्याभिधानेषु तथौषधीषु ।।"

सौश्रुतनिघण्टुग्रन्थे तदेवेत्थं वर्णितम् –

"बहूनि नामधेयानि भेषजानां बहुश्रुत ।
श्रूयन्ते देशभाषाभिस्तेन मोहो हि नो महान् ।।" इति ।

अत्रोभयोरपि ग्रन्थयोर्देशभाषाशब्दस्य प्रयोगेण तदानीं देशभाषाणां विस्तारः सूच्यते ।

(ख) धन्वन्तरिनिघण्टुग्रन्थे यैः शब्दैः द्रव्याणां नामज्ञानस्य महत्त्वं कीर्तितम्, प्रायस्तैरेव शब्दैः सौश्रुतनिघण्टुग्रन्थेऽपि तद्विषये वर्णितमस्ति ।

"अनामविन्मोहमुपैति वैद्यो न वेत्ति पश्यन्नपि भेषजानि"

– इति । (ध.नि., पृ. १)

सौश्रुतनिघण्टुग्रन्थे तद्विषये एतत् पद्यं वर्तते –

"किञ्चित् सदपि भैषज्यमनामज्ञश्चिकित्सकः ।
पश्यन्नपि न जानीने तेन बुद्धिर्विहन्यते ।।" इति ।

इमे विषयाः सौश्रुतनिघण्टुग्रन्थे संक्षेपेण वर्णिताः सन्ति, धन्वन्तरिनिघण्टुग्रन्थे विस्तरेण व्याख्याताः सन्ति । विशेषवर्णनापेक्षया संक्षिप्त वर्णनं पूर्व भवितुमर्हति।

(ग) धन्वन्तरिनिघण्टुग्रन्थे वर्णिता द्रव्याणां पर्याया बहुषु स्थलेषु सौश्रुत-निघण्टुग्रन्थे वर्णितैः पर्यायैः समाना दृश्यन्ते यथा –

धन्वन्तरिनिघण्टुः	सौश्रुतनिघण्टुः
"खदिरो रक्तसारश्च गायत्री	"खदिरो बालपत्रश्च दन्तधावन एव च ।

Digitization by Arya Samaj Charitable Foundation, Chennai

दन्तधावनः । कण्टकी बालपत्रश्च।"	गायत्री रक्तसारश्च" (श्लो. ५६)
"भूर्जो भुजो बहुपुटो मृदुत्वक् चास्थिरच्छदः ।"	"भुजो भूर्जश्च सारश्च बहुत्वक्कः स्थिरच्छदः ।" (श्लो.५९)
"कालेयकं ससारञ्च पीतवर्णञ्च शब्दितम् । वर्णप्रसादनञ्चैव लघुचन्दनमेव च ।" (पृ. ९९)	"कालेयकमसारञ्च पीतवर्णञ्च शद्वितम् । वर्णप्रसादनञ्चैव लघुचन्दन-मेव च ।" (श्लो. ७३)
"कृष्णार्जकः कालमालः करालः कृष्णमल्लिका ।" (पृ. १४५)	"कालमालः करालश्च कृष्णमल्लिक एव च । कृष्णार्जकश्च विख्यातः ।" (श्लो. १३१)
"भार्गी गर्दभशाकञ्च पद्मा ब्राह्मणयष्टिका । अङ्गारवल्ली फञ्जी च सैव ब्रह्मसुवर्चला ।" (पृ. २०)	"भार्गी गर्दभशाकञ्च महाबर्बरका च या । अङ्गारवल्ली फञ्जी च पद्मापि परिकीर्तिता ।" (११५) ।

(घ) सौश्रुतनिघण्टुग्रन्थे सुश्रुतसंहिताया द्रव्यसंग्रहाध्याये पठितानां गणानां क्रमेणैव द्रव्याणां पर्यायाः वर्णिताः सन्ति । सा परम्परा अष्टाङ्गनिघण्टुग्रन्थे सिद्धसारे च किञ्चिदेव परिवर्तिता । तत्र गणानां क्रमे परिवर्तितेऽपि तेषां नामानि प्रायः सुश्रुतसंहितानुरूपाण्येव सन्ति । धन्वन्तरिनिघण्टुग्रन्थे गणानां वर्गीकरणं पृथगेव गुडूच्यादि शतपुष्पादिप्रभृतिगणेषु विहितम्, द्रव्याणां पर्यायाश्च तेनैव क्रमेण वर्णिताः सन्ति । इत्थं नवीनप्रणाल्या द्रव्यपर्यायवर्णनपरं धन्वन्तरिनिघण्टुं दृष्ट्वा तदपेक्षया प्राचीनपरम्परया लिखितः सौश्रुतनिघण्टुः पूर्वो भवितुमर्हति, ततश्च तस्य कालः ईसवीयदशमशतकात्पूर्वोऽनुमीयते ।

(९) तीसटाचार्यकृतायाः चिकित्साकलिकाया व्याख्याता तत्सुतश्चन्द्रटः सुश्रुते पाठशुद्धिकर्ता च श्रूयते ।[२९] विद्वद्भिः तस्य स्थितिकालो नवमे ईशवीयशतके

२९. *"चिकित्साकलिकाव्याख्यां योगरत्नसमुच्चयम्।*
सुश्रुते पाठशुद्धिं च तृतीयां चन्द्रटोव्यधात्।।" - चिकित्साकलिकाविवृतौ ।

Digitization by Arya Samaj Charitable Foundation, Chennai

निर्दिष्टः । तत्कृतायां चिकित्साकलिकाव्याख्यायां द्रव्याणां ये पर्याया निर्दिष्टाः ते सौश्रुतनिघण्टुग्रन्थे बहुशः प्राप्यन्ते । तद् यथा–

चन्द्रटकृता चिकित्साकलिका-व्याख्या[30]	सौश्रुतनिघण्टुः
'असनो बीजकः' (श्लो. ३९३)	'असनो बीजकश्चैव' (श्लो.६६)
'उदीच्यं बालकम्' (श्लो. ३४८)	'बालको वार्युदीच्यञ्च' (श्लो. १७५)
'स्पृक्का कुटिलपुष्पा' (श्लो. ५८)	'स्पृक्का..कुटिलपुष्पिका' (श्लो. १८२)
'कम्पिल्लको रोचनिका' (श्लो. १६३)	'कम्पिल्लको रोचनको' (श्लो. १९९)
'काञ्चनी स्वर्णक्षीरी' (श्लो. ३६७)	'स्वर्णक्षीरी..काञ्चनदुग्धिका' (श्लो. २०४)
'वरुणस्तिक्तशाकद्रुमः' (श्लो. ६१)	'वरुणः..तिक्तशाकद्रुमस्तथा।' (श्लो. ७३)
'विदारी क्षीरविदारिका' (श्लो. २६२)	'विदारी...क्षीरविदारिका' (श्लो. १४)
'चण्डा तस्करी' (श्लो. ५८)	'चण्डा... तस्करी' (श्लो. १७१)
'ऋद्धिः पुष्टिः' (श्लो. ४९)	'ऋद्धिः पुष्टिः' (श्लो. २१७)
'शिग्रुः हरितशिग्रुः' (श्लो)	'शिग्रुको हरितशाकश्च' (श्लो. ७५)
'मधुशिग्रुः शोभाञ्जनकः' (श्लो. ६१)	'मधुशिग्रुस्तथा चैव शोभाञ्जनक एव च' (श्लो. ७६)

एतेन सौश्रुतनिघण्टुविषये चन्द्रटस्याभिज्ञत्वं व्यज्यते । इत्थं सौश्रुतनिघण्टु-ग्रन्थश्चन्द्रटात् पूर्वमासीदिति वक्तुं शक्यते ।

(१०) चरकसुश्रुतयोः प्राचीनो व्याख्याता जेज्जटाचार्यः चन्द्रटात्पूर्वं भट्टारहरिश्चन्द्रात् परतः ख्रैस्तनवमशतकस्य पूर्वार्धे विद्यमानो विद्वद्भिः प्रमाणैः साधितः । तत्कृतव्याख्यानेषु द्रव्याणां ये पर्याया निर्दिष्टास्ते सौश्रुतनिघण्टुग्रन्थे बहुशः प्राप्यन्ते । तद् यथा –

३०. द्रष्टव्यम् – *"Son's Commentary on Father's Work II, Candrat's commentary on Tisata's Chikitsa - kalika, by P.V. Sharma, reproduced from Journal of Research in Indian Medicine, Vol. VII, No. 3, 1972.*

Digitization by Arya Samaj Charitable Foundation, Chennai

जेज्जटेन निर्दिष्टा द्रव्यपर्यायाः[३१]	सौश्रुतनिघण्टुः
असनः = बीजकः (चि.१।१३-१६)	'असनो बीजकश्चैव' (श्लो. ६६)
मधुरसा = मूर्वा (चि.३।२६७)	'मूर्वा मधुरसा चैव' (श्लो. ४१)
हंसपादी = मधुस्रवा (चि.२३।२१९)	'हंसपादी ... मधुस्रवा' (श्लो. ३०)
वृश्चीवः = श्वेतपुनर्नवा (चि. ३।२६७)	'वृश्चीवो' श्वेतमूलः (श्लो. २७)
कठिल्लकः = रक्तपुनर्नवा (चि.३।१९०)	'रक्तवृन्तः कठिल्लकः' (श्लो.२८)
शातला = यवतिक्ताभेदः (चि. २८।८४)	'सप्तला यवतिक्ता च' (श्लो. २०१)
लता = प्रियङ्गुः (चि. २९।११०)	'प्रियङ्गुः......श्यामा.....लता। (श्लो. १६८)
कट्वङ्गः अरलुः (चि. ३०।९२)	'कट्वङ्गश्चारलुश्चैव' (श्लो. २४३)

जेज्जटाचार्येण द्रव्यविनिश्चयार्थं यथा द्रव्यपर्यायाणां व्याख्या विहिता तथा द्रव्याणां विशेषनिर्देशः सौश्रुतनिघण्टुग्रन्थे सर्वत्र नास्ति। जेज्जटेन एरण्ड इत्यस्य शुक्ल एरण्डः, उरुबूकस्य रक्त एरण्ड इति भेदश्च दर्शितः। सौश्रुतनिघण्टुग्रन्थे 'एरण्डश्चोरुबूकश्च' इत्यनयोरेकत्रोल्लेखेनाभेद इव दर्शितः। अष्टाङ्गनिघण्टुग्रन्थेऽपि 'उरुबूकस्तथैरण्ड' इति पाठो लभ्यते। एवमेव जेज्जटाचार्येण न्यग्रोधो वटाद् भिन्नो बहुमूलो रक्तफलश्च निर्दिष्टः। सौश्रुतनिघण्टुग्रन्थे एक एव रक्तफलो न्यग्रोधः 'न्यग्रोधश्च वटश्चैव तथा रक्तफलः' इति निर्दिष्टः।

एवमेव जेज्जटाचार्येण अन्यमतेषु निर्दिष्टा द्रव्याणां पर्यायाः सौश्रुतनिघण्टुग्रन्थे दृश्यन्ते। ते यथा –

द्रव्यनाम	जेज्जटमतम्	अन्यमतम्	सौश्रुतनिघण्टुः
अनन्ता	उत्पलसारिवा	दुरालभा (चि.३।२५५)	दुरालभा (श्लो. २४८)
वीरा	जालन्धरीयशाकः	काकोली (चि. २५।४७)	काकोली (श्लो. २०८)
अम्बष्ठा	दक्षिणे प्रसिद्धा	पाठा	पाठा, एकैषिका च (श्लो. ३९, २४०)

३१. द्रष्टव्यम् – *'Jejjata (9th century A.D.) and Hs informations about Indian Drugs', P.V. Sharma and G.P. Sharma, Reprinted from the 'Indian Journal of History of Science, Vo. 7, No. 2, 1972.*

Digitization by Arya Samaj Charitable Foundation, Chennai

जेज्जटाचार्येण स्वर्णक्षीरीपर्यायत्वेन कङ्कुष्ठः पठितः - (चि. २३।२०३)। सौश्रुतनिघण्टुग्रन्थे कुत्रापि कङ्कुष्ठस्योल्लेखो नास्ति । जेज्जटाचार्येण निर्दिष्टानि बहूनि गन्धनाकुली, तिलपर्णी, लताकस्तूरी इत्याद्यानि द्रव्याणि च सौश्रुतनिघण्टुग्रन्थे नोपलभ्यन्ते । एतैर्हेतुभिः जेज्जटतोऽपि पूर्वं सौश्रुतनिघण्टुग्रन्थस्यास्तित्वं सूच्यते।[३२]

(११) अष्टाङ्गसंग्रहे सूत्रस्थाने षोडशाध्यायो विविधगणसंग्रहाख्यो वर्तते । तस्मिन्नध्याये बहुशः सुश्रुतोक्ता एव द्रव्यगणाः क्रमविपर्ययेण वर्णिताः सन्ति । तेषु गणेषु द्रव्याणां यानि नामानि पठितानि तानि बहुशः सौश्रुतनिघण्टुग्रन्थे पर्यायरूपेण वर्णितान्युपलभ्यन्ते । तद् यथा -

अष्टाङ्गसंग्रहे गणोक्तानि द्रव्यनामानि	सौश्रुतनिघण्टुग्रन्थे तेषामुल्लेखः
विदारी (सू. १६।३)	'विदारीक्षु.' (श्लो. सं १४)
पञ्चाङ्गुलः (सू. १६।३)	'स च पञ्चाङ्गुलो.' (श्लो. २९)
कण्डूकरी (सू. १६।३)	'सैव कण्डूकरी' (श्लो. ३२)
शृङ्गी (सू. १६।६)	'शृङ्ग्यतिरवा' (श्लो. २१३)
फलिनी (सू. १६।८)	'प्रियङ्गुः फलिनी' (श्लो. १६८)
मांसी (सू. १६।८)	'मांसी च नलदम्' (श्लो. १६४)
अरिष्टः (सू. १६।१०)	'निम्बः.... अरिष्टः' (श्लो. ४३)
काकतिक्ता (सू. १६।११)	'शार्ङ्गष्टा काकतिक्ता' (श्लो. ४७)
मधुरसा (सू. १६।११)	'मूर्वा मधुरसा' (श्लो. ४१)
स्रुववृक्षः (सू. १६।११)	'स्रुववृक्षश्च शब्दितः' (श्लो. ३७)
भूनिम्बः (सू. १६।११)	'किराततिक्तो भूनिम्बः' (श्लो.५१)
सप्तच्छदः (सू. १६।११)	'सप्तच्छदः' (श्लो. ४२)
विषाणिका (सू. १६।१५)	'अजशृङ्गी...विषाणिका' (श्लो. ८३)
जया (सू. १६।१५)	'जयारणिक एव च' (श्लो. ७७)

३२. *जेज्जटाचार्यस्य व्याख्यानविषये अत्रोद्दिष्टानि तथ्यानि, तेषां सन्दर्भाश्चास्माभिः पूर्वोद्दिष्टं निबन्धमनुसृत्य प्रस्तुतानि सन्ति । अत्रोक्ता सन्दर्भसंख्या मद्रासस्थितपुस्तकालयस्य चरकसंहिताग्रन्थानुसारमस्तीति तस्मिन् निबन्धे सूचितम् । मुद्रितग्रन्थेषु तेषु स्थानेषु तानि द्रव्याणि नोपलभ्यन्ते इति विशेषः ।।*

Digitization by Arya Samaj Charitable Foundation, Chennai

सौश्रुत-निघण्टुः

बहलपल्लवः (सू. १६।१५)	'शिग्रुको बहलपत्रश्च' (श्लो. ७५)
टुण्टुकः (सू. १६।१८)	'भल्लूकष्टुण्टुकश्चैव' (श्लो. ९४)
मस्तमञ्जरी (सू. १६।१८)	'कुरुटिका...मस्तकमञ्जरः' (श्लो. ९५)
कर्कशः (सू. १६।१८)	'कर्कशशालिका' (श्लो. ९६)
पार्था (सू. १६।१८)	'कपोतवङ्का पार्था च' (श्लो. ९७)
प्रत्यक्पुष्पी (सू. १६।२०)	'ह्यपामार्गः प्रत्यक्पुष्पी' (श्लो. ११४)
गतशोकः (सू. १६।२०)	'अशोको वीतशोकश्च' (श्लो. १०३)
परिपेलवम् (सू. १६।२०)	'कुटन्नटं ...परिपेलवम्' (श्लो. १०३)
पीततैला (सू. १६।२२)	'पीततैला च शब्दिता' (श्लो. १२०)
वृषकर्णी (सू. १६।२४)	'उन्दूरुकर्णा...वृषकर्णी' (श्लो. १३६)
द्वीपी (सू. १६।२६)	'चित्रको द्वीपिकः' (श्लो. ४६)
दीर्घवृन्तफलः (सू. १६।२७)	'दीर्घवृन्तफलश्चैव' (श्लो. ९४)
वेल्लम् (सू. १६।२७)	'मरिचं वेल्लजम्' (श्लो. १५१)
घुणप्रिया (सू. १६।२७)	'घुणवल्लभा' (श्लो. १५९)
कलशी (सू. १६।२९)	'पृश्निपर्णी कलशी' (श्लो. १८)
योजनवल्ली (सू. १६।३१)	'योजनवल्ली मञ्जिष्ठा' (श्लो. २४७)
अनन्ता (सू. १६।३१)	'दीर्घमूला तथाऽनन्ता' (श्लो. २४८)
समङ्गा (सू. १६।३१)	'समङ्गा समिपत्रा' (श्लो. २४२)
नमस्करी (सू. १६।३२)	'नमस्करी रक्तमूला' (श्लो. २४२)
सदाफलः (सू. १६।३५)	'उदुम्बरः ... सदाफलः' (श्लो. २५२)
सोमवल्कः (सू. १६।३५)	'रोहिणी वल्कसोमः' (श्लो. २५८)
देवधूपः (सू. १६।३७)	'सुरधूपो यक्षधूपो' (श्लो. १७७)
कुटरणा (सू. १६।३९)	'त्रिवृत्...कुटरणेति च' (श्लो. १९५)
शिखरी (सू. १६।३९)	'तिल्वकः...शिखरी' (श्लो. १९८)
वस्तान्त्री (सू. १६।३९)	'छगलान्त्री...वस्तान्त्री' (श्लो. २०३)
व्याधिघातः (सू. १६।३९)	'आरग्वधो...व्याधिघातः' (श्लो. ३४)

Digitization by Arya Samaj Charitable Foundation, Chennai

अष्टाङ्गसंग्रहे विविधगणेषु पठितानि द्रव्याणां नामानि तेषां पर्यायाश्च सुश्रुतसंहितायाः हस्तलिखितपुस्तकेषु द्रव्यसंग्रहणीयाध्याये सौश्रुतनिघण्टुग्रन्थे च नासाद्यन्ते । तानि यथा –

अष्टाङ्गसंग्रहे असनादौ तालः पठितः । स सुश्रुते तत्स्थानीये सालसारादौ न दृश्यते । सौश्रुतनिघण्टुग्रन्थे तत्पर्यायाश्च न सन्ति । अष्टाङ्गसंग्रहे मुस्तादौ भल्लातकः पठितः, स च द्रव्यसंग्रहणीये (ह.), सौश्रुतनिघण्टुग्रन्थे च न दृश्यते । एवमेव श्यामादिगणे तीक्ष्णवृक्षफलमष्टाङ्गसंग्रहे, मुद्रिते सुश्रुतसंहिताया द्रव्यसंग्रहाध्याये च तत्र दृश्यते, परमेतत् हस्तलिखिते द्रव्यसंग्रहे सौश्रुतनिघण्टुग्रन्थे च नास्ति ।

अष्टाङ्गसंग्रहस्य मुद्रितग्रन्थे न्यग्रोधादिगणे प्लक्षः कपीतनश्चैतौ पृथक् पठितौ। हस्तलिखितसुश्रुतस्य (क), (घ) ग्रन्थयोः कपीतनो नास्ति । (ङ) ग्रन्थे मुद्रिते च कपीतनस्तत्र पृथक् पठितः । सौश्रुतनिघण्टुग्रन्थे प्लक्षस्यैव पर्यायः कपीतनो निगदितः ।

एतैरुदाहरणैः सौश्रुतनिघण्टुग्रन्थस्याष्टाङ्गसंग्रहादपि पूर्वं स्थितिः सम्भाव्यते। इत्थं ग्रन्थे निर्दिष्टकालस्य, ग्रन्थलेखनाय प्रयुक्तयोर्लिपिलिप्यासनयोः, ग्रन्थगतविषयाणां ग्रन्थान्तरैस्तुलनायाश्च समीक्षामाश्रित्य सौश्रुतनिघण्टुग्रन्थस्य रचनाकालः ईसवीय-षष्ठशतकादारभ्य सप्तमं शतकं यावत् निर्णेतुं शक्यते ।

८. ग्रन्थयोजना–

सौश्रुतनिघण्टुग्रन्थस्य रचना सोद्देश्या क्रमबद्धा व्यवस्थिता च दृश्यते । तस्याः प्रारम्भे एव एतद्ग्रन्थरचनाया आवश्यकता नानाविधदेशभाषासु द्रव्याणां नामभेददर्शनात्समुत्पन्नमोहस्य निवारणाय निर्दिष्टा ।[३३] अनन्तरञ्च द्रव्यसंग्रहणीयाध्याये पठितानां द्रव्याणां पर्यायनिर्देशेन सह वर्णनं तत्र प्रतिज्ञातम् ।[३४] तदनुसारं तेषु गणेषु पठितानां द्रव्याणां गणोक्तं क्रममविच्छिद्यैव क्रमेण पर्यायाणां वर्णनं तत्र विहितम् । इत्थं गणेषु पठितानां द्रव्याणां वर्णनान्ते सुश्रुतसंहिताया अन्येष्वध्यायेषु पठितानां द्रव्याणां पर्यायाः परिशिष्टरूपेण वर्णिताः सन्ति । तत्र परिशिष्टे स्थावराणि चराणि

३३. *'पाटवाद्यवकामाच नानाभाषाभिलाषिणाम् । द्रव्याणां यः समाख्यातो विस्तरस्तस्य वक्ष्यते।" सौ.नि. (ह.) श्लो. ११ ।*

३४. *गणा विदारिगन्धाद्या य उक्ता द्रव्यसंग्रहे । एकैकमौषधास्तेषां शब्दैः पर्यायवाचकैः । एकैकेनैव वक्ष्यामि श्लोकेनैवानुपूर्वशः ।।" – सौ.नि. (ह.) १२ ।*

Digitization by Arya Samaj Charitable Foundation, Chennai

च द्रव्याणि वर्णनीयानि प्रागुक्तानि, परं चराणि द्रव्याणि न दृश्यन्ते ।[३५]

ग्रन्थस्य व्यवस्थिततत्वविषयेऽत्रैका नवीना पद्धतिर्दृश्यते याऽन्यत्र न प्राप्यते। पूर्ववर्णितेषु गणेषु यानि द्रव्याणि पर्यायैः वर्णितानि तेषां पुनरुक्तिनिरासाय गणस्योल्लेखपुरस्सरं द्रव्याणां नामानि सपर्यायाणि बहुषु स्थलेषु समाविष्टानि दृश्यन्ते।[३६]

९. सौश्रुतनिघण्टुग्रन्थस्य वैशिष्ट्यम् -

१) ऐतिहासिकं वैशिष्ट्यम्-

प्राचीनेषु निघण्टुषु सुश्रुतसंहितादिग्रन्थानामन्ते निबद्धानां निघण्टूनामेका विशिष्टा परम्परा समुपलभ्यते । तादृशेषु निघण्टुषु सौश्रुतनिघण्टुः, अष्टाङ्गनिघण्टुः, सिद्धसारनिघण्टुश्चेति ग्रन्थत्रयमस्माभिरासादितम् । तेषु त्रिषु ग्रन्थेषु सौश्रुतनिघण्टुग्रन्थः प्राचीनतमं सुश्रुतसंहिताख्यं ग्रन्थमाश्रित्य रचितो वर्तते । एतेनास्य द्रव्यगुणविज्ञानेतिहासे विशिष्टं स्थानमभिव्यज्यते ।

प्राचीनानां निघण्टूनामेका परम्परा द्रव्याणां पर्यायमात्रवर्णनपरा समुपलभ्यते, येषां निदर्शनानि पर्यायरत्नमाला, वनौषधिनामावली, द्रव्यावली इत्याद्या ग्रन्थाः सन्ति । अन्या च परम्परा तेषु तेषु ग्रन्थेषु वर्णितानां द्रव्यगणानां गणोक्तक्रमेणैव पर्यायवर्णनपरा दृश्यते । यस्यां सौश्रुतनिघण्टुः, अष्टाङ्गनिघण्टुः, सिद्धसारनिघण्टुः, हृदयदीपकश्चेत्येते ग्रन्थाः प्राप्यन्ते । इत्थं ग्रन्थान्ते निबद्धत्वेन, पर्यायमात्रावर्णनपरत्वेन, गणोक्तद्रव्याणां पर्यायवर्णनेन चास्य त्रिविधमैतिहासिकग्रन्थशैलीविषयगतं वैशिष्ट्यं प्रकाश्यते ।

सौश्रुतनिघण्टुग्रन्थस्यैतिहासिकवैशिष्ट्यं तत्र वर्णितानां द्रव्याणां सन्निवेशादपि प्रमाणीक्रियते । विद्वद्भिर्बृहत्त्रय्यां वर्णितानां द्रव्याणां परस्परं तुलनां विधाय त्रिष्वेव ग्रन्थेषु लभ्यमानानां द्रव्याणामेका, द्वयोर्ग्रन्थयोरूपलभ्यमानानां द्रव्याणामपरा, एकैकस्मिन् ग्रन्थे लब्धानां द्रव्याणां तृतीया च सूची विनिर्मिता। तामनुसृत्य तैरिदमङ्गीकृतं यत्-यानि द्रव्याणि सुश्रुतसंहितायामष्टाङ्गहृदयग्रन्थे च पठितानि परं चरकसंहितायां न दृश्यन्ते तानि पूर्वं सुश्रुतेन वर्णितानि, अनन्तरं तदनुवर्तिना वाग्भटेन ततो गृहीतानी-

३५. "द्वात्रिंशद् गणा ह्येते प्रोक्ता विस्तरतो मया ।
अत ऊर्ध्वं प्रवक्ष्यामि यथास्थूलानि नामभिः ।" - सौ.नि. (ह.) (क), श्लो. २८० ।
"प्रकीर्णकानि दिव्यानि स्थावराणि चराणि च।।" - तत्रैव, श्लो.२८१ ।

३६. यथा - मेषशृङ्गी पूर्वनामा सालसारादौ । नक्तमालः पूर्वनामारग्वधादौ व्याख्याताः ।।

Digitization by Arya Samaj Charitable Foundation, Chennai

त्यनुमीयन्ते। तादृशेषु द्रव्येषु बाकुची, इन्द्रवृक्षः, उत्पलसारिवा, काम्बोजी, कुलहलः, गृध्रनखी, नागकेशरम्, घोण्टा, चूतः, चोचम्, तुगाक्षीरी, दीर्घवृन्तः, देवदाली, पिप्पलः, पुन्नागः, भल्लूकः, मुरङ्गी, भूतकेशी, मलयजः, रामठः, विषमुष्टिकः, वीरतरुः, वृद्धिः, शृगालविन्ना, सुरसी चेत्येतानि द्रव्याणि सौश्रुतनिघण्टुग्रन्थे पर्यायैः वर्णितानि सन्ति।

अन्यानि तादृशद्रव्याणि बहूनि तत्र न वर्णितानि। तानि यथा– अगस्त्यः, वन्य-कुलत्थम्, कच्चकः, करञ्जिका, कीटारिः, कोकिलाक्षः, गिरिकदम्बः, चुक्रम्, ताम्रवल्ली, तालपत्री, पिचुकः, बन्धूकः, मल्लिका, मुरा, मोहनिका, यावशूकजः, रेणुका, वैजयन्ती, शिवाटिका, शीर्णवृन्तः, शुकनसा, शेफालिका, सर्पगन्धा, हस्तिकर्णश्चेत्येतानि।

यानि द्रव्याणि केवलं सुश्रुतसंहितायां पठितानि अष्टाङ्गहृदये चरकसंहितायाञ्च न पठितानि तानि वाग्भटसमयादनन्तरं केनापि संयोजितान्यनुमीयन्ते।[३७] तादृशेषु द्रव्येषु सौश्रुतनिघण्टुग्रन्थे चक्रमर्दः, द्राविडी, पारिजातः, सिद्धकः, सितसिन्धुवारः, अमृताद्वयञ्चेत्येतानि पर्यायैः वर्णितानि सन्ति। अन्यानि बहूनि द्रव्याणि तत्र नासाद्यन्ते। तानि यथा – अर्कपर्णी, कुरबकः, केतकः, क्षीरपलाण्डुः, गिलोड्यः, गुडशर्करा, चम्पकः, तिमिरः, त्रिपुटः, पुत्रजीवकः, भिल्लोटकः, मुचुकुन्दः, मोक्षकः, मोदयन्ती, लताकस्तूरिका, बन्दाकः, विषद्रव्याणि (क्लीतकः, अश्वमारः, गुञ्जा, सुगन्धः, गर्गरकः, करघाटः, विद्युच्छिखा, विजयम्, विषपत्रिका, लम्बा, वरदारुः, करम्भम्, महाकरम्भम्, कर्कोटकः, रेणुकः, खद्योतकः, चर्मरी, इभगन्धा, सर्पघाती, नन्दनम्, सारपाकम्, वेत्रम्, कादम्बम्, वल्लीजम्, अन्त्रपाचकम्, कर्तरीयकम्, सौरीयकम्, नाराचकम्, कुमुदघ्नी, जालक्षीरी, फेनाश्म, हरितालम्, कालकूटः, वत्सनाभः, सर्षपकः, पालकः, कर्दमकः, वैराटकः, मुस्तकम्, शृङ्गीविषम्, प्रपुण्डरीकम्, मूलकम्, हालाहालम्, महाविषम्, कर्कटकम्)[३८] शाखोटः, सुवहा, स्थूलकन्दः, हरिमन्थः (चणकः), अलसान्द्रम्, मूषिका, रक्तवृक्षः, वेणुपत्रिका, सोमभेदाश्च (अंशुमान्, मुञ्जवान्, चन्द्रमा, रजतप्रभः, दूर्वासोमः, कनीयान्, श्वेताक्षः, कनकप्रभः, प्रतानवान्, तालवृन्तः, करवीरः, अंशवान्, स्वयंप्रभः, महासोमः, गरुडाहतः, गायत्रः, त्रैष्टुभः, पाङ्क्तः, जागतः, शाक्वरः, अग्निष्टोमः, रैवतः, उडुपतिश्च)।[३९]

---

३७. द्रष्टव्यम् – आयुर्वेदका वैज्ञानिक इतिहास, पृ. ८३-८४।

३८. सुश्रुतसंहिता, कल्पस्थान, अ. २।५।

३९. सु.सं., (मु.), चि. ३१।५-८

Digitization by Arya Samaj Charitable Foundation, Chennai

सौश्रुतनिघण्टुग्रन्थो मूलरूपेण सुश्रुतसंहिताया द्रव्यसंग्रहणीयाध्याये विविधगणेषु पठितानां द्रव्याणां पर्यायवर्णनायैव रचित इति तत्र तद्विषयकसामग्र्याः पूर्णतया ज्ञायते। सुश्रुतसंहिताया अन्यप्रकरणेषु पठितानां द्रव्याणां तत्र स्वल्पमात्रः सन्निवेशः केवलं द्रव्यान्तराणां सङ्केतरूप एवोन्नीयते तेषामपूर्णसन्निवेशदर्शनात्।

२) विषयवर्णनात्मकं वैशिष्ट्यम्-

कस्यापि ग्रन्थस्य वैशिष्ट्यं तस्मिन् वर्णितानां विषयाणां यथार्थत्वेन, नवीनत्वेन, व्यापकत्वेन, बहूपयोगित्वेन, रचनासौष्ठवेण चावधार्यते। सौश्रुतनिघण्टुग्रन्थस्यानुशीलने तत्र द्रव्यविज्ञानदृष्ट्या विशिष्टानि बहूनि तथ्यान्यपूर्वाणि दृश्यन्ते। तेषां केषाञ्चनात्र सङ्केतः प्रस्तूयते –

(क) अत्र वर्णितानां द्रव्यपर्यायाणामपूर्वत्वमन्यत्र दुर्लभत्वञ्च –

सौश्रुतनिघण्टुग्रन्थे पठितेषु बहुषु द्रव्यपर्यायेषु केचन प्राचीनेषु अर्वाचीनेषु च ग्रन्थेषु नासाद्यन्ते। तानि ग्रन्थस्यास्यापूर्वतां निर्दिशन्ति। यथा – स्थलशृङ्गाटकः (गोक्षुरः), क्रोष्टुकपुच्छिका (पृश्निपर्णी), वलीकन्दः (विदारी), मङ्गल्या, अर्थप्रसाधनी (सहदेवा), जटामूला (शतावरी), प्रियनामा, मङ्गल्यनामधेयश्च (जीवकः), पृथिवीपतिः (ऋषभः), पाण्डुरोमशपर्णी, हंसमाषा (महासहा), पीतफला, क्षवप्रचोदनी (कण्टकारिका), घृतमण्डालसा, पदाह्वा (हंसपादी), काली, उष्ट्रधूमकपुच्छा (वृश्चिकाली), अकाशी, दुरालभा (कपिकच्छूः), वामनः (मदनः), कण्टकी, यज्ञवृक्षः (विकङ्कतः), पाण्डुरद्रुमः, वरतिक्तः (कुटजः), दीपनी, स्थावरी (पाठा)।

(ख) अत्र वर्णितानां द्रव्यपर्यायाणामन्यनिघण्टुषु परिवर्तनम्-

सौश्रुतनिघण्टुः	अन्ये निघण्टवः
चैलिका (पाठा)	कुचेलिका (अ.नि.), पापचेली (अ.को.)
कालवृन्ता (पाटला)	कालवृन्तिका (ध.नि.)
बृहत्त्वक्कः (सप्तपर्णः)	विशालत्वक् (अ.को.)
उष्ट्राण्डिका (शार्ङ्गेष्टा)	करभाण्डिका (ध.नि.)
कुटिलकण्टकः (खदिरः)	जिह्मशल्यः (ध.नि.)
शिखिनीफलः (शिरीषः)	शङ्खिनीफलः (ध.नि.)
पाण्डुवृक्षः (धवः)	पाण्डुतरुः (रा.नि.)

Digitization by Arya Samaj Charitable Foundation, Chennai

बहलपत्रः (शिग्रुः) बहलपल्लवः (अ.नि.)
अग्निनिर्मथनी (तर्कारी) अग्निमन्थः (अ.नि.)
पीलुपत्रः (मोरटः) पीलुपत्रा, पीलुपर्णी (अ.नि.)

(ग) द्रव्यपर्यायाणां व्यापकत्वम् -

सौश्रुतनिघण्टुग्रन्थे वर्णिता द्रव्याणां पर्याया द्रव्याणां परिचयायापेक्षितान् बहुविधपक्षान् सहैव सूचयन्ति । द्रव्याणां परिचयाय प्रथमं तेषां वर्णगन्धरसादीनां आकृतिविशेषाणाञ्च परिज्ञानमुपादेयं भवति, परतश्च तेषामुपयोगवर्णनेनोपयोगित्वं प्रकाशितं भवति । सौश्रुतनिघण्टुग्रन्थे द्रव्याणां स्वरूपादिविषये निदर्शकाणां पर्यायाणां विवरणमेवमस्ति -

द्रव्यस्वरूपनिदर्शकाः पर्यायाः-

पत्रस्वरूपाणि -

सूक्ष्मपत्रा (शतावरी)
पाण्डुरोमशपर्णी (महासहा)
लघुपर्णा (मूर्वा)
कर्कशच्छदः (पटोलः)
बालपत्रः (खदिरः)
दीर्घपत्रकः (अश्वकर्णः)
बदरीपत्रकः (शुक्तिः)
विश्लिष्टपत्रम् (स्थौणेयम्)
उदुम्बरपत्रिका (दन्ती)
बृहत्पर्णः (तिल्वकः)
वृत्तपत्रा (छगलान्त्री)
धन्वनपत्रकः (परुषकः)
समिपत्रा (समङ्गा)
चलपर्णः (अश्वत्थः)
अश्वत्थपत्रिका (प्लक्षः)
स्निग्धपिच्छिलपत्रा (बदरी)

पुष्पानुरूपाः पर्यायाः -

ताम्रपुष्पा (पाटला)
गुच्छपुष्पः (सप्तपर्णः)
मञ्जरीपुष्पः (करञ्जः)
असनपुष्पकः (कुचन्दनः)
मृदुपुष्पः (शिरीषः)
पीतकेशरम् (नागकेशरम्)
ताम्रपुष्पी (श्यामा)
रक्तकुसुमः (दाडिमः)
ताम्रपुष्पा (धातकी)
विषपुष्पः (मदनः)
श्वेतचामरपुष्पः (काशः)
सर्वदापुष्पः (वसिरः)
पिण्डपुष्पः (अशोकः)
रक्तपुष्पकः (पलाशः)
दीर्घपुष्पः (अलर्कः)

Digitization by Arya Samaj Charitable Foundation, Chennai

सौश्रुत-निघण्टुः

फलानुरूपाः पर्यायाः -

फलिनी (प्रियङ्गुः)
जघनेफला (काकमाची)
कोलफला
एरण्डफला
मृदुफलः (परूषकः)
तूलफला (शाल्मलिः)
रक्तफलः (न्यग्रोधः)
स्कन्धफलः (उदुम्बरः)
सदाफलः (उदुम्बरः)
द्राक्षाफलः (प्रियालः)
मनःशिलाचूर्णफलः (कम्पिल्लकः)
यवफलः (कुटजः, वंशः)
राजीफलः (पटोलः)
दीर्घवृन्तफलः (श्योनाकः)
पीतफला (कण्टकारिका)

त्वगनुरूपाः पर्यायाः -

पृथक्त्वचा (मूर्वा)
बृहत्त्वक्कः (सप्तपर्णः)
बहुत्ववकः, मृदुत्वक् (भूर्जः)
बहलत्वक् (प्रियालः) (मधुशिग्रुः)
महात्वक्कः (सोमवल्कः)

कण्टकानुरूपाः पर्यायाः -

गुच्छककण्टकः (करञ्जः)
गोकण्टकः (गोक्षुरः)
स्वादुकण्टकः (कण्टकी)
कुटिलकण्टकः (खदिरः)

मूलानुरूपाः पर्यायाः -

जटा (मांसी)
जटिला (वचा)
बहुमूला (शतावरी)
श्वेतमूलः (पुनर्नवा)
ताम्रमूला (मञ्जिष्ठा)
दीर्घमूला (शालपर्णी यवासकश्च)

वृन्तानुरूपाः पर्यायाः -

कालवृन्ता (पाटला)
दीर्घवृन्तः (अरलुः)
रक्तवृन्तः (पुनर्नवा)

सारानुरूपाः पर्यायाः -

रक्तसारः (खदिरः)
श्यामसारः (कदरः)
गन्धसारः (तिनिशः)
ताम्रसारः (चन्दनः)
कृष्णसारा (शिंशपा)

क्षीरानुरूपाः पर्यायाः -

स्वर्णक्षीरी
क्षीरी (न्यग्रोधः)
बहुक्षीरः (स्नुही)

शब्दसम्बद्धाः पर्यायाः -

अतिरवा, महाघोषा (कर्कटश्रृङ्गी)
विस्फूर्जनी (तिन्दुकः)

स्पर्शानुरूपाः पर्यायाः -

कर्कशच्छदः (पटोलः)
मृदुपुष्पः (शिरीषः)
कर्कशपत्रकः (कम्पिल्लकः)
खरपत्रकः (शाकः)

Digitization by Arya Samaj Charitable Foundation, Chennai

सौश्रुत-निघण्टुः

रूपसम्बद्धाः पर्यायाः -
मयूरगलकोपमम् (तुत्थम्)
उत्पलम् (शशिप्रभम्)
गाडवफलः (परुषकः)
मेघवर्णा (जम्बूः)

रससम्बद्धाः पर्यायाः -
कषायफलपुष्पः (क्रमुकः)
तिक्ता
मधुरा (काकोली)
स्वादुरसा (मृद्वीका)
गुडपुष्पः (मधूकः)
कटुरोहिणी (कटुका)
मधुराम्लफलः (दाडिमः)
अम्लपुष्पफला (करमर्दी)
अलवणा (ज्योतिष्मती)

गन्धानुरूपाः पर्यायाः -
सुगन्धमूलभद्रा (सारिवा)
मार्जारगन्धा (मुद्गपर्णी)
मधुगन्धिकपुष्पः (अर्जुनः)
गन्धपत्रः (अग्निमन्थः)
महासुगन्धा (रास्ना)
तीक्ष्णगन्धः (शिग्रुः, फणिज्झकः)
सुगन्धिका (निर्गुण्डी)
हृद्यगन्धा (अजमोदा)
अगूढगन्धम् (हिङ्गु)
सुगन्धम् (पत्रम्)
उग्रगन्धा (वचा)
वृषगन्धिका (छगलान्त्री)
पूतिपत्रः (कट्वङ्गः)
पूतिवातः (बिल्वः)
सुरभिपत्रा (जम्बूः)
हृद्यगन्धः (कुस्तुम्बुरुः)

प्राणिसम्बन्धानुरूपाः पर्यायाः -
घुणवल्लभा (अतिविषा)
घुणेष्टा (दन्ती)
शाखामृगमुखप्रियः (राजादनः)
शुकवल्लभः (दाडिमः)
गजाशनः (अश्वत्थः)
मधुकरप्रियः (आम्रः)
भ्रमरेष्टा (जम्बूः)
अजप्रिया (शमी)

उद्भवसूचकाः पर्यायाः -
मरुसम्भवः (गुग्गुलः)
वंशभवा (तुगाक्षीरी)
शिलानिष्यन्दः (शिलाजतु)
दार्वीक्वाथोद्भवम् (रसाञ्जनम्)
नादेयः, निकुञ्जजः (श्यामा)
स्रोतोजम् (अञ्जनम्)
उत्तरापथिका (हैमवती)

बाह्योपयोगसूचकाः पर्यायाः -
अग्निनिर्मथनी (तर्कारी)
केशरञ्जनकः (सैरीयकः)
लाक्षाप्रसादनम् (लोध्रम्)
समिद्वृक्षः (पलाशः)
याज्ञेयः (कुशदर्भः)
स्रुववृक्षः (कण्टकी)

Digitization by Arya Samaj Charitable Foundation, Chennai

चर्मकषा (सप्तला)
द्वारदारुः (शाकः)
प्रसादनफलः (कतकः)
यज्ञयोग्यः (उदुम्बरः)
मद्यवासिनी (धातकी)

द्रव्यस्वभावसूचकाः पर्यायाः -

क्षेत्रविनाशिनी (कुरूटिका)
शोकनाशनः (अशोकः)
भूतनिवासः (विभीतकः)
अक्षपीडकः (शङ्खिनी)
नमस्करी (समङ्गा)
वृक्षरुहा (वृक्षादनी)

आमयोपयोगित्वसूचकाः पर्यायाः -

विषघ्नी (महाश्वेता)
शब्दशोधनम् (भूस्तृणम्)
कुष्ठघ्नी (काकमाची) (दार्वी)
प्राणदा, अमृता (हरीतकी)
मेध्या (वचा)
क्रिमिघ्ना - (हरिद्रा) (रसाञ्जनम्)
विषघ्नी (गवाक्षी)
चक्षुष्यफलः (कतकम्)
नेत्रभूषणम् (स्रोतोजम्)
जीवनीया (काकोली)
जारणम् (जीरकम्)
अतीसारभेषजम् (शाबररोध्रम्)
प्लिहापहः (रोहितकः)
मूषिकाणां विषघ्नः (देवदाली)
संग्राही (कपित्थः)
वर्णप्रसादनम् (कालेयकम्)
अक्षिभेषजा (अजशृङ्गी)
क्षुधाभिजनकः (क्षवकः)
शोषश्वासक्षयहिता (तुगाक्षीरी)
चक्षुष्यम् (प्रपौण्डरीकम्)

एतेन सौश्रुतनिघण्टुरचनायां द्रव्यविज्ञानायावश्यकाणां नाम-रूप-गुण-कर्माणां योगानाञ्च महत्त्वं सम्यगवधार्य यथोचितः सन्निवेशो विहित इति स्फुटं व्यज्यते ।

(घ) द्रव्यपर्यायाणां मौलिकत्वम् -

निघण्टुनिर्माणे तदाश्रयग्रन्थस्य सम्बद्धविषयस्य चावलम्बनं तदनुकूलं पर्यायाणां वर्णनं च न्याय्यं भवति । सौश्रुतनिघण्टुग्रन्थस्य सुश्रुतसंहिताश्रयत्वात् तत्र प्रदर्शितानां पर्यायाणां सुश्रुतसंहितायां प्रयोगानवलम्ब्य वर्णनमुचितं भवति । तेषां पर्यायाणां समाप्तावेव यद्वा पर्यायाणां तत्रानुपलम्भेऽन्यग्रन्थोक्तपर्यायाणां वर्णनं रुचिकरं भवति ।

सौश्रुतनिघण्टुग्रन्थे वर्णितेषु बहुषु द्रव्यपर्यायेषु बहुधा सुश्रुतसंहितायां पठिताः पर्यायाः एव तत्र पठिताः । तत्रानुपलब्धाः पर्यायाश्चरकसंहिताष्टाङ्गहृदय सिद्ध-सारसंहितादिग्रन्थेभ्यः सङ्कलिताः सन्ति । तेषामुदाहरणनि यथा -

Digitization by Arya Samaj Charitable Foundation, Chennai

अंशुमती (शालपर्णी)	– 'एलामंशुमती' (सु.सं., चि. ३।६०)
चतुरङ्गुलः (आरग्वधः)	– 'विशेषाच्चतुरङ्गुलात्' (सु.सं., सू. ४४।७३)
सर्जः (अजकर्णः)	– 'सर्जकेतकिभूषिता' (सु.सं., सू. ६।३२)
शोभाञ्जनः (मधुशिग्रुः)	– 'शोभाञ्जनकमार्कवौ' (सु.सं., चि. ७।२४)
इङ्गुदः (तापसवृक्षः)	– 'क्रिमिघ्नमिङ्गुदीतैलम्' (सु.सं., सू. ४५।११८)
कुलीरश्रृङ्गी (कर्कटश्रृङ्गी)	– (च.सं., सू. ४।३०)
उपलभेदकः (अश्मभेदः)	– 'वृश्चीवोपलभेदकैः' (अ.हृ.,चि. ११।२)
गालः (मदनः)	– 'पिप्पलीभिर्युतान् गालान्' (अ.हृ.,चि. १।६)

एतेन सौश्रुतनिघण्टुग्रन्थस्य मौलिकत्वं साधु प्रकाश्यते ।

(ङ) द्रव्यपर्यायाणां यथार्थाभिव्यञ्जकत्वम् –

सम्बद्धद्रव्याणां पर्यायवर्णने तेषां पर्यायशब्दानां द्रव्यगतगुणकर्मादीनां यथार्थतया निदर्शकत्वेनैव महत्वमुपयोगित्वञ्च सिध्यति । यथार्थवस्तुनिदर्शकाः पर्याया एव द्रव्याणां परिचये, तद्विषयकसन्देहनिरसने च समर्थाः सन्तो ग्रन्थस्य गौरवं जनयन्ति । अन्यथा तून्मत्तप्रलपितप्रायाः सन्तोऽनादृता हास्यहेतवश्च संजायन्ते।

सौश्रुतनिघण्टुग्रन्थे वर्णिताः पर्याया द्रव्याणां यथार्थस्वरूपनिदर्शकाः संशयव्यवच्छेदकाश्च प्रतीयन्ते । तेषामुदाहरणानि यथा –

- गोक्षुरस्य पर्यायः कण्टफलो निर्दिष्टः । तस्य फलेषु कण्टका दृश्यन्ते । तमेवार्थं 'कण्टकानि फले यस्य' इति विग्रहश्च समर्थयति ।
- पृश्निपर्ण्याः पत्रे विविधा वर्णा दृश्यन्ते । तदनुकूलः पर्यायः चित्रपर्णी इति वर्तते ।
- शतावर्याः सूक्ष्मपत्रवत्वं, तन्मूलस्य पीवरत्वं बहुत्वञ्च, सूक्ष्मपत्रा, पीवरी, बहुमूला, इत्याद्यैः पर्यायैः, प्रदर्शितं यथार्थमेव । सूक्ष्माणि पत्राणि यस्याः सा सूक्ष्मपत्रा । पीवरं (मूलं) यस्याः सा पीवरी । बहूनि मूलानि यस्याः सा बहुमूला ।
- कपिकच्छूः कण्डूकरी निर्दिष्टा ।
- वमनोपयोगिद्रव्येषु श्रेष्ठत्वेन प्रसिद्धो मदनः छर्दनो वामनश्च निर्दिष्टः ।
- विकङ्कतवृक्षस्य कण्टकितत्वं, तत्काष्ठस्य यज्ञेषु स्रुवरूपेण प्रयुक्तत्वञ्च कण्टकी, यज्ञवृक्षः, स्रुववृक्षश्चेति पर्यायैः प्रकाशितम् ।

Digitization by Arya Samaj Charitable Foundation, Chennai

सौश्रुत-निघण्टुः

- कुटजफलानां वंशप्रसवानाञ्च यववत् स्वरूपं यवफलः इति पर्यायेण दर्शितम्।
- निम्बवृक्षे हिङ्गुवदुग्रगन्धनिर्यासस्यास्तित्वं तस्य हिङ्गुनिर्यास इति पर्यायेण निरूपितम्।
- पटोलस्य फले लम्बरेखाया दर्शनं 'राजीफलः' इति पर्यायेण, पथ्यत्वं 'अमृत-फलः' इति शब्देन, पत्रस्वरूपं च 'कर्कशच्छदः' इति सूचितम्।

अन्ये च बहवस्तथाविधाः पर्याया ग्रन्थेऽस्मिन्नुपलभ्यन्ते –

खदिरस्य – बालपत्रः, दन्तधावनः, कुटिलकण्टकः।

भूर्जस्य – मृदुत्वक्कः, बहुत्वक्कः।

शिंशपायाः – कृष्णसारा, तीक्ष्णधूमा, अङ्गारसारा।

अगुरोः – कृष्णम्, नरेन्द्रार्हरजः, लोहम्, क्रिमिजग्धम्।

वरुणः – तिक्तशाकद्रुमः श्वेतपुष्पः।

शिग्रुकः – तीक्ष्णगन्धः।

बिम्बी– प्रवालाभफला।

बिल्वः – महाफलः, शलाटुद्रुमः, पूतिवातः।

श्योनाकः – गोपार्शुकाफलः, दीर्घवृन्तफलः।

पलाशः – त्रिवृन्तः, रक्तपुष्पकः, याज्ञेयः, समिद्वृक्षः।

कदम्ब – वृत्तपुष्पः, प्रावृषः, षट्पदेयः।

कदली– दीर्घपत्रा, सुकुमारा।

रास्ना – गन्धाढ्या।

अलवणा– पीततैला।

सुरसा – कृष्णा, सुमञ्जरी, सुरभी।

वज्रवृक्षः– बहुक्षीरः, महाद्रुमः।

हिङ्गु – अगूढगन्धम्, वास्तगन्धकम्।

तगरम् – कुटिलम्।

कोविदारः – छर्दनकः, यमलपत्रकः।

अरलुः श्योनाकश्चैतौ पृथक् पर्यायाणां पाठेन भिन्नौ सूचितौ। कट्वङ्गस्य पर्यायोऽरलुर्निगदितः। श्योनाकस्य भल्लूकः, दीर्घवृन्तफलः इत्याद्याः पर्याया वर्णिताः।

एवमेव अजश्रृङ्गी–मेषश्रृङ्ग्योः, तर्कार्यग्निमन्थयोः, तगरबालकयोश्च पर्यायाणां

Digitization by Arya Samaj Charitable Foundation, Chennai

पृथक्पठनेन भिन्नत्वं सूचितम्।

(च) पर्यायाणामनेकार्थकत्वम् -

सौश्रुतनिघण्टुग्रन्थे बहवः पर्याया एकाधिकद्रव्यवाचका निर्दिष्टाः सन्ति। तैः पर्यायैः तेषां द्रव्याणां परस्परं गुणकर्मादिसाम्यं ज्ञायते। तद् यथा -

अङ्गारवल्ली	=	शार्ङ्गेष्टा, भार्गी, गवाक्षी च।
अञ्जनिका	=	नीलिका, दधिल्लिका च।
अमरिका	=	इन्द्रवारुणी, निर्गुण्डी च।
अम्बष्ठा	=	पाठा, एकेषिका च।
उग्रगन्धा	=	अजमोदा, वचा च।
उद्दालकः	=	श्लेष्मातकः, कोविदारश्च।
ऊषणम्	=	पिप्पलीमूलम्, मरिचञ्च।
ककुदी	=	ऋषभः, कुचन्दनः, श्योनाकश्च।
कङ्गुका	=	ज्योतिष्मती, प्रियङ्गुश्च।
कट्फलः	=	काश्मरी, सोमवल्कः, अरिमेदश्च।
कण्टकी	=	विकङ्कतः, महाश्यामा च।
कालमालः	=	कृष्णार्जकः, अलम्बुसश्च।
कुष्ठघ्नी	=	काकमाची, दारुहरिद्रा च।
कृमिघ्नम्	=	विडङ्गम्, रसाञ्जनञ्च।
कृष्णम्	=	अगुरु, मरिचञ्च।
कृष्णा	=	पिप्पली, सुरसा च।
केशरम्	=	नागकेशरम्, पुन्नागकेशरञ्च।
क्षीरिका	=	राजादनः, पयस्या च।
गौरी	=	प्रियङ्गुः, हरिद्रा च।
जीवना	=	मेदा, ऋद्धिश्च।
ताम्रपुष्पा	=	पाटला, धातकी च।
तुण्डिकेरी	=	बिम्बी, कार्पासी च।
दीर्घपत्रकः	=	अश्वकर्णः, वञ्जुलश्च।
दीर्घमूला	=	शालपर्णी, यवासकश्च।
दीर्घायुः	=	जीवकः, अश्वत्थश्च।

Digitization by Arya Samaj Charitable Foundation, Chennai

सौश्रुत-निघण्टुः

पीतसारः	=	असनः, अक्कोल्लश्च ।
प्राणदा	=	हरीतकी, ऋद्धिश्च ।
बहलत्वक्	=	मधुशिग्रुः, प्रियालश्च ।
बहुकण्टकः	=	आर्तगलः, क्षुद्रश्वेता च ।
मङ्गल्या	=	वचा, शमी च ।
मधुपुष्पा	=	नागदन्ती, शतपुष्पा च ।
मधुरा	=	काकोली मेदा च ।
महाद्रुमः	=	स्नुही मधूकश्च ।
महापत्रः	=	तिल्वकः, शाकश्च ।
यवफलः	=	कुटजः, वंशश्च ।
याज्ञेयः	=	दर्भः, पलाशश्च ।
यामुनम्	=	शुक्तिः, स्रोतोजञ्च ।
रक्तपुष्पकः	=	पलाशः, रोहीतकश्च ।
रक्तसारः	=	खदिरः कुचन्दनश्च ।
रक्षोघ्नः	=	सर्षपः, बिम्बीतकश्च ।
रञ्जनः	=	कम्पिल्लकः, रोहिणी च ।
रोमशा	=	मांसी, वचा च ।
लता	=	प्रियङ्गुः, स्पृक्का च ।
वनस्पतिः	=	नन्दीवृक्षः उदुम्बरश्च ।
वरतिक्तः	=	पटोलः, रोहितकश्च ।
वराङ्गम्	=	चोचम्, बालकञ्च ।
वल्कलम्	=	लोध्रम्, चोचञ्च ।
वायसी	=	शार्ङ्गेष्टा, काकोदुम्बरिका च ।
विजया	=	तर्कारी, हरीतकी च ।
विषघ्नः	=	श्लेष्मातकः, सिन्दुवारश्च ।
वृत्तपुष्पः	=	शिरीषः, कदम्बो महाकदम्बश्च ।
शिखरी	=	कुन्दूरुकः, तिल्वकश्च ।
शीतः	=	चन्दनम्, श्लेष्मातकश्च ।
शुङ्गिः	=	न्यग्रोधः, प्लक्षश्च ।

डिल्ली रमण रेग्मी कल्याणी रेग्मी स्मारक पुस्तकालय
Dilli Raman Regmi Kalyani Regmi Memorial Library
Kathmandu, Nepal
काठमाडौं, नेपाल
No. 782

Digitization by Arya Samaj Charitable Foundation, Chennai

श्यामा	=	प्रियङ्गुः, मसूरविदला च।
श्रीनिकेतम्	=	नलिनम्, रक्तोत्पलञ्च।
श्रीमान्	=	ऋषभः, हरिद्रकश्च।
सदापुष्पः	=	अर्कः, रोहीतकश्च।
सारः	=	सालसारः, भूर्जश्च।
सिद्धकः	=	सिन्दुवारः, सिध्मकञ्च।
सुकुमारा	=	कदली, स्पृक्का, शङ्खिनी च।
सुगन्धः	=	खरपुष्पा (मरुवकः) तुरुष्कश्च।
सुगन्धकः	=	फणिज्झकः, सुगन्धकश्च।
सुरभी	=	शल्लकी, तुलसी, जम्बूश्च।
सूक्ष्मपत्रा	=	शतावरी, शमी च।

(छ) पर्यायाणां क्रमबद्धता व्यवस्था च -

सौश्रुतनिघण्टुग्रन्थे सुश्रुतसंहितायाः द्रव्यसंग्रहणीयाध्याये विविधगणेषु पठितानां द्रव्याणां प्रायो गणोक्तेन क्रमेणैव सर्वे पर्याया वर्णिताः सन्ति। तेषु गणेषु द्रव्याणां यानि नामानि पठितानि तान्येव प्रायेण श्लोकानामादौ पठितानि सन्ति।[४०]

पूर्वगणेषु पठितानां द्रव्याणां पुनरुक्तिनिरासाय तन्निदर्शकानि वाक्यानि सर्वत्र प्रयुक्तानि सन्ति।[४१] एषा पद्धतिरन्यग्रन्थेषु न दृश्यते।[४२]

(ज) अत्रोक्तानां पर्यायाणां ग्रन्थान्तरोक्तपर्यायैः साम्यम् -

अत्र वर्णिता वहवः पर्यायाः सुश्रुतसंहिताया विविधाध्यायेषु पठिताः सन्ति, ततः परं परवर्तिषु अमरकोशाष्टाङ्गसंग्रहादिषु च पर्यायरूपेण निर्दिष्टानि तत्स्थाने

४०. *"विदारिगन्धा विदारी विश्वदेवा सहदेवा श्वदंष्ट्रा पृथक्पर्णी शतावरी सारिवा जीवकर्षभकौ क्षुद्रसहा महासहा बृहत्यौ पुनर्नवैरण्डौ हंसपादी वृश्चिकाल्यृषभी श्रृगालविन्ना चेति।" - सु.सं.ह.(क), सू. ३८/३।*
'विदारिगन्धांशुमती' 'विदारीक्षुविदारी च' 'विश्वदेवा नागबला' 'सहदेवा देवसहा' 'श्वदंष्ट्रको गोक्षुरकः' - सौ.नि.,ह.(क), श्लो. १३-१७।

४१. *'मेषश्रृङ्गी पूर्वनामा सालसारादौ' '*
शतावरी विदारिगन्धादौ' - सौ.नि.,ह.(क)-श्लो.।

४२. "एतान्येव तु नामानि सुरसाया विभावयेत्। श्वेतायाः सुरसाह्वायाः शब्दैः पर्यायवाचकैः।" - सौ.नि.,ह. (क) - श्लो.१२४।

Digitization by Arya Samaj Charitable Foundation, Chennai

प्रयुक्तानि च सन्ति । तादृशैः पर्यायैः स्वेषां प्रयोगातिशयेनोपयोगविशेषः सूच्यते। तेषामुदाहरणानि यथा –

(अ) सुश्रुतसंहितायाम्, अमरकोशे, अष्टाङ्गसंग्रहे, अष्टाङ्गनिघण्टु-धन्वन्तरिनिघण्टु-सौश्रुतनिघण्टुषु चोपलभ्यमानाः पर्यायशब्दाः –

अंशुमती (विदारिगन्धा)	अम्बष्ठा	ककुभः
गाङ्गेरुकी (विश्वदेवा)	मधुरसा	लोहम्
कलशी	पिचुमर्दः	तीक्ष्णगन्धः
महासहा	मधुपर्णी	टुण्टुकः
आत्मगुप्ता	छिन्नरुहा	किंशुकः
गन्धर्वहस्तकः	भूनिम्बः	परिपेलवम्
चतुरङ्गुलः	गायत्री	सुरभी
करहाटकः	भद्रश्रियः	फञ्जी
विकङ्कतः	बीजकः	इङ्गुदी

(आ) अष्टाङ्गसंग्रहे सौश्रुतनिघण्टुग्रन्थे च समाना : पर्यायशब्दाः –

अग्निः	कुटरणा	पीततैला	वस्तान्त्री
अनन्ता	कोली	प्रत्यक्पुष्पी	व्याधिघातः
अमृता	द्वीपी	बहलपल्लवः	शिखरी
अरिष्टः	नमस्करी	वाणः	सदाफलः
कट्वङ्गः	पञ्चाङ्गुलः	बुकः	सूर्पपर्णी
कण्डूकरी	पार्था	योजनवल्ली	

(इ) सिद्धसारसंहितायां सौश्रुतनिघण्टुग्रन्थे च समाना : पर्यायशब्दाः-

स्थिरा	वसुस्रवा	निशा
तिक्ता	धावनी	वत्सादनी
नक्तमालः	वाजिकर्णः	झषा
श्रीपर्णी	द्रामिडी	टुण्टुकः ।

Digitization by Arya Samaj Charitable Foundation, Chennai

(ई) सिद्धसारनिघण्टुग्रन्थे समानाः पर्यायाः

लाङ्गूली	वक्रम्	अरलुः	किणिही
पिप्पलः	ह्रीबेरम्	ताम्रपुष्पी	मधुरिका
प्लक्षः	दधि	गोशीर्षम्	
प्ररोही	बहुकण्टकः	महाघोषा	
षड्ग्रन्था	तुण्डिकेरी	कुलजा	
दीप्यकः	वसुस्रवा	कृष्णार्जकः	

(उ) कैयदेवनिघण्टुग्रन्थे समानाः पर्यायाः –

वसन्तदूती	राजीफलः	सेतुवृक्षः
दीर्घायुः	जघनेफला	स्निग्धपिण्डीतकः
तृणकेतुः	घृतमण्डालसा	गन्धपिण्डीतकः
कृष्णपाकफला	देवश्रेणी	उद्दालकः
विस्फूर्जनी	सस्यसंवरणः	रक्तचूर्णकः

(ऊ) हृदयदीपके समानाः पर्यायाः

खरमञ्जरी	परिभाव्यम्	क्षीरिका
आघाटः	कुस्तुम्बुरु	एडगजः
शुभा	अल्लका	सोमवल्कः
सोमराजी	गाङ्गेयी	रूपिका

(ऋ) सौश्रुतनिघण्टुग्रन्थे पठितानां द्रव्यपर्यायाणामर्थभेदाः

बहुषु स्थलेषु सौश्रुतनिघण्टुग्रन्थे द्रव्यविशेषस्य पर्यायत्वेन पठिताः शब्दा अन्यनिघण्टुषु अन्यद्रव्यवाचकाश्च सन्ति निर्दिष्टाः । तादृशैः शब्दैः सौश्रुतनिघण्टु-प्रयुक्तानां पर्यायाणामर्थविशेषे शक्तिग्रहः समभिव्यज्यते तद्विवरणं यथा –

सौश्रुतनिघण्टुग्रन्थे पठितः पर्यायशब्दः	तत्र तेन निर्दिष्टोऽर्थः	अन्यनिघण्टुषु निर्दिष्टा अर्थाः
अक्षिभेषजा	अजश्रृङ्गी	लोध्रः (अ.ह.)

Digitization by Arya Samaj Charitable Foundation, Chennai

अनन्ता	यवासकः	दूर्वा, बहुला च।
अम्बष्ठा	पाठा, एकेषिका	अङ्गारवल्ली, अम्बिका, पाठा, यूथिका।
अरलुः	कट्वङ्गः	श्योनाकः
अरिष्टः	निम्बः	निम्बः, किराततिक्तः, रसोनश्च।
अरिष्टा	कटुका	कटुका, गाङ्गेरुकी।
कटभी	महाश्वेता	अश्वक्षुरकः,
	क्षुद्रश्वेता	ज्योतिष्मती च।
कषायी	सर्जः	सर्जः, लकुचः।
काकादनी	गृध्रनखी	श्वेतकाम्भोजी।

(३) द्रव्यसंग्रहाध्यायोक्तद्रव्याणां विविधगणेषु सन्निवेशविषयकं वैशिष्ट्यम्-

सुश्रुतसंहिताया द्रव्यसंग्रहणीयाध्याये विविधगणेषु पठितानां द्रव्याणां प्रायः तत्रोक्तेनैव सर्वेषां गणानां क्रमेण, गणेषु द्रव्याणां च क्रमेण पर्याया वर्णिताः सन्ति। परं द्रव्यसंग्रहाध्यायस्य मूलपाठः हस्तलिखितग्रन्थेषु मुद्रितग्रन्थेषु च किञ्चिद् भिन्नरूपोऽस्माभिरासादितः। हस्तलिखितग्रन्थेष्वपि परस्परं बहुशः पाठभेद उपलभ्यते। सुश्रुतसंहिताया हस्तलिखितग्रन्थान्तर्गतो द्रव्यसंग्रहणीयाध्याय एव सौश्रुतनिघण्टुग्रन्थ-स्याधारो वर्तते विशेषेण। परं तत्रापि क्वचित् गणक्रमभङ्गः, गणेषु द्रव्याणां क्रमभङ्गः, गणोक्तद्रव्याणां पर्यायाद्यनुल्लेखः, अनुक्तद्रव्याणां पर्यायवर्णनश्च विहितं दृश्यते। तद्विवरणं यथा –

(अ) द्रव्यसंग्रहाध्याये हस्तलिखितग्रन्थेषु प्रथमं प्रियंग्वादिरनन्तरं चाम्बष्ठादिर्गणः पठितः। मुद्रितेऽपि तत्र तथैव पाठ आस्ते। परं सौश्रुतनिघण्टुग्रन्थे प्रथममम्बष्ठादिगणोक्तानां द्रव्याणां पर्यायाः प्रकाशिताः सन्ति।

(आ) विविधगणेषु द्रव्याणां क्रमभङ्गविषयेऽल्पान्युदाहरणानि प्राप्यन्ते।

सु.सं.,ह. (क) द्रव्यसं.	सु.सं.,म., द्रव्यसं.	सौ.नि.,ह. (क)
– सालसारादिगणेखदिरात्परं क्रमुकः, भूर्जः इत्यादीनि द्रव्याणि पठितानि।	तत्र कदर–कालस्कन्धौ पठितौ, ततः क्रमुकादयः पठिताः।	खदिरात्परं कदरस्य पर्यायाः पठिताः, तस्यैव पर्यायत्वेन कालस्कन्धो निर्दिष्टः ततः परं क्रमुकः पठितः।

Digitization by Arya Samaj Charitable Foundation, Chennai

– वीरतरादिगणे वीरतरात्परं सहचरद्वयं, सैरीयकः, दर्भः, वृक्षादनी च पठिताः ।	वीरतरात्परं सहचरद्वयं वर्तते, सैरीयको नास्ति । ततो दर्भादयः सन्ति ।	वीरतरोः परं वृक्षादनीपर्यायाः पठिताः। सहचरादीनां कश्चन सङ्केतो नैव विहितः ।

(इ) गणोक्तद्रव्याणां पर्यायानुल्लेखः

सु.सं., ह.(क) द्रव्यसं. सू.३८ अ.	सु.सं., (मु.) द्रव्यसं. सू ३८ अ.	सौ.नि.,ह.(क)(ख)
– एलादिगणे केवलंत्वक् पठिता ।	तत्रत्वक् चोचश्च पृथक् पठितौ ।	चोचस्य पर्यायस्त्वक् निर्दिष्टः, तेन तयोरैक्यं च सूचितम् ।
– श्यामादिगणे रम्यकः पठितः ।	तत्र रम्यकः पठितः ।	रम्यकस्य नास्त्युल्लेखः।
– काकोल्यादौ कासीसद्वयं पठितम् ।	तथैव ।	एकस्य कासीसस्य पर्यायाः पठिताः ।
– अत्र त्रप्वादि–लाक्षादी गणौ पठितौ ।	तथैव ।	द्वयोरेव नास्त्युल्लेखः ।

(ई) गणेष्वनुक्तानां पर्यायवर्णनम् –

– वरुणादौ शिग्रुः न पठितः ।	शिग्रुः पठितः ।	शिग्रुपर्यायाः पठिताः ।
– वचादौ अभया न पठिता ।	अभया वर्तते ।	पूर्वनिर्देशवाक्ये तस्या उल्लेखो विहितः – 'हरीतकी पूर्वनामा मुष्ककादौ' इति ।
– मुस्तादौ कुष्ठं न पठितम् ।	तत् पठितम् ।	कुष्ठस्य सङ्केतो विहितः ।

१०. ग्रन्थसम्पादनस्यौचित्यं तत्प्रकाशनस्यावश्यकता च–

आयुर्वेदवाङ्मये सौश्रुतनिघण्टुग्रन्थः संहिताग्रन्थेषु विशिष्टं सुश्रुतसंहिता-ग्रन्थमवलम्ब्य विरचितत्वेन, उपलभ्यमाननिघण्टुग्रन्थापेक्षया विषयोपन्यासादि-विशिष्टत्वेन, पर्यायमात्रानुशीलनपरत्वेऽपि स्वरूपादिवर्णनेऽपि प्रदर्शितानुपमसौष्ठवेन

Digitization by Arya Samaj Charitable Foundation, Chennai

महत्त्वपूर्णोऽप्रकाशितश्चास्ति ।

एतद्विषये पूर्वं नेपालराजगुरुणा पं. हेमराजशर्मणा काश्यपसंहिताया उपोद्घाते सूचना विहिता, परतश्च विदुषाऽचार्यप्रियव्रतशर्मणा स्वविरचिते आयुर्वेदेतिहासग्रन्थे संहितोत्तरनिघण्टुरिति तन्नामकरणपुरस्सरं सङ्केतो विहितः । इतः पञ्चाशदब्दाधिककालात्पूर्वं वैक्रमे १९९५ वत्सरे सूचितस्याप्यस्य ग्रन्थस्य विषये नाद्यापि विशेषविवरणपुरस्सरं परिचयः केनापि प्रकाशित इत्यनेन जिज्ञासुविद्वन्मण्डलस्य कृते विस्मयस्य खेदस्य चावसरः सहैव दीयमानोऽस्माभिरनुभूतः । अपेक्षितं समयमतिहाय प्रयुक्तानि साधनानि नैव फलन्ति, कस्यापि हितं वा साधयन्ति । एतद्दृष्ट्या एतद्ग्रन्थस्य सुसम्पादनपुरस्सरं शीघ्रातिशीघ्रं प्रकाशनं नितरामपेक्षते ।

नेपालसर्वकारस्य राष्ट्रियस्वास्थ्यनीतिकार्यक्रमे स्वदेशे विद्यमानानामायुर्वेदस्य हस्तलिखितग्रन्थानां संरक्षणसंवर्द्धनयोरप्युल्लेखो वर्तते। एतत्कार्यसम्पादनाय विशिष्टं दायित्वं महेन्द्रसंस्कृतविश्वविद्यालयस्यैव भवति । यतो हि संस्कृतभाषायां प्राचीनलिपिसु ग्रन्थोऽयमस्ति विलिखितः ।

एतेन विश्वविद्यालयेन हस्तलिखितानां संस्कृतग्रन्थानां समुद्धाराय ग्रन्थसम्पादनकार्यक्रमः स्थापनाकालादेव प्रारब्धः । तदन्तर्गतयोजनानुसारमेवायं सौश्रुतनिघण्टुग्रन्थोऽस्माभिः सम्पादितोऽस्ति ।

एतद्ग्रन्थस्य सम्पादनप्रकाशनाभ्यां प्राचीनकालादेवास्माकं नेपालदेशे प्रवृत्तायाः शास्त्रसंरक्षणपरम्परायाः साधु निर्वाहः, राष्ट्रियाभिलेखालय-केशरपुस्तकालयप्रभृतिषु पुस्तकालयेषु संरक्षितानां हस्तलिखितानां संस्कृतोपनिबद्धानां दर्शनविज्ञानादिविषयकाणां बहूनां ग्रन्थानां प्रकाशनादौ प्रोत्साहनं, विदुषां ज्ञानामृतवितरणपुण्यार्जनं, नेपालदेशस्य तत्रत्यानां विदुषाञ्च गौरववर्द्धनं सहैव भवितुमर्हति। एतत्संयोजकत्वेन महेन्द्रसंस्कृतविश्वविद्यालयोऽपि चिरं विदुषां साधुवादभाजनं सुविधानिकेतनत्वेन महद्यशोविद्योतितं च भविष्यतीत्याशास्यते ।

११. कृतज्ञत्वनिवेदनमुपसंहारश्च -

अस्य सौश्रुतनिघण्टुग्रन्थस्य सम्पादनकार्ये प्रेरणया तत्कृते व्यवस्थासम्पादनेन महेन्द्रसंस्कृतविश्वविद्यालयस्योपकुलपतिना विदुषा माधवराजगौतममहोदयेन, शिक्षाध्यक्षेण विदुषा डा. वावुरामपोखे्रलमहोदयेनाप्यनुसन्धानकेन्द्रान्तर्गतग्रन्थ-

Digitization by Arya Samaj Charitable Foundation, Chennai

परिशिष्टम्

सम्पादनकार्यक्रमे एतद्विषयकग्रन्थसम्पादनकार्यस्वीकृत्या तत्कृते विद्वद्वृत्तिप्रदानेन सामग्रीक्रयार्थमपेक्षितद्रव्यराशेः पृथगर्पणादिना बहुधा सम्भावितोऽस्मि । एषां महानुभावानां महान्तमुपकारं सर्वदा स्मरणीयं विभावयाम्येतेषां भगवतः पशुपतिनाथस्य कृपया समेधतां सर्वतोमुखं माहात्म्यमिति च प्रार्थयामि ।

एतद्ग्रन्थसम्पादनक्रमेऽवेक्षणीयानां बहूनां दुर्लभग्रन्थानां प्रदानेन, ग्रन्थपाठलेखने पाठसंशोधने भूमिकायाश्च लेखने यथोचितपरामर्शप्रदानेन, सौश्रुतनिघण्टुग्रन्थे पर्यायैर्वर्णितानां द्रव्याणां नेपालीलेटिनभाषयोः पर्यायलेखने च सहकार्यं कुर्वता डा. नरेन्द्रनाथतिवारिमहोदयेनोपकृतोऽस्मि ।

ग्रन्थसम्पादनायापेक्षितानां हस्तलिखितसुश्रुतसंहिताग्रन्थानां पठनव्यवस्थया छायाप्रतिलिपीनां प्रदानेन, सम्पादनान्ते प्रकाशनार्थं स्वीकृतिसौजन्येन आवश्यकविविधव्यवस्थाभिश्च यैः प्रोत्साहितोऽस्मि तान् सर्वान् महेन्द्रसंस्कृतविश्वविद्यालयस्य कुलसचिव डा. भोजराजपन्तमहाभागम्, अनुसन्धानकेन्द्रस्य कार्यकारिनिर्देशकप्रा. नीलमणिढुंगानामहोदयम्, डा. लोकेन्द्रमानसिंहमहोदयम्, राष्ट्रियाभिलेखालय-केशर-पुस्तकालय-राजकीय-प्रज्ञा-प्रतिष्ठानादिसम्बद्धान् संस्थाध्यक्षान् श्रीसानीमैयाँ-राणा-श्रीपुरुषोत्तमघिमिरेप्रभृतीन् अन्याँश्चाधिकारिणः साधुवादैः सभाजयामि ।

एवमेव ग्रन्थान्वेषणेऽपेक्षितसन्दर्भसूचनया, कालगणनायां, लिपिविज्ञाने च साहाय्येनापेक्षितग्रन्थप्रदानेन च बहुभिरुपकृतोऽस्मि – श्रीज्ञानमणि नेपाल-महेशराज पन्त-बलरामप्रसाद लामिछाने-डा. श्याममणि अधिकारी-डा. टीकाराम अधिकारी-काशीनाथ तमोट-प्रभृतिभिः । एतानपि साधुवादैः सभाजयामि ।

ग्रन्थसम्पादनक्रमे विषयाणां समीक्षायां पाठपरिमार्जने च बहूनां ग्रन्थानां परिशीलनमावाभ्यां विहितम् । तेषां साहाय्यं मार्गदर्शनं विनाकार्यमिदं दुष्करमासीत्। तदर्थं तेषां ग्रन्थानां रचयितारः, सम्पादकाः प्रकाशकाश्चास्माकं सम्मान्याः साधुवादार्हाश्चेति विभावयामि ।

अस्मिन् कार्ये आयुर्वेदविद्यापीठस्य प्राध्यापकानां पुस्तकालयपरिवारस्य च यथेष्टं साहाय्यमस्माभिरासादितम् । एतेषामपि सहयोग आवयोः प्रीतिवर्द्धनोऽभवदित्यर्थमेतेषां योगदानमप्यविस्मरणीयं मन्ये ।

इत्थं भगवतः पशुपतिनाथस्य, देव्या गुह्यकाल्याः, गुरुवर्याणाञ्चाशीः परम्परया, विदुषामन्येषां प्रत्यक्षं परोक्षं सर्वथाऽधिगतेन साहाय्येन च यथामति सम्पादनं विधाय

Digitization by Arya Samaj Charitable Foundation, Chennai

सौश्रुत-निघण्टुः

ग्रन्थोऽयमायुर्वेरसिकाणां विदुषां समक्षमुपायनरूपेणावाभ्यां समर्प्यते । सदसद्व्यक्ति-हेतवः सन्तः प्रयासस्यास्य विशुद्धिं श्यामिकां च यथोपलब्धां विमृश्यास्मान् सम्भावयिष्यन्तीत्याशास्यते ।

धन्वन्तरिस्मरणलब्धमहाप्रभावो
द्रव्याभिधानपरिवर्णनसुप्रतिष्ठः ।
श्रीसौश्रुतोऽस्तु प्रथितो हि निघण्टुराद्यो
विद्वन्मुदे सततमेष गुरुप्रसादात् ।।

भाद्रशुक्लपूर्णिमा, २०५६ डा. काशीराज शर्मा सुवेदी

ॐ तत्सत्



Digitization by Arya Samaj Charitable Foundation, Chennai

परिशिष्टम्

ग्रन्थसङ्केतसूची

अ.को. =	अमरकोशः ।
अ.नि. =	अष्टाङ्गनिघण्टुः ।
अ.हृ. =	अष्टाङ्गहृदयम् ।
कै.नि. =	कैयदेव-निघण्टुः ।
च.सं. =	चरकसंहिता ।
ध.नि. =	धन्वन्तरिनिघण्टुः ।
म.नि. =	मदनपालनिघण्टुः ।
रा.नि. =	राजनिघण्टुः ।
सि.सा.नि. =	सिद्धसारनिघण्टुः ।
सु.सं.,मु. =	सुश्रुतसंहिता (मुद्रिता)
सु.सं.,ह. (क) =	सुश्रुतसंहिता हस्तलिखिता, सूक्ष्मच्छविचित्र सङ्ख्या B29/19
सु.सं.,ह. (ख) =	सुश्रुतसंहिता हस्तलिखिता, सूक्ष्मच्छविचित्र सङ्ख्या C80/7
सु.सं.,ह. (ग) =	सुश्रुतसंहिता हस्तलिखिता, सूक्ष्मच्छविचित्र सङ्ख्या B30/15
सु.सं.,ह. (घ) =	सुश्रुतसंहिता हस्तलिखिता, सूक्ष्मच्छविचित्र सङ्ख्या A45/5
सु.सं.,ह. (ङ) =	सुश्रुतसंहिता हस्तलिखिता, सूक्ष्मच्छविचित्र सङ्ख्या A224/9

सु.नि., ह. (क)
सौ.नि., ह. (क) = सौश्रुतनिघण्टुः (सु.सं., ह. (क) ग्रन्थान्तर्गतः)
सु.नि., ह. (ख)
सौ.नि., ह. (ख) = सौश्रुतनिघण्टुः (सु.सं., ह. (ख) ग्रन्थान्तर्गतः)
सु.नि., ह. (ग)
सौ.नि., ह. (ग) = सौश्रुतनिघण्टुः (सु.सं., ह. (ग) ग्रन्थान्तर्गतः)

सू. =	सूत्रस्थानम् ।
नि. =	निदानस्थानम् ।
चि. =	चिकित्सास्थानम् ।
उ. =	उत्तरतन्त्रम् ।
क. =	कल्पस्थानम् ।

Digitization by Arya Samaj Charitable Foundation, Chennai

सौश्रुतनिघण्टुः

Digitization by Arya Samaj Charitable Foundation, Chennai

Digitization by Arya Samaj Charitable Foundation, Chennai

ॐ

सौश्रुतनिघण्टुः

ॐ नमः सर्वज्ञायानुत्तरवैद्यराजाय ।
हिमवच्छैलकुञ्जस्थं सुमनस्कं महौजसम् ।
शीर्णपर्णफलाहारमायुर्वेदविशारदम् ।।१।।

कृताग्निकृत्यमासीनं पूतवल्कलधारिणम् ।
धन्वन्तरिं धर्मभृतां वरिष्ठममृतोद्भवम् ।।२।।

सुश्रुतप्रमुखाः शिष्याः पप्रच्छुर्भिषजो भृशम् ।।
भगवान् भेषजानां ते यत् पूर्वं समुदाहृतम् ।।३।।

प्रव्यक्तिं कारणं देव तेन सर्वं न विद्यते ।।
बहूनि नामधेयानि भेषजानां बहुश्रुत ।।४।।

श्रूयन्ते देशभाषाभिस्तेन[१] मोहो हि नो महान् ।
नानादेशाभिलग्नानां द्रव्यनाम्नां पृथक् पृथक् ।
प्रव्यक्तिं कारणं तन्नो भवेन्मोहप्रशान्तये ।।५।।

किञ्चित् सदपि भैषज्यमनामज्ञश्चिकित्सकः ।
पश्यन्नपि न जानीते तेन बुद्धिर्विहन्यते ।।६।।[२]

---

१. *देशभाषाशब्दप्रयोगोऽयं ग्रन्थनिर्माणसमये बहूनां भाषाणां विकासं ज्ञापयति ।*

२. *एतत्समानार्थं पद्यं द्रव्यावल्यां (धन्वन्तरि निघण्टुपूर्वायां) दृश्यते। तद् यथा - "अनामविन्मोहमुपैति वैद्यो न वेत्ति पश्यन्नपि भेषजानि ।" इति - ध.नि. (द्रव्यावली), पृ. २.(१) ।*

Digitization by Arya Samaj Charitable Foundation, Chennai

तस्मात् सर्वाणि नामानि देशभाषाविभागशः ।
औषधीनां समाचक्ष्व सर्वौषधविशारद ।।७।।

इत्युक्तो भगवाञ्छिष्यैः काशिराज उदारधीः ।
मनः प्रह्लादयँस्तेषां प्रत्युवाचामलं वचः ।।८।।

वत्साः साध्वर्थवान् प्रश्नो भवद्भिरयमीरितः ।
अपृष्टेनापि वक्तव्यं प्रजानां हितमिच्छता ।।९।।

छन्दसां गतिमावृत्य वर्णानां गुरुलाघवात् ।
नानादेशप्रसूतानां शिष्या शृण्वानबोधिना ।।१०।।

पाटवाद्यवकामाच्च नानाभाषाभिलाषिणाम् ।
द्रव्याणां यः समाख्यातो विस्तरस्तस्य वक्ष्यते ।।११।।

गणा विदारिगन्धाद्या य उक्ता द्रव्यसंग्रहे ।[३]
एकैकमौषधास्तेषां शब्दैः पर्यायवाचकैः ।।१२।।

एकैकेनैव वक्ष्यामि श्लोकेनैवानुपूर्वशः ।

३. *अत्र 'द्रव्यसंग्रहे' इति पदेन सुश्रुतसंहितायाः सूत्रस्थानेऽष्टत्रिंशत्तमः द्रव्यसंग्रहणीयाध्यायःपरामृश्यते। तत्र विदारिगन्धादिगणेषु येषां द्रव्याणां नामानि पठितानि तेषां तेनैव क्रमेण पर्याया अत्र विवक्षिताः ।*

Digitization by Arya Samaj Charitable Foundation, Chennai

।। विदारिगन्धादिः ।।

विदारिगन्धांशुमती सालपर्णी[1] त्रिपर्ण्यपि ।।
स्थिरा च दीर्घमूला च ध्रुवा चापि प्रकीर्तिता ।।१३।।

विदारीक्षुविदारी च वलीकन्दः पलाशकः[2]।
गजवाजिप्रिया चैव सैव क्षीरविदारिका ।।१४।।

विश्वदेवा नागबला झषा ह्रस्वगवेधुका[3] ।
खरगन्धनिका[4] घोण्टा[5] तथा गाङ्गेरुकी च सा ।।१५।।

सहदेवा देवसहा[6] मङ्गल्यार्थप्रसाधनी ।
वर्षपुष्पी महागन्धा गन्धमल्ल्यपि चोच्यते ।।१६।।

श्वदंष्ट्रको गोक्षुरकः स्थलशृङ्गाटकस्तथा ।
त्रिकण्टकः कण्टफलः स्मृतो गोकण्टकश्च सः ।।१७।।

पृथक्पर्णी पृश्निपर्णी कलशी चित्रपर्ण्यपि[7] ।
शृगालविन्ना लाङ्गूली[8] सैव क्रोष्टुकपुच्छिका ।।१८।।

शतावरी सूक्ष्मपत्रा पीवरीन्दीवरी च सा ।
अभीरुर्बहुमूला च जटामूला च शब्दिता ।।१९।।

---

१. *शालपर्णी – अ.नि.श्लो.१८ ।*
२. *पलाशिका – अ.नि., श्लो.१८ ।*
३. *अश्वगवेधुका – अ.नि.श्लो.११/सु.सं., ह. 'क' ग्रन्थे 'प्रास्तगवेधुका इति पाठः 'ह्रस्वगवेधुका' इति संशोधितो दृश्यते । अमरकोशेऽपि 'ह्रस्वगवेधुका' एवास्ति । यस्य व्याख्यासुधायां 'ह्रस्वा चासौगवेधुका च' इति विग्रहोऽस्ति निर्दिष्टः ।*
४. *खरगन्धिनिका – ध.नि.पृ.६५। (१)*
५. *घण्टा – कै.नि., पृ. १९५ ।*
६. *देवगन्धा – ध.नि., पृ.६५ ।*
७. *स्निग्धपर्णिका–कै.नि.,पृ.१२ । चित्रपर्णी – अ. को. पृ. १६२ ।*
८. *इतः परं "वरतिक्ता च पाचनी' (श्लो.सं. ३९) पर्यन्तो भागः हस्तलिखिते 'ख' सुश्रुतग्रन्थे नोपलब्धः ।*

Digitization by Arya Samaj Charitable Foundation, Chennai

सारिवा गोपवल्ली[१] च तथा चोत्पलसारिवा ।
सुगन्धमूलभद्रा च कृष्णवल्ल्यपि[१०] चोच्यते ।।२०।।

जीवकः प्रियनामा च दीर्घायुः कूर्चशीर्षकः ।
मङ्गल्यनामधेयश्च प्रायः[११] स्वाङ्गश्च[१२] कीर्तितः ।।२१।।

ऋषभः ककुदी श्रीमान् विकर्णी[१३] गोपतिस्तथा ।
धूर्धरो[१४] बन्धुरो वीरः[१५] पृथिवीपतिरेव च ।।२२।।

महासहा महापर्णी सिंहविन्ना तथैव च ।
पाण्डुरोमशपर्णी च हंसमासा[१६] च शब्दिता ।।२३।।

क्षुद्रसहा मुद्गपर्णी सूर्पपर्णी[१७] तथैव च ।
स्वनुमार्जारगन्धा[१८] च काकमुद्गा च कीर्तिता ।।२४।।

बृहती कण्टकारी च वार्ताकी दुःप्रधर्षणी ।
सिंही भण्टाकिनी चैव क्षुद्रिका च प्रकीर्तिता ।।२५ ।।

वृषभी राष्ट्रिका क्षुल्ली[१९] तथा पीतफलेति च ।
क्षवप्रचोदनी व्याघ्री सैव प्रोक्ता निदिग्धिका ।।२६।।

---

९. मूले 'गोपवल्या' इति पाठः । अन्यनिघण्टुषु 'गोपवल्ली' इति पाठस्य दर्शनात् संशोधितः ।
१०. कै.नि. ग्रन्थे 'कृष्णवल्ली कृष्णसारिवायां निर्दिष्टा ।
११. प्रियः श्रेयः – कै.नि., पृ. २० ।
१२ ह्रस्वाङ्ग : – अ.को.,पृ.१७६;ध.नि.पृ.३० ।
१३. विषाणी – ध.नि., पृ. ३० ।
१४. दुर्धरः – कै.नि., पृ.२० ।
१५. धीरः – ध.नि., पृ.३० ।
१६ हंसमाषा – कै.नि. पृ. २३ ।
१७. सूप्यपर्णी – अ.नि., श्लो. ११। शूर्पपर्णी–ध.नि.,पृ ३२ ।
१८. मार्जारगन्धिका – अ.नि.श्लो.११ । महामार्जारगन्धिका-कै.नि.पृ.१३ ।
१९. कुली – अ.को., पृ. १६० ।

Digitization by Arya Samaj Charitable Foundation, Chennai

पुनर्नवा [२०]ऋषभकेतुर्महावर्षाभूरेव च ।
वृश्चीको[२१] दीर्घवर्षाभूः श्वेतमूलश्च कीर्तितः ।।२७।।

पुनर्नवो द्वितीयस्तु रक्तवृन्तः[२२] कठिल्लकः ।
वैशाखश्च[२३] शिनाटी[२४] च क्षुद्रवर्षाभूरेव च ।।२८।।

एरण्डश्चोरुबूकश्च चित्रो गन्धर्वहस्तकः ।
अमण्डको वर्धमानः स च पञ्चाङ्गुलो मतः ।।२९।।

हंसपादी त्रिपादी च घृतमण्डालसा[२५] च सा ।
रक्तपादी पदाह्वा च कीर्तिता च मधुस्त्रवा ।।३०।।

वृश्चिकाली[२६] तथा काली विषघ्नी च प्रकीर्तिता ।
उष्ट्रधूमकपुच्छा च विषाणी सर्पदंष्ट्रयपि[२७] ।।३१।।

अकाशी ऋषभी चैव कपिकच्छूर्दुरालभा ।
आत्मगुप्ता स्वयंगुप्ता सैव कण्डूकरी मता ।।३२।।

विदारिगन्धादिरयं गणः पित्तानिलापहः ।
शोफ[२८]गुल्माङ्गमर्दोर्ध्वश्वासकासविनाशनः ।।३३।।

---

२०. अत्र 'ऋषभकेतुः इति पदं वर्णाधिकं प्रतीयते । ध.नि.ग्रन्थे 'वर्षकेतुः' इति पदं दृश्यते । (पृ.६३)

२१. वृश्चीरः- ध.नि.पृ. ६३ । तत्रैव 'वृश्चिकः' इति पाठान्तरञ्च टिप्पण्यां सूचितम् । वृश्चीवः - अ.नि., श्लो.८।

२२. रक्तपुष्पः -अ.नि., श्लो.९ । कै.नि. ग्रन्थे (पृ.१३९) तस्य रक्तपुष्पः, रक्तवृन्तकः इति पर्यायौ स्तः ।

२३. विशाखः - ध.नि., पृ ६२ ।

२४. सुनाडिकः - अ.नि., श्लो.९ ।

२५. 'घृतमण्डालसेलका' - कै.नि., पृ. १४१ । घृतमण्डलिका - ध.नि;पृ १५६ ।

२६. वृश्चिकाली कै.नि. ग्रन्थे मेषशृङ्गीभेदरुपा निर्दिष्टा - 'द्वितीया दक्षिणावर्ता वृश्चिकाली सपुच्छिका'। (इति (पृ.१३६)

२७. सर्पदंष्ट्रिका - अ.नि., श्लो.८ ।

२८. 'शोष' इति पाठः - सु.सं., मु.(१), सू.३८।५।

Digitization by Arya Samaj Charitable Foundation, Chennai

।। आरग्वधादिः ।।

आरग्वधो राजवृक्षः शम्पाकश्चतुरङ्गुलः ।
आरेवतो व्याधिघातः कृतमालश्च शब्दितः ।।३४।।

मदनः शल्यको गोलो गालश्च करघाटकः[१] ।
छर्दनो वामनश्चैव विषपुष्पश्च कीर्तितः ।।३५।।

कर्कन्धूर्गोपघोण्टा च राजा कण्टककोलिका ।
बदरी मर्कटानाञ्च शब्दैः पर्यायवाचकैः।।३६।।

कण्टकी यज्ञवृक्षश्च स्रुवावृक्षश्च शब्दितः।
वैकङ्कतश्च वृक्षश्च ग्रन्थिलः स्वादुकण्टकः ।।३७।।

कुटजश्चेन्द्रवृक्षश्च वृक्षकः पाण्डुरद्रुमः ।
वरतिक्तो यवफलस्तथा शक्रयवोऽपि च ।।३८।।

पाठाम्बष्ठा वनतिक्ता पाचनी[२] दीपनी तथा ।
चैलिका स्थावरी चैव यूषपर्णी[३] च कीर्तिता ।।३९।।

पाटला कालवृन्ता च ताम्रपुष्पा फलेरुहा ।
वसन्तदूती स्थाली च सैव तोयाधिवासिनी ।।४०।।

मूर्वा मधुरसा चैव लघुपर्णा[४] पृथक्त्वचा ।
मध्वाशया मधुवती देवश्रेणी[५] च कीर्तिता ।।४१।।

---

१. 'कारहाटकः' – अ.नि.श्लो.७७।अ.को.पृ.१४६ ।
२. प्राचीना – अ.को; पृ. १५७ । अ.नि; श्लो.३५ ।
३. विद्धकर्णी – अ.को;पृ. १५७ । वृत्तपर्णी – ध.नि;पृ.२० ।
४. लघुपर्णिका – रा.नि., पृ. ९ ।
५. 'रेवा श्रेणी च' मूले पाठः (सु.नि.,ह.(क)(ख) । ध.नि;रा.नि. ग्रन्थयोः – देवश्रेणी, पृ. ११२।

Digitization by Arya Samaj Charitable Foundation, Chennai

सप्तपर्णो बृहत्त्वक्षो[६] गुच्छपुष्पोऽपि चोच्यते ।
सप्तच्छदः शुक्तिपर्णश्छत्रपर्णश्च[७] शब्दितः ।।४२।।

निम्बश्च पिचुमर्दश्च[८] हिङ्गुनिर्यासकस्तथा ।
अरिष्टः सर्वतोभद्रो यवनेतश्च[९] कीर्तितः ।।४३।।

दासीकुरण्टको वाणो मृदुकण्टक एव च ।
सैरीयकः सहचरः पर्णाढ्यश्च[१०] विभाषितः ।।४४।।

गुडूच्यमृतवल्ली च कुण्डली मधुपर्ण्यपि ।
तथा छिन्नरुहा चापि शब्दैः पर्यायवाचकैः ४५।।

चित्रको द्वीपिको व्यालः शिखी वैश्वानरोऽग्निकः ।
वलीकोलो[११] हुताशश्च वह्निनामा च कीर्तितः ।।४६।।

शार्ङ्गेष्टा काकतिक्ता च वायस्यु[१२]ष्ट्राण्डिका[१३] च सा ।
अङ्गारवल्ली कटुका ध्वाङ्क्षवल्लपि चोच्यते ।।४७।।

---

६. बृहत्त्वक् – रा.नि., पृ. ११२ ।
७. शक्तिपर्णः – मूले (सु.नि.ह.(क)(ख) पाठः, ध.नि.ग्रन्थानुसारं संशोधितः ।
८. पिचुमान्दः– अ.नि., श्लो.६७ । पिचुमन्दः –ध.नि., पृ.१३ ।
८. पवनेष्ट : – रा.नि.पृ.१३ । यवनेष्टः – कै.नि. –पृ१६३ ।
१०. वर्णाख्यः – कै.नि., पृ. १९४ । 'वर्णानुसारम् आख्या नाम यस्येति विग्रहः ।
११. वल्लरी – ध.नि., पृ. ८६ । पाली, व्यालः तत्रैव ।
१२. वायव्या–ध.नि., पृ. १९१ । कै.नि. ग्रन्थे (पृ.१७९) – 'वायसी' एव ।
१३. 'करभाण्डिका' इति पाठान्तरं सूचितम् – ध.नि.,पृ.१९१ (टिप्पणी) ।

Digitization by Arya Samaj Charitable Foundation, Chennai

करञ्जो नक्तमालश्च तथा गुच्छककण्टकः ।
प्रकीर्यो मञ्जरीपुष्पस्तथा स्निग्धकरञ्जकः ।।४८।।

करञ्जः पूतिसाह्वश्च[१४] सुमना मातृनन्दनः ।
उदकीर्यश्च कथितश्चिर[१५]विल्वश्च शब्दितः ।।४९।।

पटोलो वरतिक्तश्च कुलकः कर्कशच्छदः ।
अमृतफलस्तिक्तरसः स च राज[१६]फलः स्मृतः ।।५०।।

किराततिक्तं भूनिम्बं कटुतिक्तमथापि च ।
अनार्यतिक्त[१७]मपि च पर्णहीनश्च शब्दितः ।।५१।।

सुषवी तोयवल्ली च राजवल्ल्यफलाऽपि च ।
तथा रञ्जनवल्ली च बृहद्वल्ली च शब्दिता ।।५२।।

आरग्वधादिरित्येष गणः श्लेष्मविषापहः ।
मेहकुष्ठज्वरवमीकण्डूघ्नो व्रणशोधनः ।।५३।।

---

१४. *प्रतिसाह्वः – सु.नि., ह.लि. (क) (ख) ।*

१५. *चिरिबिल्वः – सु.नि.,ह.लि. (क)(ख) ।*

१६. *राजीफलः – ध.नि., पृ. १७ ।*

१७. *अनार्यतिक्तः – अ.को., पृ. १७६ । अत्र सर्वे पर्यायाः नपुंसकलिङ्गे पठिता इति विशेषः ।*

Digitization by Arya Samaj Charitable Foundation, Chennai

।। सालसारादिः ।।

सालसारश्च सारश्च सालनिर्यास एव च ।
कार्तिवृक्षो दीर्घवृक्षः[१] शल्याशी श्रीकरस्तथा ।।५४।।

अजकर्णश्च सर्जश्च कषायी[२] रञ्जनद्रुमः ।
हयकर्णो[३] वस्तकर्णो लतावृक्षश्च शब्दितः ।।५५।।

खदिरो बालपत्रश्च दन्तधावन एव च ।
गायत्री रक्तसारश्च शल्यः कुटिलकण्टकः ।।५६।।

कदरः खदिराकारः श्यामसारस्तथैव[४] च ।
कालस्कन्धः[५] सारशल्यः खदिराह्वश्च शब्दितः ।।५७।।

खपूकः[६] कपुकश्चैव[७] तथा क्रमुक[८] एव च ।
कषायफलपुष्पश्च गुडपुष्पफलस्तथा ।।५८।।

---

१. दीपवृक्षः, धूपवृक्षः इति पाठान्तरम् - कै.नि., पृ. १५१ ।

२. कषायः - ध.नि.,पृ. १९४ ।

३. अत्र 'छाग' इति पदं साधु प्रतीयते । अजकर्णः, वस्तकर्णः इत्यनयोः पर्यायियोर्दर्शनात् ।

४. अस्मिन् ग्रन्थे अ.नि. ग्रन्थे च श्यामसारः खदिरः कदर इत्युक्तः । कै.नि. ग्रन्थे श्वेतसारः खदिरः कदर इत्युक्तः ।

५. कै.नि. ग्रन्थे (प. १५३) खदिरस्य पर्यायौ कालस्कन्ध-सारशल्यौ निर्दिष्टौ ।

६. खपुरः - अ.को., पृ. १८५ । खपुरम् - ध.नि., पृ. ११ ।

७. कैबुकम् - अ.नि., श्लो. ८८ ।

८. क्रपुकः - सु.नि., ह. (ख) ।

Digitization by Arya Samaj Charitable Foundation, Chennai

भुजो भूर्जश्च सारश्च बहुत्वक्कः[९] स्थिरच्छदः[१०] ।
छत्रपत्रो भूर्जपत्रो मृदुत्वक्कश्च कीर्तितः ।।५९।।

मेषशृङ्गी मेण्ढशृङ्गी यादवृक्षो ग्रहस्तथा ।
चक्षुर्बहुलशृङ्गी च तथा वै वृक्क एव च ।।६०।।

तिनिशः स्यन्दनो नेमी गन्धसारो रथद्रुमः ।
अश्मगर्भश्च पठितश्चक्रसंवरणस्तथा ।।६१।।

चन्दनस्ताम्रवृक्षश्च[११] ताम्रसारः किरातजः ।
शीतो भद्रश्रियो रक्तो गोशीर्षो हरिचन्दनम् ।।६२।।

कुचन्दनो रक्तसारो भार्यावृक्षश्च शब्दितः ।
जघन्यश्चन्दनश्चैव ककुद्यसनपुष्पकः ।।६३।

शिंशपा कृष्णसारा च भस्मगर्भा वसादनी ।
तीक्ष्णधूमाऽङ्गारसारा गुरुसारा च कीर्तिता ।।६४।।

शिरीषो मृदुपुष्पश्च वृत्तपुष्पस्तथैव च ।
भाण्टी[१२] शुकाभपुष्पश्च शिखिनीफल[१३] एव च ।।६५।।

असनो बीजकश्चैव कृष्टवृक्षस्तथैव[१४] च ।
तिष्यवृक्षः[१५] पुष्पवृक्षो नीलनिर्यास एव च ।।६६।।

---

९. *बहुपुरः – अ.नि., श्लो ८२ ।*
१०. *अस्थिरच्छदः – तत्रैव, श्लो. ८२ ।*
११. *अत्र चन्दनशब्दः पुंसि प्रयुक्तः, अमरकोशेऽपि पुंसि प्रयुक्तः ।*
१२. *भण्डी – अ.नि., श्लो.८४ ।*
१३. *शङ्खिनीफलः – ध.नि., पृ. ११२ ।*
१४. *कृष्णसर्जकः – कै.नि., पृ. १५१ ।*
१५. *तिक्ष' – सु.नि., ह. (क), ६६ । कै.नि. ग्रन्थानुसारं 'तिष्य' इति संशोधितम् । सु.नि.,.ह. (ख) ग्रन्थे च 'तिष्य' इति वर्तते ।*

Digitization by Arya Samaj Charitable Foundation, Chennai

धवश्च पाण्डुवृक्षश्च शुक्लवृक्षस्तथैव[१६] च ।
गौरश्च शकटाक्षश्च[१७] कषायमधुरत्वचः ।।६७।।

अर्जुनः ककुभश्चैव नदीसर्जो धनञ्जयः ।
मधुगन्धिकपुष्पश्च किरीटी फाल्गुनस्तथा ।।६८।।

नक्तमालः करञ्जश्च पूर्वनामारग्वधादौ ।
अश्वकर्णस्तथा कार्श्यः, कुसीदो[१८] दीर्घपत्रकः ।
आरण्यो दीर्घवृक्षश्च हयकर्णश्च शब्दितः।।६९।।

अगुरुर्वंशकं[१९] कृष्णं शीर्षकं मृदुकं ग्रहः ।
नरेन्द्रार्हरजो[२०] लोहं क्रिमिजग्धं वरद्रुमम् ।। ७०।।

कालेयकमसारञ्च[२१] पीतवर्णञ्च शब्दितम् ।
वर्णप्रसादनञ्चैव लघुचन्दनमेव च ।।७१।।

सालसारादिरित्येष गणः कुष्ठविनाशनः ।
मेहपाण्ड्वामयहरः कफमेदोविशोषणः ।।७२।।

---

१६. शुक्लवृक्षः – रा.नि.पृ. २०५ ।

१७. शकटाख्यः – कै.नि., पृ. १५६ ।

१८. कुशिकः – अ.नि., श्लो.८९ । कुशिकतरुः – रा.नि., पृ. ३६४ ।

१९. 'स्वंशकं' – सु.नि., ह.(क), (ख) । एतदर्थस्यास्पष्टतया अमरकोशे तत्पर्यायेषु वंशकशब्दस्य दर्शनात् संशोधितम् ।

२०. नरेन्द्रार्हरणो – सु.नि., ह. (क)(ख) ।

२१. संसारम् – ध.नि., पृ. ९९ ।

Digitization by Arya Samaj Charitable Foundation, Chennai

।। वरुणादिः ।।

वरुणः श्वेतपुष्पश्च तिक्तशाकद्रुमस्तथा ।
सेतुद्रमो रोहवृक्षः कपालश्चापि शब्दितः ।।७३।।

आर्तगलो भीषणकस्तर्क्कारी[1] बहुकण्टकः ।
जालिवृक्षो[2] दुष्प्रधर्षः स्वादुतिक्तफलश्च स : ।।७४।।

शिग्रुको हरितशाकश्च मतो वै मूलपत्रक :।
तथा बहलपत्रश्च तीक्ष्णगन्धश्च कीर्तितः ।।७५।।

मधुशिग्रुस्तथा चैव शोभाञ्जनक एव च ।
बहलत्वक् तिक्तगन्धो[3] विशदद्रुम एव च ।।७६।।

तर्कारी वैजयन्ती च जयारणिक[4] एव च ।
अग्निनिर्मथनी चैव विजया च प्रकीर्तिता ।।७७।।

मेषश्रृङ्गी पूर्वनामा सालसारादौ ।
नक्तमालः पूर्वनामारग्वधादौ व्याख्यातः ।।
मोरटः कोलपुष्पश्च[5] पीलुपत्रश्च[6] शब्दितः ।
घनमूलो दीर्घमूलो[7] मूरुङ्गश्च प्रकीर्तितः ।।७८।।

---

१. हुंकारः – अ.नि., श्लो. ९७ ।
२. जालवृक्षः – तत्रैव, श्लो.९७ । जालीवृक्षः – कै.नि. ८९ ।
३. तीक्ष्णगन्धः – ध.नि., पृ. १४२ । मधुगन्धिकः – कै.नि. पृ. १३७ ।
४. अरणिका – अ.नि., श्लो. ९४ ।
५. कीर्णपुष्पः – ध.नि., पृ. १४२ । अङ्कोल्लपुष्पः – डल्हणः ।
६. पीलुपत्रा – अ.नि., श्लो. ६५ । पीलुपुष्पः – ध.नि., पृ. ९ ।
७. दीर्घमूला – ध.नि., पृ. ९ ।

Digitization by Arya Samaj Charitable Foundation, Chennai

अग्निमन्थो हविर्मन्थो गन्धपत्रश्च कीर्तितः ।
बालनो गन्धवृत्तश्च तेजोमन्थश्च शब्दितः ।।७९।।

सैरीयको दासकुरण्टकः पूर्वनामारग्वधादौ व्याख्यातः,
द्वितीयसैरीयकस्तु -
सैरीयको नीलपुष्पो म्लानो बाणश्च शब्दितः ।
राजसैरीयकश्चैव केशरञ्जनकोऽपि च ।।८०।।

बिम्बी च तुण्डिकेरी च प्रवालाभफलेति च ।
ओष्ठोपमफला चैव कोह्ला[८] चापि प्रकीर्तिता ।।८१।।

चित्रक आरग्वधादौ ।।[९]
बिल्वो महाफलश्चैव शलाटुद्रुम एव च ।
पूतिवातो मलफलो नीलमल्लिक एव च ।।८२।।

अजशृङ्गी वस्तशृङ्गी तिक्तदुग्धाऽक्षिभेषजा ।
विषाणिका मेषशृङ्गी[१०] शत्रुसेनीति चोच्यते ।।८३।।

बृहतीद्वयं विदारिगन्धादौ ।।
वरुणादिर्गणो ह्येष कफमेदोविशोषणः ।[११]
विनिहन्ति शिरःशूलं गुल्माभ्यन्तरविद्रधीः ।।८४।।

---

८. गोल्हा - अ.नि., श्लो. २५६ ।

९. सु.नि., ह. 'ख' ग्रन्थे एतद्वाक्यं नास्ति ।

१०. अत्र अजशृङ्गीपर्यायत्वेन मेषशृङ्गी पठिता इति विशेषः । यथार्थत इमे पृथक् द्रव्ययोः नामनी स्तः।

११. कफमेदोनिवारणः - सु.सं., (मु.), सू. ३८।११।

Digitization by Arya Samaj Charitable Foundation, Chennai

।। वीरतरादिः ।।

वीरतरो वीरतरुर्बहुधारक[१] एव च ।
लून्तको दीर्घमूलश्च दृढमूलस्तथैव च ।।८५।।

वृक्षादनी वृक्षरुहा पादपारोहिणी तथा ।
सैखरी[२] वृक्षभक्षा च नीलवल्ली च शब्दिता ।।८६।।

गूढवृन्तः तृणश्चैव कुत्थः[३] कून्थस्तथैव[४] च ।
शृङ्गवेरकमूलश्च तथा गुण्ठतृणश्च[५] सः ।।८७।।

नलोऽथ नीरुजश्चैव सुषिरो मृदुपुष्पकः ।[६]
नलेरकोऽथ नलको नालिकोऽथ विभावितः ।।८८।।

कुशदर्भः श्वेतदर्भः पूतिदर्भश्च शब्दितः ।
याज्ञेयश्च समन्त्रश्च ह्रस्वदर्भस्तथैव च ।।८९।।

काशः काकेक्षुकश्चैव काण्डेक्षुर्वायसेक्षुकः ।
श्वेतचामरपुष्पश्च तथेक्षुकुसुमश्च सः ।।९०।।

अश्मभेदः शिलाभेदी तथा चोपलभेदकः ।
पाषाणभेदकश्चैव तथा प्रस्तरभेदकः ।।९१।।

अग्निमन्थो वरुणादौ व्याख्यातः ।।

---

१. बहुवारकः – म.नि., पृ. ६० । बहुधाकरः – कै.नि., पृ. १५८ ।
२. शिखरः – अ.नि.– श्लो. १०९ । शैखर्यपदरोहिणी – कै.नि., पृ. १५९ ।
३. गुच्छः – कै.नि., १५९ ।
४. गुण्ठः, शुण्ठः, – अ.नि., श्लो. ११० । गुन्थः – कै.नि., पृ. १५९ ।
५. अत्र मूले 'कण्ठतृणः' पठितः (सु.नि.ह. (क), (ख) । परं एतत्पर्यायेषु अ.नि., ध.नि. ग्रन्थेषु, सु.नि. ग्रन्थे च तृणपञ्चमूले गुण्ठपददर्शनादत्र गुण्ठ इति संशोधितम् ।
६. मृत्युपुष्पकः – सु.नि., ह. (क) (ख) । संशोधितः ।

Digitization by Arya Samaj Charitable Foundation, Chennai

वसुकः किण्वमूलश्च बुक[७] ईश्वरमल्लिका[८] ।
अलश्च[९] कुलपुष्पश्च[१०] पाण्डुरीशप्रियस्तथा[११] ।।९२।।

वसिरः[१२] सर्वदापुष्पः सैव मर्कटपिप्पली ।
करम्भः पार्वतेयश्च शब्दैः पर्यायवाचकैः ।।९३।।

भल्लूकष्टुण्टुकश्चैव श्योनाकः ककुदी तथा ।
दीर्घवृन्तफलश्चैव तथा गोपार्शुकाफलः ।।९४।।

कुरुटिका[१३] क्षेत्रभूषा तथा मस्तकमञ्जरः[१४] ।
कृष्णसूक्ष्मफला चैव तथा क्षेत्रविनाशिनी ।।९५।।

इन्दीवरश्च श्रेणी च पुष्पमञ्जरिकेति च ।
दीर्घवृन्तफला चैव तथा कर्कशशालिका ।।९६।।

कपोतवङ्का पार्था च (रविभक्ता[१५] सुवर्चला) ।
सूर्यकान्ता च विख्याता शब्दैः पर्यायवाचकैः ।।९७।।

वीरतरादि[१६]रित्येष गणो वातविकारनुत् ।
अश्मरीशर्कराघ्नोऽथ[१७] मूत्रकृच्छ्ररुजापहः ।।९८।।

---

७. 'ज्वक' – सु.नि., ह. (क) । 'बुक' – सु.नि., ह. (ख)
८. 'मल्लकः' – सु.नि., ह. (क)(ख) । अ.नि., श्लो, १०५ अनुसारं 'मल्लिका' इति लिखितम्।
९. स्थूलः – कै.नि., पृ. ६२६ ।
१०. स्थूलपुष्पः – तत्रैव, पृ. ६२६ ।
११. 'पाण्डुरंस' इति (सु.नि.,ह. (क) पाठः संशोधितः ।
१२. वशिरः – कै.नि., पृ. १९१ ।
१३. कुरटका – अ.नि., श्लो. १११ । कुरण्टिका – सु.सं., मु. सू. ३८।१२।
१४. मस्तकमञ्जरी – अ.नि., श्लो १११ ।
१५. सु.नि., ह. (क) (ग) ग्रन्थयोरत्र स्थानं पादैकमितं रिक्तमस्ति । (ख) ग्रन्थे स्थानं नास्ति रिक्तं तथापि पाठोऽपूर्णः पूर्वदेवास्ते । तत्र अ.नि. ग्रन्थानुसारं 'रविभक्ता सुवर्चला' इति स्थापितम् ।
१६. 'वीरतर्वादि' – सु.सं., (मु.), सू. ३८।१३।
१७. 'अश्मरीशर्करामूत्रकृच्छ्राख्यातरुजापहः ।।' – तत्रैव, सू. ३८।१३।

Digitization by Arya Samaj Charitable Foundation, Chennai

।। लोध्रादिः ।।

लोध्रश्च श्वेतलोध्रश्च वल्कलं बहलत्वचम् ।
लाक्षाप्रसादनञ्चैव महालोध्रञ्च शब्दितम् ।।९९।।

शाबरं बल्कलोध्रं[1] च शीतरोध्रमथापि[2] च ।
अक्षिलोध्रञ्च विख्यातं तथातीसारभेषजम् ।।१००।।

पलाशः किंशुकः पर्णस्त्रिवृन्तो रक्तपुष्पकः ।
याज्ञेयः पृथुशिम्बश्च समिद्वृक्षश्च[3] शब्दितः ।।१०१।।

कुटन्नटं परिवालं शुकाह्वं परिपेलवम् ।
जीर्णबन्धं दासपुरं[4] पेलवं चापि शब्दितम् ।।१०२।।

अशोको वीतशोकश्च पिण्डीपुष्पस्तथैव च ।
हेमपुष्पः कर्णपूरः[5] शोकनाशन एव च ।।१०३।।

कट्फलः[6] काश्मरी चैव श्रीपर्णी सर्वभद्रिका ।
महिकुम्भा[7] वराही च कुमुदा च प्रकीर्तिता ।।१०४।।

---

१. *'वक्त्र' – सु.नि., ह. (क) । रा.नि. ग्रन्थे 'वल्कल' शब्दस्य दर्शनानुसारं संशोधितम् ।*
२. *श्वेतरोध्रः – रा.नि., पृ. १३० ।*
३. *समिद्वरः – ध.नि., पृ. २०३ । शमीवृक्षः – सु.नि., ह. (क) (ख) । ध.नि. ग्रन्थानुसारं पाठः संशोधितः ।*
४. *पाशपूरम् – सु.नि., ह.(क), (ख) । अमरकोशे दासपुरस्य पाठात् । तदनुसारं टीकायां निरुक्तिदर्शनाच्च संशोधितम् ।*
५. *कल्कपूरः – सु.नि., ह. (क) । अन्यनिघण्टुषु कर्णपुरक इति तत्पर्यायलाभात् संशोधितः।*
६. *कट्फला – सि.सा.नि., श्लो. ३६ ।*
७. *महाकुम्भा – ध.नि., पृ. २१ ।*

Digitization by Arya Samaj Charitable Foundation, Chennai

[8]एलबालुकमालूह्वा[9] हरिबालुकमेव च ।
तथा कुतलुकञ्चैव कुष्ठगन्धिकमेव च ।।१०५।।

शल्लकी गजभक्षा च ह्लादनी[10] सुरभी रसा ।
गन्धपत्रा कुन्दुरुकी तथा प्रोक्ता वसुश्रवा ।।१०६।।

झिञ्झिणी[11] जिङ्गिनी चैव मोदकी[12] मञ्जनी[13] तथा ।
पार्वती जातसारा च तथैव गुरुमञ्जनी[14] ।।१०७।।

कदम्बो वृत्तपुष्पश्च तथा हलधरप्रियः ।
प्रावृषः[15] षट्पदेयश्च कादम्बर्यश्च शब्दितः ।।१०८।।

कदली दीर्घपत्रा च मोचा[16] हस्तिविषाऽपि[17] च ।
आसारा[18] सुकुमारा च ख्याता चाग्रन्थिनी च सा ।।१०९।।

एष लोध्रादिको नाम्ना मेदःकफहरो गणः ।
योनिदोषहरः स्तम्भी बल्यो[19] विषविनाशनः ।।११०।।

---

८. *एलावालुकम् – अ.को., पृ. १६९ ।*
९. *आलूकम् – ध.नि., पृ. १११ ।*
१०. *ह्लादिनी – अ.को., पृ. १७० ।*
११. *झिङ्गणी – अ.नि., श्लो ११६ ।*
१२. *मोजकी – सु.नि., ह. (ख), श्लो. १०७ ।*
१३. *मञ्जरी – सु.नि., ह. (ख) ।*
१४. *गुडमञ्जरी – तत्रैव, श्लो. ११६ ।*
१५. *प्रावृक्ष्यः ध.नि., पृ. १९० । प्रावृषेण्यः– कै.नि., पृ. १७६ ।*
१६. *मोची – सु.नि., ह. (क) (ख) ।*
१७. *हस्तिबुसा – कै.नि., पृ. ५४ । वारणवुसा – अ.को., पृ. १६६ ।*
१८. *निःसारा – ध.नि., पृ. १४८ ।*
१९. *बल्यः – सु.नि., ह. (क) (ख) । व्रण्यः – सु.सं., ह. (घ), अ. ३८ ।१५ । वर्ण्यः – सु.सं., (मु.), सू. ३८।१५।*

Digitization by Arya Samaj Charitable Foundation, Chennai

।। अर्कादिः ।।

अर्कश्च रूषिकश्चैव[1] सदापुष्पश्च शब्दितः ।
क्षतक्षीरी[2] दुग्धिनिका तथा शुकफला[3] च सा ।।१११।।

अलर्को दीर्घपुष्पश्च मन्दारः कनरुषिकः[4] ।
राजार्कः[5] सूर्यसाह्वश्च विकीरणफलश्च सः ।।११२।।

करञ्जद्वयमारग्वधादौ ।
नागदन्ती श्वेतगण्डी[6] मधुपुष्पा विशोधनी ।
नागस्फटाच्छदा[7] चैव विशल्या च प्रकीर्तिता ।।११३।।

मायूरको ह्यपामार्गः प्रत्यक्पुष्पी क्षवस्तथा ।
खरमञ्जरिकाघाटाः[8] स चापामार्गको मतः ।।११४।।

भार्गी गर्दभशाका च महाबर्बरका च या ।
अङ्गारवल्ली फञ्जी च पद्माऽपि परिकीर्तिता ।।११५।।

रास्ना युक्तरसा[9] चैव नाकुली गन्धनाकुली ।
महासुगन्धा गन्धाढ्या सुरेष्टा कामचारिणी ।।११६।।

---

१. रूपिका- अ.नि., श्लो. ११३ ।
२. 'क्षपाक्षीरा रौद्रकिनी' - सु.नि., ह. (क) (ख) । कै.नि. ग्रन्थानुसारं 'क्षतक्षीरी दुग्धिनिका' इति स्थापितम् । क्षतात् क्षीरं बहति यस्याः ।
३. शुक्लफलः - भा.नि., पृ. १९२ ।
४. गणरूपकः - ध.नि., पृ. १३७ ।
५. अजार्कः - सौ.नि., ह. (क) (ख) - संशोधितः ।
६. श्वेतघण्टा - अ.नि., श्लो. १२५ ।
७. नागस्फोता - रा.नि., पृ. ३४२ । उरगस्फुटा - कै.नि., पृ. १४२ ।
८. रवरमञ्जर्यकोभ्फाटाः - सौ.नि., ह. (क) (ख) । संशोधितः ।
९. युक्तरथा- सौ. नि., ह. (क) (ख) । युक्तरसा - अ.को., पृ. १७५ ।

Digitization by Arya Samaj Charitable Foundation, Chennai

इन्द्रपुष्पी[१०] लाङ्गलकी विद्युदुल्का च शब्दिता ।
अग्निजिह्वाऽनलवपुस्तथा सा पुष्पसीकरा[११] ।।११७।।

क्षुद्रश्वेता सुनाभा[१२] च कैदर्यो[१३] बहुकण्टकः ।
कटभी चोरगुञ्जश्च[१४] तथा पाटलचोण्डिकः[१५] ।।११८।।

महाश्वेता च[१६] किणिही कटभी मोचका च सा ।
शिरीषपत्रा चोण्टा च विषघ्नी श्वेतपद्यपि[१७] ।।११९।।

वृश्चिकाली विदारिगन्धादौ व्याख्याता ।।
लवणा[१८] कङ्गुका चैव तथा ज्योतिष्मती च सा ।
पारावता च विद्या च पीततैला च शब्दिता ।।१२०।।

तापसवृक्षः कण्टकश्च प्रतिवर्णश्च शब्दितः ।
इङ्गुदोऽङ्गारकश्चैव तिक्तमज्जा च कीर्तिता ।।१२१।।

अर्कादिको गणो ह्येष मेदोदोषविषापहः ।[१९]
क्रिमिकुष्ठप्रशमनो विशेषाद् व्रणशोधनः ।।१२२।।

---

१०. इन्दुपुष्पिका – ध.नि., पृ. १३५ । 'कालिकारिका इत्यन्ये' डल्हणः ।
११. पुष्पसीभरा – सौ.नि., ह.(क) (ख) । पुष्पसीकरा – कै.नि., पृ. ११९ । पुष्पसौरभा – रा.नि., पृ. १३५ ।
१२. सुनाभिः – अ.नि., श्लो. १३७ ।
१३. कैडर्यः – कै.नि., पृ. १६२ ।
१४. चोरशुण्ठी – तत्रैव, पृ. १६२ ।
१५. पाटलिशौण्डिका – तत्रैव, पृ. १६२ ।
१६. 'गकिञ्चिही' – सौ.नि., ह. (क) (ख) । एष पाठः संशोधितः ।
१७. शतपदी – कै.नि., पृ. १६१ ।
१८. अलवणा – सु.सं., मु., सू. ३८/१६ । 'अलवणा ज्योतिष्मती वर्तुलपक्वरक्तफला पीततैला 'काकमर्दनिका' इति लोकेप्रसिद्धा' इति तत्रैव डल्हणः । ध.नि., पृ. ६१ ।
१९. कफमेदोविषापहः – सु.सं., मु., सू. ३८/१७ सु.सं., ह. (क), (घ), (ङ), सू. ३८/१७।

Digitization by Arya Samaj Charitable Foundation, Chennai

।। सुरसादिः ।।

सुरसा तुलसी कृष्णा शक्रपत्नी सुमञ्जरी ।
भूतप्रिया नागमाता सुरभी श्रीश्च शब्दिता ।।१२३।।

एतान्येव तु नामानि सुरसाया विभावयेत् ।
श्वेतायाः सुरसाह्वायाः शब्दैः पर्यायवाचकैः ।।१२४।।

फणिज्झको [१]मरिचकस्तीक्ष्णगन्धः सुगन्धकः ।
जम्बीरकोद्वेजनकस्तथा[२] गन्धफणिज्झकः ।।१२५।।

अर्जकस्तीक्ष्णगन्धश्च पर्णासो गन्धपत्रकः ।
कुठेरकश्च विज्ञेयः शब्दैः पर्यायवाचकैः ।।१२६।।

भूस्तृणं शृङ्गरोहश्च पठितं शब्दशोधनम् ।
मालातृणं रोहिणकं[३] तथा काञ्जिकवासकम् ।।१२७।।

सुगन्धकोच्छूलक(श्च)[४] छत्रातिच्छत्रसंज्ञकः ।
छत्रकः[५] पूतिगन्धि(श्च) पालम्बश्चापि[६] शब्दितः ।।१२८।।

कालमालः करालश्च कृष्णमल्लिक[७] एव च ।
कृष्णार्जकश्च विख्यातः कपित्थार्जक एव च ।।१२९।।

---

१. *मञ्जरिकः अ.नि., श्लो. १३२, मरिचः ध.नि., पृ. १४४ ।*
२. *जम्बीरः – अ.को., पृ. १५५ ।*
३. *रोहिषः – ध.नि., पृ. १४३ ।*
४. *सुगन्धकः कदम्बश्च छत्रातिच्छत्रसंज्ञकः – सि.सा.नि., श्लो. ५६ ।*
५. *'जत्तूस्वकः' – सौ.नि., ह. (क) (ख) । संशोधितः ।*
६. *पालघ्नः – अ.को., पृ. १८५ । 'छत्रातिच्छत्रपालघ्नौ' इत्यमरः ।*
७. *कृष्णमल्लिका – ध.नि., पृ. १४५ ।*

Digitization by Arya Samaj Charitable Foundation, Chennai

क्षवकः क्षुपकश्चैव तीक्ष्णगन्धक एव च ।
क्षुपाभिजानकः क्रूरः क्षुधाभिजनकस्तथा ।।१३०।।

खरपुष्पो मरुबकः खरपत्रः सुखात्मकः[८] ।
सूक्ष्महीरः सुगन्धश्च शब्दैः पर्यायवाचकैः ।।१३१।।

विडङ्गश्चैव वेल्लञ्च[९] केवलं[१०] गह्वरन्तथा ।
चित्रतण्डुलकश्चैव कृमिघ्नं चित्रतण्डुलम् ।।१३२।।

कट्फलं रोध्रादौ व्याख्यातम् ।।
सुरसी कपित्थपत्रा च तथा चित्रितपत्रिका ।
विरूपा कुलजा चैव वणिज्या[११] तूपपत्रिका[१२] ।।१३३।।

निर्गुण्डी [१३]वनजेन्द्राणी सिन्दुवारच्छदाऽपि च ।
नीलमञ्जर्यमरिका भूतवेसा[१४] सुगन्धिका ।।१३४।।

कालमालोऽलम्बुसश्च[१५] गोच्छालोम्बूसकस्तथा ।
नीचाकदम्बकश्चैव तथा भूमिकदम्बकः ।।१३५।।

---

८. शूकात्मकः – अ.नि., श्लो. १३३ ।
९. 'खल्लश्च' – सौ.नि., ह. (क) (ख) पाठः अ.को. अनुसारं संशोधितः ।
१०. कैरला – ध.न., पृ. ७१ । कैरलम् – कै.नि., पृ. २१२ ।
११. फणिजा, वनजा – कै.नि., पृ. ७७ ।
१२. रूपपत्रिका – तत्रैव ।
१३. 'वहके' – सौ.नि.ह. (क) (ख) इति पाठः संशोधितः ।
१४. भूतावेशी, भूतकेशी – अ.नि. श्लो. १३९ । भूतावेशा – कै.नि. पृ. २६ ।
१५. 'अलम्बुसश्च गोच्छालः कुलाहल इति स्मृतः' – सि.सा.नि., श्लो. ५५ । सि. सा. नि. ग्रन्थे, मुद्रिते सुश्रुतसंहिताग्रन्थे कुलाहलः पठितः । तत्स्थाने सौ.नि. ग्रन्थे (श्लो. १३५) कालमालः पठितः सु.सं., सू. ३८ ।१८। ह. (क) ग्रन्थे हुलुहुलः पठितः ।

Digitization by Arya Samaj Charitable Foundation, Chennai

उन्दूरकर्णाखुकर्णी वृषकर्णी[16] तथैव च।
मूषिकश्रवणाऽलीका तथा भूमिदरश्रवा[17] ।।१३६।।

फञ्जी पूर्वनामाऽरग्वधादौ ।
प्रचीवलो[18] नदीकर्णो[19] जलजो रक्तमञ्जरी ।
निम्नजातो जयश्चैव नदीकामुक[20] एव च ।।१३७।।

काकमाची बहुफला[21] तथा च जघनेफला ।
ध्वाङ्क्षमाची सर्वतिक्ता कुष्ठघ्नी चापि शब्दिता ।।१३८।।

विषमुष्टिर्मुष्टिकश्च क्षुपमुष्टिरथापि च ।
विषनामयुतो[22] मुष्टिर्नामज्ञैः परिकीर्तितः ।।१३९।।

सुरसादिर्गणो ह्येष कफहृत् कृमिसूदनः ।
प्रतिश्यायारुचिश्वासकासघ्नो[23] व्रणशोधनः ।।१४०।।

१६. *वृश्चिकर्णी – रा.नि., पृ. ३३१ ।*
१७. *भूमिपरिश्रया – अ.नि., श्लो. १३४ ।*
१८. *'प्रजीवलो' – सौ.नि., ह. (क) (ख) । संशोधितः ।*
१९. *नदीकान्ता – ध.नि., पृ. १३८ ।*
२०. *'मदीकोसुक एव च' इति पाठः – सौ.नि., ह. (क) (ख) संशोधितः ।*
२१. *बहुबला – सौ.नि., ह. (क) (ख) – इति पाठः संशोधितः ।*
२२. *'विषाणमयुतो' – सौ.नि.ह. (क) (ख) पाठः संशोधितः ।*
२३. *'रुचिः कासश्वासघ्नः' इति पाठः संशोधितः ।*

Digitization by Arya Samaj Charitable Foundation, Chennai

।। मुष्ककादिः ।।

मुष्ककस्तीक्ष्णकश्चैव क्षारवृक्षो विषापहः ।
तथा फालीफलश्चैव[१] शब्दैः पर्यायवाचकैः ।।१४१।।

पलासो लोध्रादौ व्याख्यातः ।।
धवः सालसारादौ ।।
चित्रक आरग्वधादौ ।।
मदनवृक्ष आरग्वधादौ ।।
शिंशपा सालसारादौ ।।

वज्रवृक्षो महावृक्षः स्नुही[२] यमलकण्टकः ।
बहुक्षीरो विषाणी च स्नुहा सा च महाद्रुमः ।।१४२।।

हरीतक्यभया पथ्या विजया चेति कीर्तिता ।
अमृता प्राणदा चैव नन्दिनी चापि कीर्तिता ।।१४३।।

आमलकी कर्षफला धात्री सीधुफलेति च ।
आमण्डकी तिष्यफला नामज्ञैः परिकीर्तिता ।।१४४।।

विभीतकी कर्षफलः[३] कलिवृक्षस्तथैव च ।
अक्षो भूतनिवासश्च कल्कवृक्षश्च[४] शब्दितः ।।१४५।।

मुष्ककादिर्गणो ह्येष मेदोघ्नः शुक्रदोषहा[५] ।
मेहार्शः पाण्डुरोगघ्नः[६] शर्कराश्मरिनाशनः ।।१४६।।

---

१. *क्षीणवारिफलः* – अ.नि., पृ. १९, श्लो. १४१ ।
२. *स्नेहः* – सौ.नि., ह. (क) (ख) ।
३. *वृष्यफला* – कै.नि., पृ. १४७ ।
४. *कल्कः* – ध.नि., पृ. ५० । *कल्किवृक्षः* – रा.नि., पृ. ५१ ।
५. *शुक्रदोषहृत्* – सु.सं., मु. सू. ३८/२१ ।
६. *'मेहार्शःपाण्डुरोगाश्मशर्करानाशनः परः।।"* सु.सं., मु., सू. ३८/२१ ।

Digitization by Arya Samaj Charitable Foundation, Chennai

।। पिप्पल्यादिः ।।

पिप्पली मागधा[1] कृष्णा चपला कोलनामिका ।
शौण्डी कट्वरणफला[2] कणा[3] सा तीक्ष्णतण्डुला ।।१४७।।

ग्रन्थिकं पिप्पलीमूलं कोलमूलं विरुक्षणम् ।
पर्व[4] ग्रन्थ्यूषणञ्चैव चपलामूलमेव च ।।१४८।।

चविका कोलवल्ली[5] च हस्तिपिप्पल्यथापि च ।
गजपिप्पली श्रेयसी च शब्दैः पर्यायवाचकैः ।।१४९।।

चित्रमारग्वधादौ व्याख्यातम् ।।
शृङ्गवेरन्तथा कोलं नागरं विश्वभेषजम् ।
कटुः शुण्ठ्यूषणा प्रोक्ता महिच्छत्रमथापि च ।।१५०।।

मरिचं वेल्लजं[6] कृष्णमूषणं कुञ्चितं घनम् ।
यवनेष्टमरिष्टञ्च लघु तीक्ष्णमथापि च ।।१५१।।

हरेणुका हिमाह्वा च महैला शिशिरात्मजा ।
वृत्तैला कपिलैला च कुड्मली कौन्तिरेव[7] च ।।१५२।।

---

१. *मागधी – अ.नि., श्लो. ३१ । मगधा – म.नि., पृ. ७३ ।*
२. *एष पर्यायोऽन्यनिघण्टुषु नोपलब्धः ।*
३. *वृषलण्डफलेति च' (सु.नि.,ह.(ख) (ग)) इति पाठः संशोधितः ।*
४. *सर्वग्रन्थिकम् – ध.नि., पृ. ८४ ।*
५. *कोलिवल्ली' – सौ.नि., ह. (क) (ख) (ग) पाठः संशोधितः ।*
६. *'वल्लिजम्' – म.नि., पृ. ७३ । वल्लीजम् – ध.नि., पृ. ८७ ।*
७. *कौन्ती – अ.नि., श्लो. ३६ ।*

Digitization by Arya Samaj Charitable Foundation, Chennai

एला च द्रमिडी[८] चैव मिसिनी कुटिनी[९] त्रुटिः[१०] ।
क्षुद्रैला सूक्ष्मसाह्वा च मलया चापि शब्दिता ।।१५३।।

अजमोदा दीप्यकश्च वस्तमोदा यवानिका ।
उग्रगन्धा हृद्यगन्धा शब्दैः पर्यायवाचकैः ।।१५४।।

इन्द्रयवकुटजमूर्वाणामारग्वधादौ ।।
पाठा तत्रैव ।
जीरकं दीर्घकं हृद्यमजाजी दीप्यमेव च ।
मगधश्च[११] मनोज्ञश्च जारणं[१२] पूज्यमानकम् ।।१५५।।

सर्षपा[१३] दुन्दुभा[१४] चैव रक्षोघ्ना गौरसर्षपा ।
सिद्धार्थका[१५] दुःप्रधर्षा कटुका[१६] श्वेतसर्षपा[१७] ।।१५६।।

महानिम्बस्थवीनिम्बः शुपसालो[१८] मरिष्टकः[१९] ।
शिरिको[२०] निम्बकरको[२१] राजनिम्बश्च शब्दितः ।।१५७।।

---

८. *'चन्द्रमिती' – सौ.नि., ह. (क) । 'च द्रमिडी' – सौ.नि., ह. (ख) ।*
९. *निष्कुटिः – कै. नि., पृ. २४८*
१०. *त्रुटी – सौ.नि., ह. (क) (ख) । संशोधितः ।*
११. *मागधम् – ध.नि., पृ. ८२ ।*
१२. *जरणः – रा.नि., पृ. ८३ ।*
१३. *सर्षपः – अ.नि., श्लो. ३८ ।*
१४. *तन्तुभः – अ.को., पृ. ३०७ ।*
१५. *सिद्धार्थकः – अ.नि., श्लो. ३८ ।*
१६. *कटुकः – ध.नि., पृ. १४२ ।*
१७. *श्वेतसर्षपः – अ.नि., श्लो. ३८ । सौ.नि.ग्रन्थे सर्षपा इति द्रव्यनाम तत्पर्यायाश्च स्त्रीलिङ्गे पठिता इति विशेषः ।*
१८. *शुकपालकः – कै.नि., पृ. १६४ ।*
१९. *एतत् पदमन्यनिघण्टुषु नास्ति शुद्धं च न प्रतीयते ।*
२०. *गिरिकः – म.नि., पृ. २८ ।*
२१. *निम्बरकः – ध.नि., पृ. १३ ।*

Digitization by Arya Samaj Charitable Foundation, Chennai

हिङ्गु जतूकं[२२] रजनं[२३] रामठं भूतनाशनम् ।
अगूढगन्धं रक्षोघ्नं बाह्लिकं वस्तगन्धकम्[२४] ।।१५८।।

भार्ग्यर्कादौ व्याख्याता ।।
मधुरसा पूर्वनामारग्वधादौ व्याख्याता ।।
अतिविषा चोपविषा शृङ्गीका घुणवल्लभा[२५] ।
तथा श्वेतविषा चापि विषरूपा[२६] च शब्दिता ।।१५९।।

विडङ्गं सुरसादौ[२७] व्याख्यातम् ।।
कटुरोहिण्यरिष्टा[२८] च तथा सा शकुलादनी ।
नीलतोदा मत्स्यविन्ना[२९] तिक्ता काण्डरुहेति[३०] च ।।१६०।।

पिप्पल्यादिः कफहरः प्रतिश्यायमरोचकम्[३१] ।
[३२]विनिहन्त्यर्दितं गुल्मं शूलघ्नो ह्यामपाचनः ।।१६१।।

---

२२. *जतुकम् – अ.को., पृ. ३१६ ।*
२३. *जरणम् – अ.नि., श्लो. ३६ ।*
२४. *वस्तिसिंहकः – अ.नि., श्लो. ३६ ।*
२५. *घुणप्रिया – तत्रैव, श्लो. १४६ ।*
२६. *विषा– अ.को., पृ. १६२ ।*
२७. *'आरग्वधादौ' – सौ.नि.ह. (क) – पाठः संशोधितः ।*
२८. *'ण्यनिष्ठा' – सौ.नि.ह. (क) – पाठः संशोधितः ।*
२९. *मत्स्यपित्ता – अ.नि., श्लो. ३८, अ.को., पृ. १५७ ।*
३०. *'कुण्ड' – सौ.नि.ह., (क), पाठः संशोधितः ।*
३१. *'प्रतिश्यायानिलारुचीः' – सु.सं., मु. सू. ३८/२३ ।*
३२. *'अनिलश्चापि गुल्मश्च दीपनश्चामपाचनः – सु.सं., (ह.), सू. ३८ (घ) ।*
'निहन्याद् दीपनो गुल्मशूलघ्नश्चामपाचनः ।।' – सु.सं.,ह. (ङ) सू. ३८/२३ ।

Digitization by Arya Samaj Charitable Foundation, Chennai

।। एलादिः ।।

एला पिप्पल्यादौ व्याख्याता ।।
तगरं कुटिलं वक्रं नतं कालानुसारिकम्[१] ।
जिह्मञ्च[२] बर्हकञ्चैव[३] शठञ्च परिकीर्तितम् ।।१६२।।

कुष्ठमुत्पलकुष्ठञ्च वाप्यं किञ्जल्कमेव च ।
पापकं पारिभाव्यञ्च त्वग्दोषं व्याधिरेव च ।।१६३।।

मांसी च नलदं चैव जटा[४] भूतजटेति च ।
माता च जननी चैव भूतकेश्यथ रोमशा ।।१६४।।

ध्यामकं वदनं दग्धं श्यामकं[५] विषगन्धिकम् ।
ज्वलनाभं विन्दुचितं तथा शबलमेव च ।।१६५।।

पत्रन्तमालपत्रञ्च पलासञ्छदनन्तथा ।
सुकुमारं सुगन्धञ्च रोमशं पर्णमेव च ।।१६६।।

नागपुष्पं मुरुङ्गञ्च तथा वै नागकेशरम् ।
जाम्बूनदं हाटकञ्च केशरं पीतकेशरम् ।।१६७।।

---

१. कालानुसार्यकम् – ध.नि., पृ. १०६ ।
२. 'जिह्व' इति पाठः संशोधितः । (सौ.नि., ह. (क)) ।
३. बहिष्ठम् – अ.नि., श्लो. १८५ ।
४. 'जटालं भूतटेति' – सौ.नि., ह. (क) । पाठः संशोधितः ।
५. 'मनालम्ब्यथ गन्थि च ।' – सौ.नि., ह. (क) । संशोधितः ।

Digitization by Arya Samaj Charitable Foundation, Chennai

प्रियङ्गुः, फलिनी श्यामा मानिता दारिका लता ।
कङ्गुका चैव गौरी च कान्ता कोल्लिगिरेति[६] च ।।१६८।।

हरेणुका पिप्पल्यादौ ।।
व्याघ्रनखः[७] करनखो व्यालप्रहरणोऽपि च ।
करजो नखश्च दृष्टः शब्दैः पर्यायवाचकैः ।।१६९।।

शुक्तिर्नागहनुः शंखो बदरीपत्रकस्तथा ।
सामुद्रं यामुनञ्चैव हस्तिकर्णकमेव च ।।१७०।।

चण्डा धनहरी चैव क्षेमिका[८] तस्करी तथा ।
निशाचरी शंकितिका[९] ग्रन्थिका केशिनीति च ।।१७१।।

स्थौणेयकं नीलपीतं[१०] विकर्णञ्च[११] शुकच्छदम् ।
विषघ्नं विश्लिष्टपत्रं क्षेम्या गोशाद्वलन्तथा ।।१७२।।

चोचं त्वचं वराङ्गञ्च सुरसं वल्कलन्तथा ।
भृङ्गं रामप्रियं शुक्लं नामज्ञैः परिभाषितम् ।।१७३।।

चोरकः क्षेमकश्चण्डो दौष्कुलेयो निशाचरः ।
विमनस्तस्करो धूर्तो[१२] दुष्पत्रो विट एव च ।।१७४।।

६. *कोलगिरिका – अ.नि., श्लो. १८ ।*
७. *अ.नि., अ.को., ध.नि. ग्रन्थेषु अस्य नामानि नपुंसकलिङ्गे पठितानि ।*
८. *क्षेमकः – ध.नि., पृ. ११० ।*
९. *शंखिनिका – अ.नि., श्लो. १८९ । शंकितः – ध.नि., पृ. ११० ।*
१०. *तैलपीतकम् – अ.नि., श्लो. १८६ ।*
११. *'विकर्णाम्बुमसाह्वयम्' सौ.नि.ह., (क) (ख) – पाठः संशोधितः*
१२. 'धूर्तोदः पुत्रको' – सौ.नि.ह. (क) (ख) पाठः संशोधितः ।

Digitization by Arya Samaj Charitable Foundation, Chennai

बालको वार्युदीच्यञ्च बर्हिष्ठं पिङ्गलन्तथा ।
ह्रीबेरञ्च वराङ्गञ्च [१३]वेगमाचमनं तथा ।।१७५।।

गुग्गुलुर्महिषाक्षश्च कौशिको मरुसम्भवः ।
नक्तञ्चरो वायसारिरुलूकश्चापि शब्दितः।।१७६।।

सर्ज्जरसः शीतलश्च बहुरूपोऽग्निवल्लभः ।
सुरधूपो यक्षधूपो [१४]लालनश्चापि शब्दितः ।।१७७।।

रसो बोलो वत्सनाभः[१५] कालकूटश्च शब्दितः ।
दृप्तगन्धो हालहलः स्तोककश्च प्रकीर्तितः ।।१७८।।

श्रीवेष्टकः पायसकः श्रीसाह्वो[१६] रक्तशीर्षकः ।
निर्यासः सरलानाञ्च दधिकश्च प्रकीर्तितः ।।१७९।।

उरुष्कः[१७] कृत्रिमो धूपो यावनः कपिजः[१८] कपिः[१९] ।
युक्तियुक्तः सुगन्धश्च कृतकः पिण्डितस्तथा ।।१८०।।

१३. *पिङ्गम्* - ध.नि., पृ. १६ ।
१४. *ललनः* - रा.नि., पृ. १९४ । म. नि., पृ. ९४ ।
१५. 'अत्र बोलपर्यायेषु विषाणां नामानि 'वत्सनाभः, कालकूटः, हालहलः' इत्येतानि पठितानि । ध.नि. ग्रन्थे पठितं विषपदमेतन्मूलं प्रतीयते । कै.नि. ग्रन्थे कालकूटमेकं पठितम् ।
१६. *श्रीवासः* - अ.को., पृ. २४६ ।
१७. *तुरुष्कः* - सु.सं., ह. (घ) (ङ), सू. ३८ ।
१८. *'कपिचः'* - सौ.नि., ह. (क), (ख) । एतत्पाठः संशोधितः ।
१९. *कविः* - सौ.नि., ह. (क), (ख) । पाठः संशोधित ।

Digitization by Arya Samaj Charitable Foundation, Chennai

कुन्दूरको[२०] मेदकश्च शिखरी गोपुरस्तथा[२१] ।
शल्लकी वै पुरश्चैव[२२] तथा नागवधूप्रियः ।।१८१।।

अगुरुः सालसारादौ व्याख्यातः ।।
स्पृक्का देवी लता नीला मारुता पिशुनेति[२३] च ।
सुकुमारा सुगन्धा च लघ्वी कुटिलपुष्पिका ।।१८२।।

सुरकाष्ठं देवकाष्ठं भद्रदारु च शब्दितः ।।
स्निग्धं चन्दनकं चैव सुरदारु च कीर्तितः ।।१८३।।

कुङ्कुमं बाह्लिकं हीरं[२४] पिण्डनं पीतकं वरम् ।
काश्मीरं रक्तवर्णञ्च मालमग्निशिखं तथा ।।१८४।।

पुन्नागं केशरं पीतं तथानामककेशरम् ।[२५]
चाम्पेयं पत्रहीनञ्च वितथन्देववल्लभम् ।।१८५।।

एलादिको वातकफौ निहन्याद् विषमेव च ।
वर्णप्रसादनः कण्डूपिडकाकोठनाशनः ।।१८६।।

---

२०. कुन्दुरुः – अ.नि., श्लो. १९० ।
२१. कुन्द्रगोपुरः – ध.नि., पृ. १२१ ।
२२. खपुरः – अ.नि., श्लो. १९० ।
२३. 'पिण्डनेति' – सौ.नि., ह. (क) (ख) । पाठः संशोधितः ।
२४. धीरः – अ.को., पृ. २४५ ।
२५. तथानानामकेशरम् – सौ.नि., ह. (क) (ख) । पाठः संशोधितः ।

Digitization by Arya Samaj Charitable Foundation, Chennai

।। वचादिः ।।

वचा तीक्ष्णोग्रगन्धा च षड्ग्रन्था रोमशेति[1] च ।
मङ्गल्या चैव मेध्या (च) जटिला चापि शब्दिता ।।१८७।।
मुस्ता घनो भद्रमुस्ता[2] तथा कोलकशेरुका[3] ।
भद्रमुस्ताऽथ गाङ्गेया[4] वरमुस्तमथापि च ।।१८८।।
अतिविषा पिप्पल्यादौ ।।
हरीतकी पूर्वनामा मुष्ककादौ ।
भद्रदार्वेलादौ ।
नागरं शृङ्गवेरनामा पिप्पल्यादाविति ।।

।। हरिद्रादिः ।।

हरिद्रा रजनी पीता पिण्डा[5] वर्णवतीति च ।
क्रिमिघ्ना काञ्चनी गौरी योषिद्वल्लभिकाऽपि च ।।१८९।।
दार्वी दारुहरिद्रा च काष्ठसाह्वा पचम्पचा ।
कटङ्कटेरी पर्ज्जन्या कुष्ठघ्नी चापि चोच्यते ।।१९०।।
वत्सकबीजान्यारग्वधादौ ।।
मधुकं यष्टिमधुकं यष्टिकं[6] मधुयष्टिका ।
यष्ट्याह्वा काष्ठमधुकं वल्लीमधुकमेव च ।।१९१।।
एतौ वचाहरिद्रादी गणौ स्तन्यविशोधनौ ।
आमातिसारशमनौ कफमेदोविशोधनौ[7] ।।१९२।।

---

१. लोमशा – ध.नि., पृ. ७० ।
२. भद्रमुस्तकः – अ.को., पृ. १८२ । भद्रमुस्तकम् – अ.नि., श्लो. १५१ ।
३. 'विस्रब्धैः क्रियतां वराहपतिभिर्मुस्ताक्षतिः पल्वले' इति अभिज्ञानशाकुन्तले कालिदासेन निर्दिष्टम् । कै.नि. ग्रन्थेऽपि 'वराहादः' ति पर्यायो वर्तते ।
४. गाङ्गेयी – अ.नि., श्लो. १५१ । गाङ्गेयः ध.नि., पृ. १५ ।
५. पिङ्गा – ध.नि., पृ. १७ ।
६. यष्टीकम् – तत्रैव, पृ. ३३ ।
७. 'विशेषाद् दोषपाचनौ'– सु.सं., ह.(ङ) 'मेदःकफाढ्यपवनस्तन्यदोषनिवर्हणौ।'–अ.हृ., सू. १५/३६।

Digitization by Arya Samaj Charitable Foundation, Chennai

।। श्यामादिः ।।

श्यामा मसूरविदली[१] पालिन्दी कालमेष्यपि ।
अर्धचन्द्रा कोलफला ताम्रपुष्पी च शब्दिता ।।१९३।।

महाश्यामा कण्टकी च विशिखा शिवकण्टका ।
तरुद्वेगा बृहच्छ्यामा नागरीरेपि चोच्यते ।।१९४।।

त्रिवृत् त्रिभण्डी त्रिवृता निःसूत्रा[२] चारनालिका ।
सूत्रमध्या त्रिपुटिका[३] त्र्यसी[४] कुटरणेति[५] च ।।१९५।।

दन्ती चित्रा निकुम्भा[६] च तथोदुम्बरपत्रिका ।
उपचित्रैरण्डफला घुणेष्टा[७] चापि शब्दिता ।।१९६।।

शङ्खिनी नेत्रपीलुश्च[८] सुकुमारा च कीर्तिता ।
वृषपायी च शान्तिश्च तिक्ताक्षी[९] चाक्षपीडकः[१०] ।।१९७।।

तिल्वकश्चैव रोध्रश्च बृहत्पर्णस्तिरीटिकः ।
महापत्रश्च विख्यातः शिखरी चापि नामतः ।।१९८।।

---

१. *मसूरविदला – अ.नि., श्लो. १९२ ।*
२. *सूत्रा – अ.नि., श्लो. १९४ ।*
३. *त्रिपुटा – अ.को., पृ. १६४ ।*
४. *त्र्यस्रा – ध.नि., पृ. ५७ ।*
५. *'कुन्दरणेति' – सौ. नि., ह. (क)। पाठः संशोधितः ।*
६. *निकुम्भः – अ.नि., श्लो. १९३ ।*
७. 'घृणोष्टा' – सौ. नि., ह. (क) । पाठः संशोधितः । घुणप्रिया – भा.नि. ।
८. *नेत्रमीला – ध.नि., पृ. ५९ ।*
९. *तिक्तला – अ.नि., श्लो. १९५ ।*
१०. *यक्षपीलकः – सौ.नि. ह. (क) । पाठः संशोधितः ।*

Digitization by Arya Samaj Charitable Foundation, Chennai

कम्पिल्लको रेचनको[११] रञ्जनो रक्तचूर्णकः।
मनःशिला[१२]चूर्णफलस्तथा कर्कशपत्रकः ।।१९९।।

क्रमुकः सालसारादौ ।
पुत्रश्रेणी[१३] द्रवन्ती च साबरी[१४] नेत्रभेषजा ।
वृक्षन्यग्रोधकी चैव श्रवणैरण्डिकेति[१५] च ।।२००।।

गवाक्षी वृषभाक्षी च गिरिकर्णी गवादनी ।
विषघ्नाङ्गारवल्ली च एकश्रेणीति चोच्यते ।।२०१।।

आरग्वधः पूर्वनामा राजवृक्षश्चारग्वधादौ ।
सप्तला यवतिक्ता च तथा चर्मकषेति च ।
रसालिका मञ्जनिका नामज्ञैः परिकीर्तिता ।।२०२।।

छगलान्त्री वृत्तपत्रा वस्तान्त्री वृषगन्धिका ।
अन्त्रवस्ता च पठिता शब्दैः पर्यायवाचकैः ।।२०३।।

स्नुहा वज्रवृक्षः पूर्वनामा मुष्ककादौ ।
स्वर्णक्षीरी स्वर्णदुग्धा तथा काञ्चनदुग्धिका ।
मता च कनकक्षीरी शब्दैः पर्यायवाचकैः ।।२०४।।

एष श्यामादिको नाम्ना वर्गो गुल्मविषापहः ।
आनाहोदरहा[१६] भेदी तथोदावर्तनाशनः ।।२०५।।

११. रोचनकः – कै.नि., पृ. १७५ । रोचनिका – सि.नि., श्लो. ६५ ।
१२. 'पुनःशिला' – सौ.नि., ह. (क) । संशोधितः ।
१३. पत्रश्रेणी – तत्रैव । संशोधितः ।
१४. शम्बरी – अ.को., पृ. १५८ । शम्बरा – ध.नि., पृ. ५४ ।
१५. एरण्डा – म.नि., पृ. २२ ।
१६. आनाहोदरविड्भेदी – सु.सं., मु., सू. ३८।३०।

Digitization by Arya Samaj Charitable Foundation, Chennai

।। बृहत्यादिः ।।

बृहती कण्टकारिका च विदारिगन्धादौ व्याख्याता ।।

कुटज आरग्वधादौ ।।

पाठारग्वधादौ ।।

मधुकं हरिद्रादाविति ।।

पाचनीयो बृहत्यादिर्गणः पित्तानिलापहः ।

कफारोचकहृद्रोगमूत्रकृच्छ्रविनाशनः[१] ।।२०६।।

।। पटोलादिः ।।

पटोलः आरग्वधादौ ।।

चन्दनं सालसारादौ ।।

मूर्वा गुडूची पाठारग्वधादौ ।।

कटुकरोहिणी पिप्पल्यादाविति ।।

पटोलादिर्गणः पित्तकफारोचकनाशनः ।

ज्वरोपशमनो व्रण्यश्छर्दिकण्डूविषापहः[२] ।।२०७।।

---

१. *रुजापहः – सु.सं., मु., सू. ३८/३२।*

२. *'ज्वरोपशमनश्छर्दिकण्डूविषविनाशनः।' – सु.सं., ह. (ङ) ।*

Digitization by Arya Samaj Charitable Foundation, Chennai

।। काकोल्यादिः ।।

काकोली वायसोली च (वीरा[१]) धीरा च शब्दिता ।
मधुरा जीवनीया च ध्वाङ्क्षोली च प्रकीर्तिता ।।२०८।।

द्वितीया क्षीरकाकोली शुक्लोली जीवनोलिका[२] ।
वीरधीरोलिका चैव शब्दैः पर्यायवाचकैः ।।२०९।।

जीवकर्षभकौ विदारिगन्धादौ व्याख्यातौ ।।
मुद्गपर्णी(क्षुद्रसहा)माषपर्णी च महासहापूर्वनामा विदारिगन्धादौ।।
मेदा मेदोद्भवा चैव मधुरा जीवनेति च ।
श्यामा मेदा च कथिता सुरमेदसमुद्भवा ।।२१०।।

द्वितीया च महामेदा किञ्चिदापाण्डुरा स्मृता ।
विभावनीया मेदज्ञैर्मेदया परिभाषितैः ।।२११।।

छिन्नरुहा छिन्नरुढा सतीरूपा वृषायणी ।
बहुच्छिद्रा च विज्ञेया शब्दैः पर्यायवाचकैः ।।२१२।।

कर्कटा शृङ्ग्यतिरवा महाघोषा च शब्दिता ।
कुलीरशृङ्गी च मता (कर्कटशृङ्गिका[३] तथा) ।।२१३।।

तुगाक्षीरी वंशभवा वंशिनी तृणकेतुनी ।
शोषश्वासक्षयहिता शुभा शुभ्रेति चोच्यते ।।२१४।।

---

१. मूले (सौ.नि., ह. (क) (ख)) रिक्तं स्थानं अ.नि. ग्रन्थानुसारं पूरितम् ।
२. 'जीवनोलि च' सौ.नि., ह. (क) । पाठः संशोधितः ।
३. मूले सौ.नि. ह. (क) ग्रन्थेऽत्र 'शल्य' इति पदानन्तरमन्यत् स्थानं रिक्तमस्ति ।

Digitization by Arya Samaj Charitable Foundation, Chennai

पद्मकं हिमपद्मं च कमलं (मलय[४]) न्तथा ।
पद्मवर्णं[५] पद्मशब्दं पद्मसाह्वमथापि च ।।२१५।।

प्रपौण्डरीकञ्चक्षुष्यं मधुरं मूलसाधनम् ।
नेत्राश्च्योतनकञ्चैव शब्दैः पर्यायवाचकैः ।।२१६।।

ऋद्धिः पुष्टिश्चेतना च प्राणदा जीवनेति च ।
आश्वासना बोधना च शब्दैः पर्यायवाचकैः ।।२१७।।

एतान्येव[६] तु नामानि वृद्धेः प्राज्ञो विभावयेत् ।
अशीलिकप्रिया चैव विख्याता (सिद्धि[७]) रेव च ।।२१८।।

मधुकं हरिद्रादौ ।।
काकोल्यादिरयं पित्तशोणितानिलनाशनः ।
जीवनो बृंहणो वृष्यः स्तन्यश्लेष्मकरस्तथा ।।२१९।।

---

४. मूले सौ.नि., ह. (क) ग्रन्थे रिक्तं स्थानं ध.नि. ग्रन्थोक्तपर्यायालोचनं विधाय पूरितम् ।

५. पद्मवर्णा – सौ.नि., ह. (क) । पाठः संशोधितः ।

६. 'एतान्येवानुमानानि वृद्धाः' – सौ.नि., ह. (क), (ख)। पाठः संशोधितः ।

७. मूलस्यास्पष्टतया 'सिद्धि'रिति पदं स्थापितम् ।

Digitization by Arya Samaj Charitable Foundation, Chennai

।। ऊषकादिः ।।

ऊषकञ्चोषकञ्चैव निःसारं खपुरं तथा ।
उष्ट्रक्षारञ्च पठितं ऋषिभिः शास्त्रकोविदैः ।।२२०।।

सैन्धवं माणिमन्थञ्च नादेयं लवणोत्तमम् ।
शुद्धलवणञ्च विमलं शब्दैः पर्यायवाचकैः ।।२२१।।

हिङ्गु पिप्पल्यादौ ।।
शिलाजतु शिलाजञ्च योगवाहि च कीर्तितम् ।
षड्लोहयोनिश्च मतः शिलानिःस्यन्द एव च ।।२२२।।

कासीसञ्चानु कासीसं शुभं कुवरकन्तथा ।
शोधनं पांशुकासीसं शब्दैः पर्यायवाचकैः ।।२२३।।

तुत्थं मयूरग्रीवञ्च मयूरगलकोपमम् ।
अक्षितुत्थञ्च पठितं शब्दैः पर्यायवाचकैः ।।२२४।।

उषकादिः कफं हन्ति गणो मेदोविशोषणः ।
शर्कराश्मरिहा[१] मूत्रकृच्छ्राघातरुजापहः ।।२२५।।

---

१. 'अश्मरीशर्करामूत्रकृच्छ्रगुल्मप्रणाशनः' – सु.सं., मु., सू. ३८/३८ । 'अश्मरी-शर्करा-मूत्रकृच्छ्रगुल्मकफप्रणुत्' सु.सं., ह.(ङ) ।

Digitization by Arya Samaj Charitable Foundation, Chennai

।। सारिवादिः ।।

सारिवा विदारिगन्धादौ ।।
मधुकं हरिद्रादौ ।।
चन्दनं सालसारादौ ।।
पद्मकं काकोल्यादौ ।।
काश्मर्यं कट्फलनामा रोध्रादौ ।।
मधूको गुडपुष्पश्च तीक्ष्णसारोऽथ मध्वगः ।
अल्पफलो मधुपूर्णः मधुपुष्पो महाद्रुमः[1] ।।२२६।।

तस्य पुष्पाणि ।।
उशीरं वीरणश्चैव वाणं लामज्जकं तथा ।
अवदातं[2] च सेव्यञ्च बहुमूलमथापि च ।।२२७।।

सारिवादिः पिपासा[3]र्तिरक्तपित्तहरो गणः ।
मूर्च्छाज्वर[4]प्रशमनो विशेषाद् दाहनाशनः ।।२२८।।

---

१. मधुद्रुमः – अ.नि., श्लो. २६ । अ.को., पृ. १३७ ।

२. अवदाहः – अ.को., पृ. १८४ ।

३. 'पिपासाघ्नो' – सु.सं., (मु.), सू. ३८।४ । सु.सं., (ह.) (ङ)।

४. 'पित्तज्वरप्रशमनो विशेषाद् दाहनाशनः' – सु.सं., ह. (घ) (ङ) ।

Digitization by Arya Samaj Charitable Foundation, Chennai

।। अञ्जनादिः ।।

अञ्जनं यामुनं[१] शीतं स्त्रोतोजं नेत्रभूषणम् ।
सौवीरकञ्च पठितं शब्दैः पर्यायवाचकैः ।।२२९।।

रसाञ्जनं कृमिघ्नञ्च दार्वीक्वाथोद्भवन्तथा ।
अग्रसारञ्च पठितं बालभैषज्यमेव च ।।२३०।।

नागपुष्पप्रियङ्गू एलादौ व्याख्यातौ ।।
नलिनं पद्मकं पद्मं श्रीनिकेतं सरोरुहम् ।
पुष्करञ्चारविन्दञ्च कमलञ्चाम्बुजन्तथा ।।२३१।।

अञ्जनादि[२]र्विषघ्नोऽयं रक्तपित्तहरो गणः ।
नेत्ररोगप्रशमनो दाहनिर्हरणस्तथा ।।२३२।।

१. 'यायनम्' - सौ.नि., ह. (क) ।
२. *'अञ्जनादिरयं.....' सौ.नि., ह. (क) । रिक्तस्थानं पूरिताम् ।*

Digitization by Arya Samaj Charitable Foundation, Chennai

।। परूषकादिः ।।

परूषको मृदुफलस्तथा धन्वनपत्रकः ।
मतश्च[1] गाडवफलस्तथा चापि परुषकः ।।२३३।।

द्राक्षा गोस्तनिका चैव तथा स्वादुरसेति च।
मृद्वीका मधुयोनिश्च तथा कालफलेति च ।।२३४।।

कट्फलं लोध्रादौ ।।
राजादनः पलासी च (क्षीरिका[2]) श्लेष्मकस्तथा ।
तथा मृत्स्नफलश्चैव शाखामृगमुखप्रियः ।।२३५।।

दाडिमो रक्तकुसुमः करकः शुकवल्लभः ।
मधुराम्लफलश्चैव शब्दैः पर्यायवाचकैः ।।२३६।।

कतकश्छेदनीयश्च चक्षुष्यफल एव च।
प्रसादनफलश्चैव शब्दैः पर्यायवाचकैः ।।२३७।।

शाकः शबलशाकश्च महापत्रो हलीसकः ।
भूमिसहो[3] द्वारदारुः स्थिरकः खरपत्रकः ।।२३८।।

त्रिफला मुष्ककादौ ।।
परूषकादिको नाम्ना गणः पित्तानिलापहः[4]।
मूत्रदोषहरो हृद्यः पिपासाघ्नोऽरुचौ[5] हितः ।।२३९।।

---

१. 'गतश्च- सौःनि., ह. (क) । पाठः संशोधितः । गाडवोमेघः ।
२. सौ.नि.ह. (क) ग्रन्थे रिक्तं स्थानमन्यनिघण्टुप्रामाण्येन पुरितम् ।
३. भूमिसहः - ध.नि., पृ. २०४ । भूमीसकः - सौ.नि., ह. (क) ।
४. 'एषोऽनिलापहः' - सु.सं., ह. (घ) । 'गणोऽनिलविनाशनः - सु.सं., ह. (ङ)।
५. 'रुचिप्रदः' - सु.सं., ह. (ङ) ।

Digitization by Arya Samaj Charitable Foundation, Chennai

।। अम्बष्ठादिः ।।

अम्बष्ठा सैव तन्वङ्गी मसूरविदलेति च ।
एकेषिका च पठिता साहसी[१] चापि शब्दिता ।।२४०।।

धातकी ताम्रपुष्पा च कुञ्जरा[२] मद्यवासिनी[३] ।
पार्वतेया[४] सुपुष्पा[५] च पुंखपुष्पा[६] च शब्दिता ।।२४१।।

तस्य पुष्पाणि ।।
समङ्गा समिपत्रा[७] च तथैवाञ्जलिकारिका ।
नमस्करी रक्तमूला तथा पृष्ठप्रचोदिका[८] ।।२४२।।

कट्वङ्गश्चारलुश्चैव दीर्घवृन्तस्तथैव च ।
पूतिपत्रो भूरिवृक्षो निःसारश्चापि शब्दितः ।।२४३।।

मधुकं हरिद्रादौ ।।
बिल्वकं[९] वरुणादौ ।। तस्य फलपेशिका ।
रोध्रशब्दो रोध्रादावेव ।
पलासो मुष्ककादौ ।
नन्दीवृक्षः प्ररोही च जयवृक्षो वनस्पतिः ।
पिष्टक्षीरी[१०] च पठितः शब्दैः पर्यायवाचकैः ।।२४४।।
पद्मकेशरं नलिनमञ्जनादौ ।।

---

१. साहस्री – अ.नि., श्लो. १६४ ।
२. 'कुञ्जारो– सौ. नि., ह. (क) । पाठः संशोधितः ।
३. 'मद्यपाशनी' – सौ.नि., ह. (क) । पाठः संशोधितः ।
४. पार्वतीया – ध.नि., पृ. ११३ । पर्वतीया – कै.नि. ।
५. सुभिक्षा – अ.को., पृ. ७० । म. नि., पृ. ४२ ।
६. वह्निपुष्पा – ध.नि., पृ. ११३ ।
७. शतपत्रा – अ.नि., श्लो. १६१ । शमीपत्रा – ध.नि., पृ. १५५ ।
८. पुष्पावरोधिका – अ.नि., श्लो. १६१ ।
९. 'तिल्वकं' – सौ.नि., ह. (क) । पाठः संशोधितः ।
१०. 'षष्ठःक्षीरी' – सौ.नि., ह. (क) । पाठः संशोधितः ।

Digitization by Arya Samaj Charitable Foundation, Chennai

।। प्रियङ्ग्वादिः ।।

प्रियङ्गुरेलादौ ।।
समङ्गा धातकीकुसुमानि चाम्बष्ठादौ ।।
पुन्नागपुष्पमेलादौ ।।
चन्दनं सालसारादौ ।।
मोचश्च[1] शाल्मली चैव तथा तूलफलेति च ।
कुक्कुटी कण्टकीला[2] च तथा मातुलवृक्षकः ।।२४५।।

रसाञ्जनाञ्जनेऽञ्जनादौ ।
कुम्भीको घटवृक्षश्च तथा कुम्भफलश्च सः ।
किञ्जरो पानवृक्षश्च स्थालिकावृक्ष एव च ।।२४६।।

योजनवल्ली मञ्जिष्ठा ताम्रमूला च शब्दिता ।
कालमेषी च काला च सैव भाण्डीरिका मता ।।२४७।।

दीर्घमूला तथाऽनन्ता समुद्रान्ताऽपि चोच्यते ।
दूरानुगतमूला च तथा चापि यवासकः ।।२४८।।

गणौ प्रियङ्ग्वम्बष्ठादी पक्वातीसारनाशनौ ।
सन्धानीयौ हितौ पित्ते व्रणानाञ्चापि रोपणौ ।।२४९।।

---

१. *मोचा - अ.नि., श्लो. १६०, अ.को., पृ. १४४ ।*
२. *कण्टकाढ्या - ध.नि., पृ. १९५ ।*

Digitization by Arya Samaj Charitable Foundation, Chennai

।। न्यग्रोधादिः ।।

न्यग्रोधश्च वटश्चैव तथा रक्तफलः स्मृतः ।
क्षीरी वैश्रवणावासः पादपी शुङ्गिरेव च ।।२५०।।

अश्वत्थः पिप्पलः शृङ्गी चलपर्णो गजाशनः ।
दीर्घायुश्चैत्यवृक्षश्च बोधिवृक्षश्च शब्दितः ।।२५१।।

उदुम्बरः स्कन्धफलो हेमदुग्धः सदाफलः ।
यज्ञयोग्यो जन्तुफलो मतश्चापि वनस्पतिः ।।२५२।।

प्लक्षः प्लवः सुशीतश्च पिप्परिः शुङ्गिरेव च ।
अश्वत्थपत्रिका चापि तथा चापि कपीतनः ।।२५३।।

मधूकः सारिवादौ व्याख्यातः ।।
ककुभोऽर्जुनः सालसारादौ ।।
आम्रश्च सहकारश्च चूतो मधुकरप्रियः ।
वसन्तदूतश्च तथा मन्मथः पुष्पमञ्जरी ।।२५४।।

जम्बूः सुरभिपत्रा च महाजम्बूर्महाफला ।
सुरभी राजजम्बूश्च महास्कन्धा[1] च कीर्तिता ।।२५५।।

वेतसी[2] काकजम्बूश्च नादेयी शीतपल्लवा[3] ।
भ्रमरप्रिया मेघवर्णा द्वितीया जम्बुरुच्यते ।।२५६।।

प्रियालो बहलत्वक्च चारो द्राक्षाफलस्तथा ।
मधुराम्लफलश्चैव खरस्कन्धश्च शब्दितः ।।२५७।।

---

१. *महास्कन्धा – म.नि., पृ. १३५ । महास्कन्दा – सौ.नि., ह. (क)*
२. *वेदसी – सौ.नि., ह. (क) । पाठः संशोधितः ।*
३. *शीलपल्लवा – तत्रैव । पाठः संशोधितः ।*

Digitization by Arya Samaj Charitable Foundation, Chennai

रोहिणी वल्कसोमश्च[4] सोमवृक्षोऽथ कट्फलः ।
महात्वक्को रञ्जनश्च महावल्कल एव च ।।२५८।।

वञ्जुलो वेतसश्चैव नादेयो दीर्घपत्रकः ।
विदुलो वैदली चैव जलकामो निकुञ्जजः ।।२५९।।

कदम्बो रोध्रादौ ।।
बदरी कोलिका चैव तथा कर्कटकीफला।
स्निग्धपिच्छिलपत्रा च तथा चापि विकण्टका[5] ।।२६०।।

तिन्दुकी कालसारा च नीलस्कन्धा तथैव च ।
विस्फूर्जनी विस्फुटनी तथा चार्ष्णितरावणी[6] ।।२६१।।

न्यग्रोधादिर्गणो व्रण्यः संग्राही भग्नसाधकः ।
रक्तपित्तहरो दाहमेदोघ्नो[7] योनिदोषहा[8] ।।२६२।।

।। गुडूच्यादिः ।।

कुस्तुम्बुरु हृद्यगन्धो धनिका धान्य एव च ।
अल्लिका[9] चापि पठिता वेषणाप्रवराऽपि च ।।२६३।।

चन्दनं सालसारादौ ।।
पद्मकं काकोल्यादाविति ।।
एष सर्वज्वरं हन्ति गुडूच्यादिस्तु दीपनः ।
हृल्लासारोचकवमीपिपासादाहनाशनः ।।२६४।।

४. सोमवल्कः - ध.नि., पृ. २१ ।
५. युग्मकण्टिका - कै.नि., पृ. ६६ । युग्मकण्टकः - अ.नि. श्लो. ७६ ।
६. रावणः - कै.नि., पृ. ७४ ।
७. दाहमेदघ्नः - सौ.नि., ह. (क) ।
८. योनिदोषहृत् - सु.सं., मु., सू. ३८/४९ ।
९. अल्लका - ध.नि., पृ. ८२ ।

Digitization by Arya Samaj Charitable Foundation, Chennai

।। उत्पलादिः ।।

उत्पलङ्कुन्दजं नीलं श्लक्ष्णनालं जलोद्भवम् ।
शीतलं शीतवीर्य(ञ्च) सूर्यबोधि शशिप्रभम् ।।२६५।।

रक्तोत्पलं रक्तनालं श्रीनिकेतं मनोरमम् ।
विशालं रक्तकुमुदं भ्रमरेष्टं वरोद्भवम् ।।२६६।।

कुमुदं श्वेतवर्णञ्च शष्पगर्दभकं सितम् ।
चारुवृन्तञ्च विज्ञेयं श्यामवृन्तमथापि च ।।२६७।।

सौगन्धिकं रक्तनीलं कर्णपूरं वरोत्पलम् ।
जात्युत्पलञ्च पठितं वृत्तेन्दीवरमेव च ।।२६८।।

कुवलयं कुड्मलं चैव कालजं काककुड्मलम् ।
काकोत्पलञ्च पठितं काकलोड्यमथापि च ।।२६९।।

नलिनमञ्जनादौ ।।
पुण्डरीकस्य नामानि नलिनेन विभावयेत् ।
विशेषः पुण्डरीके तु शुक्लनाम प्रयोजयेत् ।।२७०।।

मधुकं हरिद्रादौ ।।
उत्पलादिरयं दाह-रक्तपित्त-विनाशनः ।
पिपासा-विष-हृद्रोग-छर्दिमूर्च्छाहरो गणः ।।२७१।।

Digitization by Arya Samaj Charitable Foundation, Chennai

।। मुस्तादिः ।।

मुस्ता वचादौ ।।
हरिद्राद्वयं हरिद्रादावेव ।।
त्रिफला मुष्ककादौ ।।
कुष्ठमेलादौ ।
हैमवत्यां वचायान्तु वचानामानि योजयेत् ।
अयमेव विशेषः स्यादुत्तरापथिकेति च ।।२७२।।

पाठारग्वधादौ।।
कटुरोहिणी पिप्पल्यादौ ।।
शार्ङ्गेष्टारग्वधादौ ।।
अतिविषाद्रमिडी[१] चैव पूर्वनामा पिप्पल्यादौ ।।
एष मुस्तादिको नाम्ना गणः श्लेष्मानिलापहः[२] ।
योनिदोषहरः[३] स्तन्यशोधनः पाचनस्तथा ।।२७३।।

।। त्रिफला ।।

हरीतक्यामलकविभीतकानि मुष्ककादौ ।।
त्रिफला कफपित्तघ्नी मेहकुष्ठविनाशनी ।
चक्षुष्या दीपनी चैव[४] विषमज्वरनाशनी ।।२७४।।[५]

---

१. *सिद्धसारग्रन्थेऽपि द्रमिडीशब्दः पठितः, अत्रापि 'द्रमिडी' इति पाठो दृश्यते ।*
२. *श्लेष्मविनाशनः – सु.सं., ह. (ङ) । श्लेष्मनिषूदनः सु.सं., मु., सू. ३८/५५।*
३. *योनिदोषहरश्चैव – सु.सं., ह. (घ)*
४. *पथ्या – सु.सं., ह. (क) (घ) ।*
५. *एतदग्रे – सु.सं., ह. (क) (घ) ग्रन्थयोः द्रव्यसंग्रहाध्याये त्रप्वादिलाक्षादी द्वौ गणौ वर्णितौ, सु.सं., ह. (ङ) ग्रन्थे मुद्रितग्रन्थे च तत्र क्रमेण त्रिकटुकम्, आमलक्यादिः, त्रप्वादिः, लाक्षादिरित्येते गणाः पठिताः । परं सौ.नि., ग्रन्थे एतेषामुल्लेखो न दृश्यते ।*

Digitization by Arya Samaj Charitable Foundation, Chennai

।। लघुपञ्चमूलम् ।।

एरण्डबृहतीद्वयं[१] पृथक्पर्णी सालपर्णी विदारिगन्धादौ[२] ।।

।। बृहत्पञ्चमूलम् ।।

बिल्वाग्निमन्थौ वरुणादौ ।।
टुण्टुकः श्योनाको वरुणादौ ।।
काश्मरी कट्फलं पूर्वनामा रोध्रादौ ।।
पाटलारग्वधादौ ।।[३]

।। वल्लीपञ्चमूलम् ।।

विदारीसारिवे विदारिगन्धादौ ।।
हरिद्रा हरिद्रादौ ।।[४]
गुडूच्यारग्वधादौ ।।
अजशृङ्गी वरुणादौ ।।[५]

---

१. 'केचिद् गोक्षुरकस्थाने एरण्डं पठन्ति' इति निबन्धसंग्रहव्याख्यायां डल्हणः । (सु.सं., मु., सू. ३८/६६)। तत्रोद्धृतं चक्रपाणिवचनम् – 'चरके गोक्षुरकं चैरण्डस्थाने पठ्यते, न सुश्रुतप्रयोगेषु । परं पञ्चमूलीप्रयोगे एरण्डो ग्रहीतव्यः' इति चक्रः ।

२. अत्रास्य गणस्य गुणनिर्देशपद्यं नास्ति । सु.सं., ह. (ङ) ग्रन्थे तत्सम्बद्धं पद्यमित्थं पठितम्– कषायतिक्तमधुरं कनीयः पञ्चमूलकम् । वातघ्नं पित्तशमनं बृंहणं बलबर्द्धनम् ।। इति।

३. अस्यापि गणस्य गुणनिर्देशः सौ.नि., ह. (क) (ख) ग्रन्थयोर्नास्ति । सु.सं., ह. (ङ) ग्रन्थे तद्गुणा एवं वर्णिताः – 'सतिक्तं कफवातघ्नं पाके लघ्वग्निदीपनम् । मधुरानुरसं चैव पञ्चमूलं महत् स्मृतम् । गणः श्वासहरो ह्येष कफपित्तानिलापहः । आमस्य पाचनश्चैव सर्वज्वरविनाशनः ।।' इति ।

४. 'रजनी हरिद्रा, 'रञ्जनी' इत्यन्ये पठन्ति, रञ्जनी शिरहलकः' इति निबन्धसंग्रहव्याख्यायां डल्हणः। (सु.सं., मु., सू. ३८/७२)

५. एतद्गुणाः सु.सं., ह. (ङ) ग्रन्थे पठिताः "वल्लीजं पञ्चमूलं (तु) प्रशस्तं कफनाशनम् । सृष्टमूत्रानिलहरं वृष्यमिन्द्रियबोधनम् ।।" इति ।

Digitization by Arya Samaj Charitable Foundation, Chennai

।। कण्टकपञ्चमूलम् ।।

करमर्दी क्षीरफला कृष्णपाकफलेति च ।
अम्लपुष्पफला चैव वराम्ला च प्रकीर्तिता ।।२७५।।

त्रिकण्टकः श्वदंष्ट्राख्यो विदारिगन्धादौ ।।
गृध्रनख्यापिका हिंस्रा तथा हिंस्रा च शब्दिता ।।
काकादनी दुरामोषा चक्रपर्णेति चोच्यते ।।२७६।।

(कण्टकाख्यं[1] पञ्चमूलं कफानिलहरं स्मृतम् ।
मधुरानुरसं चैव पक्वाशयविशोधनम् ।।
रक्तपित्तहरो[2] ह्येष शोफत्रयविनाशनः ।
सर्वमेहहरश्चैव शुक्रदोषनिषूदनः।।)

---

१. *एतत्पद्यं सौ.नि., ह. (क) (ख) ग्रन्थयोर्नास्ति । केवलं सु.सं., ह. (ङ) ग्रन्थे पठितम् - अत्रोपयोगितया स्थापितम् ।*

२. *एतत्पद्यं सु.सं., मु. ग्रन्थे द्रव्यसंग्रहणीये द्वयोः वल्लीपञ्चमूल- कण्टकपञ्चमूलयोः गुणनिर्देशकत्वेनेत्थं पठितम् - 'रक्तपित्तहरौ ह्येतौ शोफत्रयविनाशनौ । सर्वमेहहरौं चैव शुक्रदोषविनाशनौ ।। इति ।*

Digitization by Arya Samaj Charitable Foundation, Chennai

।। तृणपञ्चमूलम् ।।

कुशः काशो नलो दर्भः[१] गुण्ठवो वीरतरादाविति[२] ।।
(तृणजं पञ्चमूलं तु दाहप्रशमनं स्मृतम् ।
पित्तमूत्रविषार्तानां प्रशस्तं च विशोधनम् ।।[३])
तेषां वातहरावाद्यावन्त्यः पित्तविनाशनः ।
पञ्चकौ श्लेष्मशमनावितरौ परिकीर्तितौ[४] ।।२७७।।

त्रिवृतादिमन्यत्रोपदेक्ष्यामः ।।
समासेन गणा ह्येते प्रोक्तास्तेषां तु विस्तरम् ।
चिकित्सितेषु वक्ष्यामि ज्ञात्वा दोषबलाबलम् ।।२७८।।
समीक्ष्य[५] दोषभेदाँश्च गणान् भिन्नान् प्रयोजयेत् ।
पृथङ्मिश्रान् विभिन्नान् वा गणं[६] व्यस्तं च संहतम् ।।२७९।।

द्वात्रिंशद्[७] गणा ह्येते प्रोक्ता विस्तरतो मया ।
अत ऊर्ध्वं प्रवक्ष्यामि यथास्थूलानि नामभिः ।।२८०।।

---

१. सु.सं., ह. (क) ग्रन्थे द्रव्यसंग्रहणीये अत्र चत्वारि द्रव्याणि पठितानि – कुशः, काशः, काण्डेक्षुः, दर्भश्च ।
२. अत्र गणनाम नोद्दिष्टम् । सु.सं., ह. (क) ग्रन्थे (ङ) ग्रन्थे च तस्य तृणसंज्ञा निर्दिष्टा ।
३. सौ.नि., ह. (क) (ख) ग्रन्थयोरेतत्पद्यं नास्ति । सु.सं., ह. (ङ) ग्रन्थादुद्धृत्य स्थापितम् . मुद्रितग्रन्थे तु अन्यदेव पद्यं दृश्यते – मूत्रदोषविकारञ्च रक्तपित्तं तथैव च । अन्त्यः प्रयुक्तः क्षीरेण शीघ्रमेव विनाशयेत् ।।इति ।
४. 'ये प्रतिपञ्चकं गुणश्लोकं न पठन्ति, तेषां मते पञ्चकानां गुणानेकेनैव श्लोकेन वक्तुमाह – एषामित्यादि ।' इति निबन्धसंग्रहे डल्हण : ।
५. सु.सं., ह. (ङ) ग्रन्थे मुद्रितग्रन्थे च एतत्पूर्वं क्रमेणैकं द्वे च पद्ये पठिते । ते यथा – "एभिर्लेपान् कषायाँश्च तैलान् सर्पींषि पानकान् । प्रविभज्य यथान्यायं कुर्वीत मतिमान् भिषक्।।" (मुद्रिते) । "धूमवर्षानिलक्लेदः सर्वर्तुष्वनभिद्रुते । ग्राहयित्वा गृहे न्यस्येद् विधिनोषधसंग्रहम्।।" (उभयोः) इति ।
६. 'गणं चाव्यक्तं चरिषन्' (सौ.नि., ह. (क)) । पाठः संशोधितः ।
७. अत्र द्वात्रिंशदिति संख्याया उल्लेखो वर्तते, परं गणास्त्रयस्त्रिंशत्संख्याः पठिताः । तत्र त्रिफलाया बहिष्करणेन द्वात्रिंशत्संख्या सम्मता भवेदित्यनुमीयते ।

Digitization by Arya Samaj Charitable Foundation, Chennai

प्रकीर्णकानि द्रव्यानि स्थावराणि चराणि च ।
वातङ्गिनी वार्तकिनी राजवातङ्गिनीति च ।
सुस्वादुवातङ्गिनी[1] च महावातङ्गिनीति च ।।२८१।।

श्वेतकाम्बोजिका तक्षी श्वेतपाकी बहुप्रदा ।
अवदानपाकी शरणा बहुपुत्रा च कीर्तिता ।।२८२।।

द्वितीया कृष्णकाम्बोजी कृष्णपाक्यपि चोच्यते ।
एतान्येव तु नामानि श्वेतहीनानि योजयेत् ।।२८३।।
यानि नामानि पर्यायैर्मधूके योजितानि तु ।
मधूलिके च तान्येव योज्यान्यल्पतरश्च सः ।।२८४।।

बिम्बीतकोऽरुष्करश्च[2] रञ्जनोऽक्षरकारणः ।
(वीरवृक्षः[3]) शोफकरो रक्षोघ्नश्च प्रकीर्तितः ।।२८५।।

रोहीतको रोहणकः[4] सदापुष्पः प्लिहापहः ।
रोहीतो वरतिक्तश्च रक्षोघ्नो रक्तपुष्पकः ।।२८६।।

शाल्मलीवेष्टको यस्तु निर्यासः स तु शाल्मलः ।
स च मोचरसः प्रोक्तः शब्दैः पर्यायवाचकैः ।।२८७।।
पारिभद्रः पारिजातो जन्तुहा रक्तकेशरः ।
तथा सुरतवृक्षश्च शब्दैः पर्यायवाचकैः ।।२८८।।

---

१. *'सः स्वादुवातङ्गिनी' – (सौ.नि., ह. (क)) । पाठः संशोधितः ।*

२. *'बिम्बेतकोरस्करश्च रजानाक्षरकारणा' इति पाठः परिवर्तितः । (सौ.नि., ह. (क)) । सुश्रुतसंहितायाः सूत्रस्थाने (मु.) ४६ अध्याये शाकेषु विम्बितिका पठिता, तदनन्तरं नदीभल्लातकश्च पठितः । भल्लातकवृक्षस्य फलान्यामानि पल्लवाश्च शाकत्वेनाभिप्रेताः इति डल्हणः ।*

३. *अत्र रिक्ते स्थाने भल्लातकपर्याये पठितो वीरवृक्षः स्थापितः ।*

४. *रोहणको– सौ.नि. ह.(क) ।*

Digitization by Arya Samaj Charitable Foundation, Chennai

वंशो वेणुर्यवफलस्तृणकेतुः सतीरहः ।
(त्वक्सार[५])श्च सुपर्वा च मृत्युर्जीवोऽथ मस्करः ।।२८९।।

कूष्माण्डको धूल्यवासः[६] प्रोक्तः खदिरपत्रकः[७] ।
तथा च गौरखदिरः किञ्चित् खदिरकण्टकः ।।२९०।।

शमी पवित्रपत्रा च बिम्बिरी बहुकण्टकी ।
अजप्रिया सूक्ष्मपत्रा मङ्गल्या च प्रकीर्तिता ।।२९१।।

कुटजी दासकुटजी नीली कुटजिका तथा ।
क्षीरी कूटजिका चैव काली कूटजिकेति च ।।२९२।।

सरला पूतिकाष्ठञ्च[८] पूतिदारु च शब्दितम् ।
स्नेहकाष्ठं स्नेहदारु शब्दैः पर्यायवाचकैः ।।२९३।।

नीलिकाञ्जलिका चैव तथैवाञ्जलिकेशिका ।
नीलपुष्पा[९] रोमशिका धृतिका सा च शब्दिता ।।२९४।।

दधिल्लिका खट्वपादी गर्दभाञ्जलिकेति च ।
क्षीरिणी लम्बणफला पाण्डुराञ्जनिकेति च ।।२९५।।

---

५. *स्थानं रिक्तम् (सौ.नि.ह. (क) (ख) ।*

६. *'घूण्यवासः' – सौ.नि.ह. (क) । पाठः संशोधितः ।*

७. *अत्र पठिताः खदिरपत्रकः, गौरखदिरः, खदिरकण्टकः, एते अन्यद्रव्यपर्यायाः प्रमादेन पाठलोपेनात्र लिखिताः प्रतीयन्ते । तत्स्थाने – 'कर्कारुश्चापि शब्दितः । बृहत्फलः पीतपुष्पः सितसस्यश्च कीर्तितः' इति पाठः स्थापयितुं पुज्यते । अनन्तरं च 'सोमवल्कः श्वेतसारः प्रोक्तः खदिरपत्रकः । तथा च गौरखदिरः किञ्चित् खदिरकण्टकः' इति पाठः सम्भाव्यते ।*

८. *'पूतिशब्दोऽयं सुगन्धिवाचीः यथा – पूतिः खट्वाशः, वनजा मधुकर्कटी पूतिपुष्पेति सुगन्धिपुष्पेत्यर्थः' (सु.सं., सू. ४६।१७५) इति निबन्धसंग्रहे डल्हणः । 'पीतद्रुः सरलः पूतिकाष्ठं च' इत्यमरः ।*

९. *नीलिपुष्पा – सौ.नि., ह. (क) । पाठः संशोधितः ।*

Digitization by Arya Samaj Charitable Foundation, Chennai

जीमूतको देवदाली[१०] वृन्तकोषा कदम्बिका ।
मूषिकानां विषघ्नश्च टक्कारी च प्रकीर्तिता ।।२९६।।

लम्बा तुम्बी तथेक्ष्वाकुः कटुकालाबुनीति च ।
बृहत्फला राजपुत्री सैव पिण्डफला मता ।।२९७।।

धामार्गवी[११] कोषफला राजकोशातकी तथा ।
कोशातकी कृतच्छिद्रा जालिनी कृतवेधना[१२] ।।२९८।।

मृगादनी विशाला च मृगेर्वारुकिनीति च ।
इन्द्रवारुण्यमरिका तथा चित्रफलेति[१३] च ।।२९९।।

काकोदुम्बरिका काकी वायसी जघनेफला ।
मूककर्कटिका चैव भद्रोदुम्बरिकेति च ।।३००।।

अक्कोल्लश्च[१४] किरिल्लश्च सुरतो दीर्घकीलकः ।
पीतसारस्ताम्रफलो गन्धपुष्पश्च शब्दितः ।।३०१।।

शेलुः श्लेष्मातकः शीतो मुद्गपुष्पो ग्रहद्रुमः ।
उद्दालकः श्लेष्मफलो विषघ्नो द्विजकुत्सितः ।।३०२।।

शतपुष्पा शताह्वा च मिशी[१५] मधुरिकेति च ।
मधुपुष्पा मागधिका तथा चामरपुष्पिका ।।३०३।।

---

१०. *देवताली – सौ.नि., ह. (क) । पाठः संशोधितः ।*
११. *धामार्गवः – अ.नि., श्लो. २४० ।*
१२. *कृतवेधनी – रा.नि., पृ. ४५ ।*
१३. *क्षुद्रफला – घ.नि., पृ. ५८ ।*
१४. अङ्कोलः – अ.नि., श्लो. २४३, अङ्कोटः – अ.को., पृ. १३८ ।
१५. *मिशिः – अ.नि., श्लो. २६६ ।*

Digitization by Arya Samaj Charitable Foundation, Chennai

नीपो महाकदम्बश्च वृत्तपुष्पश्च शब्दितः ।
कदम्बनामभिश्चैवं भाषन्ते नामकोविदाः ।।३०४।।

कोविदारः सुदारश्च कुलजी ताम्रपुष्पकः ।
उद्दालकश्छर्दनकस्तथा[१६] यमलपत्रकः ।।३०५।।

आटरुषोऽथ वासा च पुष्पः सिंहमुखोऽपि च ।
वृषश्च नामभिर्ज्ञेयो रक्तपित्तहरोऽपि च ।।३०६।।

पयस्या क्षीरिका चैव प्रोक्ता चैवार्कपुष्पिका ।
आदित्यपुष्पा शीता च स्वादुपुष्पा तथैव च ।।३०७।।

धन्वनो धनुवृक्षश्च गोत्रवृक्षो[१७] महाचरः ।
रुजासहो विज्जलको[१८] रक्तस्वादुफलस्तथा ।।३०८।।

बला चोदरिका चैव विज्जलोदरिकेति[१९] च ।
भद्रौदनी शीतकूरा[२०] शब्दैः पर्यायवाचकैः ।।३०९।।

महाबला भूरिबला पीतपुष्पा च शब्दिता ।
तथा चातिबला प्रोक्ता शब्दैः पर्यायवाचकैः ।।३१०।।

पिण्डीतको वराहाख्यः कालपिण्डीतकोऽपि च ।
महापिण्डीतकश्चापि मधुपिण्डीतकस्तथा ।।३११।।

---

१६. *छर्दनाकः* – *सौ.नि., ह. (क) । पाठः संशोधितः ।*
१७. *मात्रवृक्षः (सौ.नि., ह. (क)) । गोत्रद्रुमः* – *कै.नि., पृ. १५६ ।*
१८. *पिच्छलकः* – *रा.नि., पृ. ३६५ ।*
१९. *'विज्जालो'* – *सौ.नि., ह. (क) । पाठः संशोधितः ।*
२०. शीतपाकी – म.नि., पृ. ३६ । शीतकूर्चिका, कुरा– कै.नि., पृ. १९४ ।

Digitization by Arya Samaj Charitable Foundation, Chennai

पिण्डीतकः करघाटी तीक्ष्णकीलक एव च ।
श्वेतपिण्डीतकश्चैव करघातश्च शब्दितः ।।३१२।।

स्नेहपिण्डीतकश्चापि वर्णपिण्डीतकस्तथा ।
शुक्लपिण्डीतकः प्रोक्तः श्लक्ष्णपिण्डीतकोऽपि च ।।३१३।।

अवल्गुजा[21] बाकुचिका सैव पूतिफला स्मृता ।
सोमराजी चन्द्रराजी[22] शब्दैः पर्यायवाचकैः ।।३१४।।

सिन्दुकः सिन्दुवारश्च शिवपुष्पोऽर्थसाधकः ।
नेता चैवार्थसिद्धश्च सिंहकः स्थिरकोऽपि च ।।३१५।।

सिन्दुवारो नीलसंज्ञः कृष्णसंज्ञस्तथैव च ।
गिरिजः सिन्दुवारश्च विषघ्नश्चापि शब्दितः ।।३१६।।

सिध्मकं सिध्मकञ्चैव सिद्धकोऽर्थप्रसाधकः ।
सूरीतश्चार्थसिद्धश्च शब्दैः पर्यायवाचकैः ।।३१७।।

चक्रमर्दः पूक्किलकः प्रपुन्नाटश्च कीर्तितः ।
तथा चैडगजः प्रोक्तो मेषाक्षिकुसुमोऽपि च ।।३१८।।

अहिमारो[23]ऽरिमेदश्च कृष्णवृक्षोऽथ कट्फलः ।
सर्प्पान्तकः सर्प्परिपुर्गोधास्कन्धश्च कीर्तितः ।।३१९।।

हरिद्रको हरिद्रश्च पीतसारः सुराह्वतः ।
कदम्बपुष्पकः श्रीमान् शब्दैः पर्यायवाचकैः ।।३२०।।

---

२१. अवल्गुजः – अ.नि., श्लो. २२९ ।
२२. चन्द्ररेखा – तत्रैव ।
२३. अहिमाधः – सौ.नि., ह. (क) । संशोधितः ।

Digitization by Arya Samaj Charitable Foundation, Chennai

कार्पासी वेसनी वाटी तुण्डिकेरी च शब्दिता ।
आच्छादनफला चैव फली चापि प्रकीर्तिता ।।३२१।।

कपित्थश्च दधित्थश्च स्वादुपत्रो महाद्रुमः ।
हृद्यफलः सुगन्धश्च संग्राही च प्रकीर्तितः ।।३२२।।

अश्मन्तकोऽन्तघातश्च पाषाणान्तक एव च ।
तथा यमलपत्रश्च शब्दैः पर्यायवाचकैः ।।३२३।।

द्वितीयोऽश्मन्तकोऽम्लस्तु रसेन परिकीर्तितः ।
एतान्येव तु नामानि धीरस्तस्य प्रयोजयेदिति ।।३२४।।

सौश्रुत्यां संहितायां महोत्तरायां निघण्टुः समाप्तः ।।
वर्षे[२४]ऽनलाङ्करसगे नभकालपक्षे
विश्वेतिथौ दिनकरे दिवसे गुरौ भे ।
धीरो निघण्टुमिह कामलदत्तिरेष
वैद्यो लिलेरव असुकोऽमरसिंहको नु ।।३२५।।

।। शश्वच्छुभं भूयात् ।।

२४. एतत्पद्यं सौ. नि., ह. (ख) ग्रन्थे नास्ति । पुष्पिकावाक्यान्ते पत्रस्यार्धपङ्क्तिः रिक्ता वर्तते । पूर्णविरामश्चास्ति ततः पूर्वम् ।

Digitization by Arya Samaj Charitable Foundation, Chennai

Digitization by Arya Samaj Charitable Foundation, Chennai

परिशिष्टखण्डः

Digitization by Arya Samaj Charitable Foundation, Chennai

Digitization by Arya Samaj Charitable Foundation, Chennai

परिशिष्टम् - १

सौश्रुत-निघण्टुग्रन्थे वर्णितानां द्रव्याणां वर्णानुक्रमेण विवरणम्

निघण्टुपठितानि द्रव्यनामानि	डल्हणोक्ताः पर्यायाः तेषां लौकिकानि नामानि च	नेपालीभाषायां नामानि	लेटिनभाषायां नामानि	श्लोक सङ्ख्या
अक्कोलः	अङ्कोठः (अङ्कोलः)	अम्फी	*Alangium salvifolium* (L.F.) Wangerin	३०१
अगुरु	प्रसिद्धम्	अगर	*Aqlaria agallocha* Roxb.	७०
अग्निमन्थः	तेजोवृक्षः 'आगाथ'	गिनेरी	*Premna integrifolia* L.	७९
अजकर्णः	सर्जः, शालभेदः	साज	*Terminalia alata* Heyne ex Roth.	५५
अजमोदा	प्रसिद्धा	अजमोदा	*Apium graveolens,* L.	१५४
अजशृङ्गी	छगलविषाणिका 'मेण्ढिका' इति लोके	गुडमार	*Gymnema sylvestre* R.Br.	८३
अञ्जनम्	सौवीराञ्जनम्	अञ्जन	*Hardwickia binata* Roxb.	२२९
अतिविषा		अतीस	*Aconitum heterophyllum,* Wall ex Royle	१५९
अम्बष्ठा	माचिका 'साङ्कुरड'		*Quercus infectoria* Oliv.	२४१
अम्लाश्मन्तकः	अम्ललोटः	अमिलटाँकी	*Bauhinia malabarica* Roxb.	३२४
अर्कः	रक्तपुष्पः	आँक	*Calotropis procera* (Ait) Dryand	१११

Digitization by Arya Samaj Charitable Foundation, Chennai

अर्जकः	श्वेतकुठेरकः	–	*Orthosiphon pallidus* Royle	१२६
अर्जुनः	ककुभः 'कौहा'	अर्जुन	*Terminalia arjuna* W.& A.	६८
अलर्कः	मन्दारकः	सेतो आँक	*Calotropis gigantea* (L.) Dryand.	११२
अलवणा	ज्योतिष्मती	माल्कागुनु	*Celastrus paniculatus* willd.	१२०
अवल्गुजा	वाकुची	बकुची	*Psoralia corylifolia* L.	३१४
अशोकः	लोहितकुसुमः	अशोक	*Saraca asoca* (Roxb.) De Wilde	१०३
अश्मन्तकः	यमलपत्रकः'आसन्त'	नागलहरा	*Bauhina scandens* L.	३२३
अश्मभेदः	पाषाणभेदकः	पाखनवेद	*Bergenia ciliata* (How) Starnb.	९१
अश्वकर्णः	गन्धमुण्डः	–	*Dipterocarpus turbinatus* Gaertn.f.	६९
अश्वत्थः	पिप्पलः	पिपल	*Ficus religiosa* L.	२५१
असनः	बीजकः	विजयसाल	*Pterocarpus marssupium* Roxb.	६६
अहिमारः	अरिमेदः	गह्राउने खयर	*Acacia farnesiana* (L.) Willd.	३१९
आटरुषः	वासकः	असुरो	*Justicia adhatoda* L.	३०६
आमलकी	प्रसिद्धा	अमला	*Phyllanthus emblica* L.	१४४
आम्रः	प्रसिद्धः	आँप	*Mangifera indica* L.	२५४
आरग्वधः	किरमालकः	राजवृक्ष	*Cassia fistula* L.	३४
आर्तगलः	ककुभः, सुगन्धमूलः,'कौहा'	लट्टेकुरो	*Xanthium strumarium* L.	७४

Digitization by Arya Samaj Charitable Foundation, Chennai

परिशिष्टम्

इक्ष्वाकुः		तीतेलौका	*Lagenaria siceraria* (Molina) Standl.	२९७
इन्दीवरः	कुरण्टिकाभेदः	सहस्रजरी	*Celosia argentea* var. cristata Voss.	९६
इन्द्रपुष्पी	कृष्णपुष्पकरञ्जः, लाङ्गलकी	लंगली	*Gloriosa superba* L.	११७
उत्पलम्	नीलोत्पलम्	नीलो कमल	*Nymphaea stellata* Willd.	२६५
उदुम्बरः	प्रसिद्धः	डुम्री	*Ficus racemosa* L.	२५२
उन्दूरुकर्णा	मूषिककर्णिका 'उन्दूरी'	मुसलिण्डी	*Merremia emarginata* (Burm,f.)Hallier f.	१३६
उरुष्कः	सिल्हकः	लोहवान	Storax	१८०
उशीरम्	–	खसखस	*Vetiveria zizanioides* (L.) Nash.	२२७
ऊषकम्	क्षारमृत्तिका	–	Latax of *Corema amuoniacium* D. Don.	२२०
ऋद्धिः	–	थुमा	*Habenaria intermedia* D.Don.	२१७
ऋषभकः	वृषभकः	–	*Microstylis wallichii* Lindl.	२२
ऋषभी	कपिकच्छुः	काउसो	*Mucuna pruriens* (L.) DC.	३२
एरण्डः	प्रसिद्धः	अडेर	*Ricinus communis* L.	२९
एलवालुकम्	हरिवालुकम्	पैयुँ	*Prunus cornuta* (Wall.) ex. Royle Steud.	१०५
एला	–	सुकुमेल	*Elettaria cardamomum* Maton	१५३
कटुरोहिणी	कटुका	कुटकी	*Picrorhiza scrophulariiflora* Pennell.	१६०
कट्फलः	सोमवल्कः 'कायफल'	काफल	*Myrica esculenta* Buch-Ham ex.D.Don.	१०४

Digitization by Arya Samaj Charitable Foundation, Chennai

कट्वङ्गः	अरलुकः	–	*Ailanthus excelsa* Roxb.	२४३
कण्टकी	विकङ्कतः 'काँकई'	काँगियो	*Flacourtia ramontchi* L. Herit.	३७
कतकम्	–	निर्मली	*Strychnos potatorum* L.	२३७
कदम्बः	वृक्षकदम्बः	कदम	*Anthocephalus chinensis* (Lam.) A. Rich ex Walp.	१०८
कदरः	खदिराकारः श्वेतसारः	सेतो खयर	*Acacia suma* Kurg	५७
कदली	–	केरा	*Musa paradisiaca* L.	१०९
कपित्थः	–	कैथ	*Feronia limonia* (L.) Swingle	३२२
कपोतवङ्का	सुवर्चला	बन्देर सिरिस	*Dalbergia lanceolaria* L.	९७
कम्पिल्लकः	रोचनिका	सिन्दुरे	*Mallotus philippensis* Muell-Arg.	१९९
करञ्जः (चिरविल्वः)	–	सानो पाङ्ग्रो	*Holoptelea integrifolia* (Roxb.) Planch	४९
करञ्जः (नक्तमालः)	–	करेंगी	*Pongamia pinnata* L. Pirre	४८
करमर्दी	क्षीरफला 'करमदी'	करौना	*Carissa spinarum* L.	२७५
कर्कटशृङ्गी	–	कर्कटशृङ्गी	*Pistacia integerrima* Stew. ex Brandis.	२१३
कर्कन्धूः (गोपघोण्टा)	कर्कोटी	बयर	*Zizyphus nummularia* (Burm.f) W. & A.	३६
काकजम्बूः	स्वल्पफला(जम्बूः)	सानो जामुनु	?	२५६
काकमाची	मृष्टफला	काकमाची	*Solanam nigrum* L.	१३८
काकोदुम्बरिका	–	खस्रेटो	*Ficus hispida* L. f.	३००

Digitization by Arya Samaj Charitable Foundation, Chennai

परिशिष्टम्

काकोली	वीरा	काकोली	*Roscoea* purpurea Smith	२०८
कार्पासी	वनकार्पासी	कपास	*Gossypium herbaceum* L.	३२१
कालमालः	–	–	*Sphaeranthus senegalensis* DC.	१३५
कालमालः	कृष्णमल्लिका	बाबरी	*Orthosiphon sp.*	१२९
कालेयकम्	–	–	*Coscinium fenestratum* (Gaertn) Colebr.	७१
काशः	चामरपुष्पः	काँस	*Saccharum spontaneum* L.	९०
कासीसम्	भस्मसदृशम्, पुष्पकासीसञ्च	कासीस	Iron sulphate	२२३
किराततिक्तम्	भूनिम्बः	चिराइतो	*Swertia chirayita* (Roxb. ex Flem.) Karsten.	५१
कुङ्कुमम्	–	केशर	*Crocus sativus* L.	१८४
कुचन्दनम्	रक्तचन्दनम्	पतंग	*Caesalpinia sappan* L.	६३
कुटजः	इन्द्रवृक्षः	इन्द्रजौ	*Holarrhena pubescens* (Buch-Ham) G. Don.	३८
कुटजी	–	–	Wrightia arborea (Dennst.) Masberley	२९२
कुटन्नटम्	श्योनाकः	सानो मोथे	*Cyperus platystilis* Br.	१०२
कुन्दुरुकः	शल्लकीचोपः	सलाइको खोटो	*Boswellia serrata* Roxb.	१८१
कुमुदम्	श्वेतोत्पलम्	सेतो कमल	*Nymphaea alba* L.	२६७
कुम्भीकः	कुम्भीनामा वृक्षः	क्यामुनो	*Caraya arborea* Roxb.	२४६

Digitization by Arya Samaj Charitable Foundation, Chennai

कुरुटिका	कुरण्टिका 'शिरिवालिका'	सरवरी साग	*Celosia argentea* L.	९५
कुवलयम्	ईषन्नीलधवलं कमलम्	–	Nymphaea sp.	२६१
कुशः	ह्रस्वदर्भः	कुश	*Desmostachya bipinnata* Stapf.	८९
कुष्ठम्	–	कूठ	*Saussurea lappa* C.B. Clarke.	१६३
कुस्तुम्बुरु	धान्यकम्	धनिया	*Coriandrum sativum* L.	२६३
कुष्माण्डकः	–	कुभिण्डो	*Benincasa hispida* (Thunb.) Cogn.	२९०
कृष्णकाम्बोजी	–	सानो नूनढिकी	Breynia retsusa (Dennst) Alston	२८४
कोविदारः	–	टाँकी	*Bauhinia purpurea* L.	३०५
क्रमुकः	पूगः	सुपारी	*Areca catechu* L.	५८
क्षवकः	चिह्नरियाक 'छिक्कनी'	छिउँके झार	*Centipeda minima* (L.) A. Br & Aschers.	१३०
क्षीरकाकोली	काकोलीभेदः	सेतो काकोली	*Roscoea alpina* Royle	२०९
क्षुद्रश्वेता	श्वेतस्पन्दना 'सेफन्द'	अपराजिता	*Clitoria ternatea* L.	११८
क्षुद्रसहा	मुद्गपर्णी 'मूँगवन'	वनमूँग	*Vigna trilobata* (L.) Verdcourt.	२४
खदिरः	गायत्री	खयर	*Acacia catechu* Willed.	५६
खरपुष्पः	क्षवकभेदः	सश्रा	*Origanum vulgare* L.	१३१
गवाक्षी	इन्द्रवारुणी	इन्द्रेणी	*Citrullus colocynthis* Schrad.	२०१
गुग्गुलु	–	गोकूलधूप	*Commiphora mukul* (Hook ex Stocks) Engl.	१७६

Digitization by Arya Samaj Charitable Foundation, Chennai

परिशिष्टम्

गुडूची	प्रसिद्धा	गुर्जो	*Tinospora cordifolia* (Willd) Miers.	४५
गुन्द्रा /कुन्थः	पादरकभेदः 'गोदर'	पटेर	*Typha elephantina* Roxb.	८७
गृध्रनरवी	हिंस्रा	वनकेरा	*Capparis zeylanica* L.	२७६
चक्रमर्दः	–	टाप्रे	*Cassia tora* L.	३१७
चण्डा	चोरकभेदः	–	*Angelica archan-gelica* L.	१७१
चन्दनम्	श्रीचन्दनम्'श्रीखण्ड'	चन्दन	*Santalum album* L.	६२
चविका	हस्तिपिप्पलीमूलम्	चाबो	*Piper chaba* Hunter	१४९
चित्रकः	प्रसिद्धः	चितु	*Plumbago zeylanica* L.	४६
चोचम्	–	दालचीनी	*Cinnamomum zela-nicum* Blume	१७३
चोरकः	ग्रन्थिपर्णकभेदः		*Angelica glauca* Edgew.	१७४
छगलान्त्री	वृद्धदारुकभेदः	–	*Ipomoea pescaprae* (L.) Sw.	२०३
छिन्नरुहा	गुडूची (?)	गुर्जो	*Tinospora sinensis* (Lour.) Merr.	२१२
जम्बूः	राजजम्बूः (राजजम्बूः)	जामुनु	*Syzygium cumini* (L.) Skeals.	२५५
जिङ्गिनी	गुडमज्जनिका 'गुडदुणि'	झींग गाडा	*Lannea coromande-lica* (Houtt) Merrill.	१०७
जीमूतकः	देवदाली	छ्यूँके वनतोरिया	*Luffa echinata* Roxb.	२९६
जीरकम्	प्रसिद्धम्	जीरा	*Cuminum cyminum* L.	१५५
जीवकः	कूर्चशीर्षकः	जीवक	*Microstylis wallichii* Lindl.	२१
तगरम्	कालानुसार्यम्	सुगन्धवाल	*Delphinium brunonianum* Royle	१६२

Digitization by Arya Samaj Charitable Foundation, Chennai

तर्कारी	अरणिका	–	*Clerodendrum phlomidis* L. f.	७७
तापसवृक्षः	इङ्गुदः	च्यूरी	*Balanites aegyptiaca* (L.) Delile.	१२१
तिनिशः	स्यन्दनः 'सादण'	सादन	*Desmodium oogeinense*(Roxb.) H.Ohashi	६१
तिन्दुकी	तिन्दुकवृक्षः 'टिम्बरुयणि'	तिंजु	*Diospyros tomentosa* Roxb.	२६१
तिल्वकः	रोध्रः	असरा	*Viburnum nervosum* Hook. f. thoms.	१९८
तुगाक्षीरी	वंशलोचना	वंशलोचन	*Bambusa arundinacia* Willd	२१४
तुत्थकम्	कर्परिकातुत्थम् 'खपरिया'	तुथो	Copper sulphate	२२४
त्रिवृत्	रक्तमूला 'निशोत्र'	निशोथ	*Operculina turpethum* (L.) Silva Manso.	१९५
दधिल्लिका	–	बलढेन्ग्रा	*Mucuna monosperma* DC.	२९५
दन्ती	दन्तिनी	अजयपाल	*Baliospermum montamum* (Willd) Mull-Arg.	१९६
दाडिमः	प्रसिद्धः	दारिम	*Punica granatum* L.	२३६
दारुहरिद्रा	–	चुत्रो	*Berberis aristata* DC.	१९०
दासीकुरण्टकः	नीलपुष्पः 'कण्टासेलुआ'	–	*Barleria strigosa* Willd.	४४
दीर्घमूला	दुरालभा	–	*Fagonia cretica* L.	२४८
द्राक्षा	मृद्विका	दाख	*Vitis vinifera* L.	२३४
धन्वनः	–	धामन	*Grewia tiliaefolia* Vahl.	३०८
धवः	शकटाख्यः	धावादान	*Anogeissus latifolius* (Roxb. ex DC.) Bedd.	६७

Digitization by Arya Samaj Charitable Foundation, Chennai

परिशिष्टम्

धातकीकुसुमम्	–	धैंयारो	*Woodfordia fruticosa* Kurg.	२४१
धामार्गवी	–	घिरौंला	*Luffa cylindrica* (L.) M.Roem.	२९८
ध्यामकम्	कत्तृणम् 'रोहिष'	–	*Valeriana pyrolaefolia* Decne	१६५
नन्दीवृक्षः	काश्मरी	जामु	*Ficus microcarpa* L.f.	२४४
नलः	–	नर्कट	*Phragmites karka* (Retz) Trin. ex Steudel.	८८
नलिनम्	पद्म	कमल	*Nelumbo nucifera* Gaertn.	२३१
नागदन्ती	दन्तिनी	अच	*Croton roxburghii*- N.P. Balakr.	११३
नागपुष्पम्	नागकेशरम्	नागेश्वरी	*Mesua ferrea* L.	१६७
निम्बः	प्रसिद्धः	नीम	*Azadirachta indica* A. Juss.	४३
नीपः	धूलीकदम्बः	कदम	*Anthocephalus chinensis* (Lam) A. Rich. ex Walp.	३०४
निर्गुण्डी	नीलनिर्गुण्डी	सिमाली	*Vitex negundo* L.	१३४
नीलिका		साकिनु	*Indigofera tinctoria* L.	२९४
न्यग्रोधः	वटः	बर	*Ficus bengalensis* L.	२५०
पटोलः	कुलकः	परवर	*Trichosanthes dioica* Roxb.	५०
पत्रम्	पत्रकम्	तेजपात	*Cinnamomum tamala* Nees & Eberm.	१६६
पद्मकम्	पद्मकाष्ठम्	पैयुँ	*Prunus cerasoides* D. Don.	२१५

Digitization by Arya Samaj Charitable Foundation, Chennai

पयस्या	–	दुधिया	*Euphorbia hitra* L.	३०७
परुषकः	धन्वनपत्रकः	फाल्सा	*Grewia subi-naequalis* DC.	२३३
पलाशः	किंशुकः	पलाश	*Butea monosperma* (Lam.) Kuntze.	१०१
पाटला	वसन्तदूती	पादरी	*Stereospermum che-lonoides* (L:f.) DC.	४०
पाठा	अविद्धकरणी 'पाढ'	बाटुलपाते	*Cissampelos pareira* L.	३९
पारिभद्रः	देवदारुः, अन्ये तु रक्तकुसुमःकण्टकी वृक्षविशेषः ।	फलेदो	*Erythrina variegata* L- var orientalis (L.) Merrill	२८८
पिण्डीतकः (करघाटी)	–	पिंडार	*Xeromphis uliginosa* (Retz) Maheshwari	३१२
पिण्डीतकः (वराहाख्यः)	–	पिंडार	*Randia fascicu-lata* (Roxb.) DC.	३११
पिप्पली	प्रसिद्धा	पिप्ला	*Piper Longum* L.	१४७
पिप्पलीमूलम्		पिप्लाको जरा	Root of the *Piper Longum* L.	१४८
पुण्डरीकम्	श्वेतपद्मम्	सेतो कमल	White variety of *N. nucifera* Goertn.	२७०
पुत्रश्रेणी	द्रवन्ती	अजयपाल	*Croton tiglium* L.	२००
पुनर्नवः	–	सेतो पुनर्नवा	*Trianthema portulacastrum* L.	२८
पुनर्नवा	वर्षाभूः 'साटडी'	पुनर्नवा	*Boerhaavia diffusa* L.	२७
पुन्नागम्	सुरपर्णिका	नागकेशर	*Calophyllum inophyllum* L.	१८५
प्रजीवलः	मत्स्याक्षकः, नदीपिप्पली	–	*Peristrophe bisclyculata* Nees	१३७

Digitization by Arya Samaj Charitable Foundation, Chennai

परिशिष्टम्

प्रपौण्डरीकम्	स्वनामख्यातं मधुररसं नेत्राश्च्योतनार्हं द्रव्यम्	-	?	२१६
प्रियङ्गुः	-	दहिकम्लो	*Callicarpa macrophylla* Vahl.	१६८
प्रियालः	चारद्रुमः	चिरौंजी	*Buchanania latifolia* Roxb.	२५७
पृथक्पर्णी	पृश्निपर्णी	पृश्निपर्णी	*Uraria picta* (Jacq.) Desv. ex DC.	१८
प्लक्षः	पर्कटी	काभ्रो	*Ficus lacor* Buch. Ham.	२५३
फणिज्झकः	तीक्ष्णगन्धः 'मरुवक'	रामतुलसी	*Majorana hortensis Moench*	१२५
बदरी	-	बयर	*Ziziphus jujuba* Mill.	२६०
बला	-	बलु	*Sida cardifolia* L.	३०९
बालकः	-	नक्कली जटामसी	*Valeriana hardwickii* Wall.	१७५
बिभीतकी	-	बर्रो	*Terminalia bellirica* Roxb.	१४५
बिम्बी	ओष्ठोपमफला 'तिण्डुरिकी'	कुन्दरु	*Coccinia grandis* (L.) Voigt.	८१
बिम्बीतक	-	भलायो	*Semecarpus anacardium* L. f.	२८५
बिल्वः	श्रीफलः	बेल	*Aegle marmelos* (L.) Corr.	८२
बृहती (वृषभी)	सूक्ष्मफला	बिंही	*Solanum indicum* L.	२५
बृहती	स्थूलफला	कण्टकारी	*Solanum surattense* Burm. f.	२५
भल्लूकः	श्योनाकः 'शोणा'	टटेलो	*Oroxylum indicum* Vent.	२६

Digitization by Arya Samaj Charitable Foundation, Chennai

भार्गी	–	भार्गी	*Clerodendrum serratum* (L.) Moon.	११५
भूरिबला (महाबला)	–	बलाभेद	*Sida rhombifolia* L.	३१०
भूर्जः	मृदुत्वक्	भोजपत्र	*Betula utilis* D.Don.	५९
भूस्तृणम्	गुदाकः	–	*Hyptis suaveolens* Poit.	१२७
मदनः	पिण्डीतकः	मैनकाँडा	*Xeromphis spinosa* (Thunb.) Keay	३५
मधुकम्	–	जेठीमधु	*Glycyrrhiza glabra* L.	१९१
मधुशिग्रुः	रक्तशोभाञ्जनकः	रातो सजिउन	*Moringa concanensis*- Nimmo	७६
मधूकः	–	महुवा	*Madhuca indica* J.F. Gmel.	२२६
मधूलिकः	जलयष्टी	च्यूरी	*Aesandra butyracea* (Roxb.) Boehni	२८४
मरिचम्	–	मरिच	*Piper nigrum* L.	१५१
महानिम्बः	द्रेक्का 'पर्वतनिम्बः'	बकाइनो	*Melia azedarach* L.	१५७
महामेदा		खिराउन्ला	*Polygonatum cirrhifolium* (Wall) Royle	२११
महाश्यामा	वृद्धदारकः	समुद्रफल	*Argyreia nervosa* (Burm.f.) Boj.	१९४
महाश्वेता	नीलपुष्पः सेफन्दः	कराही	*Albizzia procera* (Roxb.) Benth.	११९
महासहा	माषपर्णी 'माषवन'	माषपर्णी	*Teramnus labialis* Spreng.	२३
मायूरकः	अपामार्गः	अपामार्ग	*Achyranthes aspera* L.	११४

Digitization by Arya Samaj Charitable Foundation, Chennai

परिशिष्टम्

मांसी	–	जटामसी	*Nardostachys grandiflora* DC.	१६४
मुस्ता	–	मोथेभ्फार	*Cyperus rotundus* L.	१८८
मुष्कक:	क्षारवृक्ष: 'मोरवक'	–	*Schrebera swietenioides* Roxb.	१४१
मूर्वा	धनुर्गुणयोग्या 'दुधऊ'	बहुनी लहरा	*Marsdenia tenacissima* W & A.	४१
मृगादनी	–	इन्द्रेणी	*Trichosanthes bracteata* (Lam.) Voigt.	२९१
मेदा	–	खिर्लुङ्	*Polygonatum verticilliatum* (L.) All.	२१०
मेषशृङ्गी	कर्कटशृङ्ग:	–	*Dolichadrone falcata* Seem.	६०
मोच:	शाल्मलि:	सिमल	*Bombax ceiba* L.	२४५
मोरट:	अङ्कोल्लपुष्प: 'मोइहर'	–	*Maerua arenaria* Hook F & Thoms.	७८
योजनवल्ली	मञ्जिष्ठा	मजिठो	*Rubia manjith* Roxb. ex Fleming	२४७
रक्तोत्पलम्	लोहितोत्पलम्	रातो कमल	*Nymphaea rubra* Roxb.	२६६
रस:	गन्धरस: 'बोल'	–	*Commiphora myrrha* (Ness) Engl.	१७८
रसाञ्जनम्	दारुहरिद्राक्वाथेन कृत्रिमम् ।	चुत्रोको खोटो	Solid water extract of *Berberis aristata* DC.	२३०
राजादन:	क्षीरिका	खिर्नी	*Manilkara hexandra* (Roxb.) Dubard.	२३५
रास्ना	सुरभी	रास्ना	*Pluchea lanceolata* oliver & Hiern.	११६
रोहिणी	कट्फल:	–	*Soymida febrifuga* A. Juss.	२५८

Digitization by Arya Samaj Charitable Foundation, Chennai

रोहीतकः	–	–	*Tecomella undulata* Seem.	२८६
लोध्रः	लाक्षाप्रसादनः	लोध	*Symplocos racemosa* Roxb.	९९
वचा	–	बोझो	*Acorus calamus* L.	१८७
वज्रवृक्षः	सेहुण्डः	सिउँडी	*Euphorbia royleana* Boiss L.	१४२
वञ्जुलः	वेतसः	–	*Salix caprea* L.	२५१
वंशः	–	बाँस	*Bambusa arundinacea* Willd.	२८१
वरुणः	तिक्तसारः शाकद्रुमः	सिप्लीकान	*Crateva* unilocu-lais Buch & Ham.	७३
